This recent compendium of the TM has been composed by Pannyāsa Suśīlavijaya as a brief introduction to the story of Dhanapāla's work. It is in Sanskrit prose and gives the story of the TM in bare outline. It is more of a scholar's pastime than an attempt at oversimplifying the story. The work has, however, not proceeded beyond the incident of the presentation of the portrait of Tilakamañjarī by Gandharvaka, corresponding to the portion of the text covered by the first and second parts of the Botad Edition of the *Tilakamañjarī*, published in 1951 and 1953 A.D. respectively. The summary has been given as a part of the Introduction to the respective parts of the edition. Somehow, it seems to have been dropped in the third part of the edition, published in the year 1953 A.D.

( vi ) *Tilakamañjarī-Kathā-Sārāṁśa, alias Sukṛta Saṁyoga*

This is a Gujarati prose compendium of the TM ; it has been prepared by Prabhudas Bechardas Pārekh at the instance of Pannyāsa Nitivijaya. It was pulished by Hemachandracharya Sabha, Patan, in 1919. The intention of the author is to satisfy the curiosity of those who are ignorant and incapable of reading the original in Sanskrit. In order to facilitate the readers who are generally uaed to the Gujarati novels divided into short chapters, the author of this work has divided the work into twelve *Paricchedas*, each of which has been further sub-divided into three to seven short sub-chapters. The work consists of about 260 pages of the usual demy size.

The story has been summarized very faithfully, keeping intact the order of the incidents in the original. It is quite readable as an original Gujarati novel, and has served the Jains of Gujarat by introducing them to the story of Dhanapāla's Sanskrit classic, for about half a century.

( vii ) *Tilakamañjarī-a Gujarati Novel*

This is a novel attempt at recasting Dhanapala's TM in the form of a modern Gujarati novel. The author of this work is a Gujarati novelist named

Vaidya Mohanalāla Cūnilāla Dhāmī. The work is divided into a number of chapters in accordance to the convenience both of the incidents in the work as well as that of the space available in the Jain monthly magazine named '*Kalyāṇa*' (in Gujarati) in which it was being published serially, from Vol. XII, No. 11 (January, 1966) onwards.

The novelist seems to have based his recast on the Gujarati resume of the TM, prepared by his teacher Pandit Prabhudāsa Becaradāsa Pārekha (whose work has been just noticed above), at whose instance he has undertaken this attempt at presenting the story of the TM in a new garb, acceptable to the modern literary taste of a general reader of Gujarati novels, at a Jain reader at that.

The author of this recast has naturally had to replace and rearrange various incidents of the original in an altogether a different sequence in order to sustain the interest. He has added some minor incidents and censored the long-drawn descriptions in view of the fresh approach and the modern form. Nevertheless the story has been presented faithfully without omitting any of the important features of the basic structure. This work deserves to be noted as a record of the practical and elastic nature of the Jains who are ready to recognise the demands of the age and present their religious literature to the general public in an agreeable shape harmonious with the march of the times.

IV : *Authorship of the TMKU :*

This work has been noticed by Professor H. D. Velankar in his *Jinaratnakośa*[33] as a work known as *Tilakamañjarī prabandha* composed by Padmasāgara. The title is based on the colophon[34] in the Mss. listed therein. Out of the five manuscripts of the work, one—the B Ms.—mentions the name of the author as 'Padmasāgara' the disciple of Dharmasāgara.[35] The date mentioned in the B Ms., is V. Sam. 1645 (i.e. A.D. 1588 approximately).[36]

Now, we know of one Pannyāsa Padmasāgara, who was a disciple of Dharmasāgara Gaṇī, and who wrote a *Vṛtti* on Dhanapāla's *Tilakamañjarī*.[37]

33. cf. *JRK*, p. 160.

34. cf. *TMKU.*, N Ms. folio 58 "*Iti śrī-tilakamañjarī-prabandhaḥ*"; B Ms. folio 67 "*Iti śrī-tilakamañjarī-prabandhaḥ sampūrṇa-samāptani*"; K Ms. folio 53 "*Iti śrī-tilakamañjarī-prabandhaḥ sampūrnam agamat*".

35. cf. *TMKU.*, B Ms. folio 67 :

"*Vācakagresara-śrīmad-dharmasāgara-śiṣyakaiḥ/*
*Nirmito 'yam kathā-graṁthaḥ paṁditaiḥ padmasāgaraiḥ//98//*
—(i.e. verse 1998).

36. Ibid., "*Saṁvat* 1645 *vṛṣe śāke* 15011 *pravṛttamāne phālgunamāse śukla-pakṣe* 13 *tithi bhuma-vāsare/Muni* govyaṁdalaṣitam/".

37. cf. Colophon of the Padmasāgara's *TMV*, photograph No. 437 of the paper Ms. :
"*Nirmitā ca mahopādhyaya-śrī6-dharmasāgara-gaṇi-śiṣya paṁ. padmasāgara-gaṇibhiḥ/*............

Shri M. D. Desai thinks he was the disciple of Vimalasāgara.[38] So does Pandit Mafatlal Zaveri.[39] But it is a fact that some Vijayasenasūri (and not Vimalasāgara) inspired him to undertake the work while he was in Cambay.[40] As is usual with the Jaina monks, this Padmasāgara, the author of the *Tilakamañjarī vṛtti*, carried on his work during sojourn from place to place and completed it in Broach,[41] in the year V. Sam. 1635 (i.e. about 1578 A.D.).

The literary activity of this Pannyāsa Padmasāgara extended from 1578 A.D. to 1601 A.D., during which he is known to have composed the following works:[42]

(1) *Naya-prakāśa-ṭīkā*;
(2) *Śila-prakāśa*;
(3) *Dharma-parīkṣā*;
(4) *Jagadguru-kāvya*;
(5) *Uttarādhyayana-kāthā-saṁgraha*;
(6) *Yukti-prakāśa* with a commentary;
(7) *Pramāṇa-prakāśa* with a *Vṛtti*;
(8) *Yaśodhara-carita*;
and (9) *Sthūlibhadra--caritra.*

From the number and nature of the works composed by him, this Pannyāsā Padmasāgara seems to be quite capable of composing a metrical compendium of Dhanapāla's TM. But it is a fact supported by the TMV that the readings of the text of the TM as understood by this commentary are sometimes not very exact, and leaves out many passages, while some them commented upon are misconstrued to some extent. This, however, is not the case with the author of the TMKU.

The doubt about the authority of the colophon of the work arises when we find that only one, out of the five Mss. of the work, mentions the name of the author as Pandita Padmasāgara, while the rest of them do not have the verse mentioning this detail. The oldest of them, viz., the Palm Leaf Ms. No. 2,

---

*Ukeśa-vaṁśa-sāmbhūta-meghajī-sādhu-nandanaḥ/*
*Sūrajī-namakaḥ sādhuḥ pratim etām alekhayat//*";

also, cf. ibid., photograph No. 1:

"*Śrīmad-vijayasenākhya-sūriṇām upadeśataḥ/*
*Stambhatīrtha-pure vyākhyām kurute padmasāgaraḥ//3//.*

38. cf. *Jaina Sāhitya-no Saṁkṣipta Itihāsa*, pp. 586-587.
39. cf. *TM*, Botad Edn., Part I, Intro., p. 29.
40. cf. loc. cit., Ft. Nt. 5 above.
41. cf. *TMV*, photograph No. 438:

"*Śrī-vacakāgresara-dharmasāgara-kramābja-sevā-para-padmasāgaraḥ/*
*Cakāra vṛttiṁ bhṛgukaccha-madhye Paṁca-triśat-candra-mite'mite'bde //6//*

42. cf. *TM.*, Botad Edn., Part I, Intro., p. 30.

listed under the title '*Harivāhana-carita*' in the unpublished list of the Kantivijayaji Bhandara at Baroda, does not have any colophon whatsoever. The title in the colophon of the four paper Mss. is rather misleading, as it can be easily mistaken for the TM itself, while the author of the compendium has himself stated at the beginning of his work that he is composing the '*Kathoddhāra*' of '*Tilakamañjarī*'; [43] hence my preference for the title of the work as '*Tilakamañjarī-kathoddhāra*' (TMKU).

The verse in the B Ms. mentioning the name of the author as Padmasāgara seems to have been added later on, as it is written in a slightly different and rather careless handwriting, at the top of the last page (folio 67), while the colophon mentioned above follows closely after the verse No. 1997 which concludes the work with the words.." *Harivāhana-prabhṛtayaḥ svaṁ śreyasaṁ śiśriyuḥ* ॥97॥. The date of the work as mentioned in the B Ms. only shows the date of the copyist,[44] who may or may not have been a contemporary of the author. Moreover, this work does not appear to have been included among the works of Padmasāgara. All these circumstantial evidences strengthen the doubt about the authenticity of the authorship of Padmasāgara so far as our work is concerned.

The part of the last line on the last page of the last folio of the Palm Leaf Ms. of this work is rubbed out and something else is sought to be written on it; evidently this rubbed out part of the line seems to have been the colophon in the Ms. Inspite of this attempt at rubbing out the original writing, some of the words in it can be easily read, and the name 'Candraprabhasūri' is easily discernible therefrom. This confirms the doubt about the real authorship of the work. The late Shri Muni Punyavijayaji also expressed his doubt about the authorship of Padmasāgara, since during the sixteenth century, the period when he lived, the practice of writing on palm-leaf was long obsolete and almost all the Mss. since the fourteenth century A.D. are generally written on paper. It is, therefore, possible that the real author might have been some "Candraprabhasūri" about whom we know nothing beyond his name. The calligraphy of the palm-leaf Ms. indicates that the work might have been written about the thirteenth century A.D.; and in that case, the author might have been a contemporary or a close successor of both Pallīpāla Dhanapāla and Paṇḍita Lakṣmīdhara—both of whom have composed a metrical compendium each based on the TM.

The question of the authorship being thus open, or doubtful, this work is taken only as being "ascribed to" Padmasāgara by us for the present.

---

43. cf. *TMKU.*, verse No. 1 cd :
"*Kurve tikakamañjaryāḥ kathoddhāraṁ prayatnataḥ*/".

44. see supra ft. nt. 4.

V: *Comparative Estimate :*

The author of the TMKU clearly mentions that he intends to take pains to rescue, or repair, the story of the TM rather than merely summarise it faithfully. In contrast to the attempt by Pallīpāla Dhanapāla who tried to summarise the prose-romance with a view to bring out, and preserve, the literary fragrance of its story-element, the author of the TMKU has tried to compose an independent and elaborate metrical work which, though primarily based on the story of the TM, does not invaribly fetter itself to the original in toto; he has added profusely, not only his own imageries, but also many new ingredients in the story—ingredients totally unwarranted so far as the original prose-romance is concerned.

The following are the principal additions introduced by the author of the TMKU :

(1) The good omens, like the trumpeting of an elephant and the dance of the pet peacock, indicating the impending arrival of the Vidyādhara Muni.[45]

(2) A speech by the queen Madirāvatī, as reported by King Meghavāhana to the Vidyādhara Muni.[46]

(3) The descent of the goddess Śrī in her image installed by King Meghavāhana.[47]

(4) The reason put forth by the god Jvalanaprabha at the time of presenting his necklace to King Meghavāhana.[48]

(5) Meghavāhana's address to the goddess Śrī at the time of presenting the necklace at the feet of her image.[49]

---

45. cf. *TMKU.*, 33-34 :
" *Tadā dakṣinatas tene gala-garji-gajāgraṇiḥ/*
*Nanṛte tena nādena puraḥ keli-kalāpinā//*
*Pramodayan nimittānumodanena priyāṁ nṛpaḥ/*
*siddhim manorathasyeva saudhāgram adhirūḍhavān//*

46. *Ibid.*, 69 :
" *Śūkarī paṅka-liptā 'pi putrair anugatā varam/*
*Na tvaham rājya-linā 'pi svāmin suta-vinā-kṛtā//* "

47. *Ibid.*, 99 :
" *Tasminn avatatārāśu śrīḥ svayam devatālaye/*
*Kalayevāviśat padma-hradāntaḥ-padma-sadmani //* "

48. *Ibid.*, 136 :
" *Na yuktaḥ śūnya-hastasya mānyaih prathama-saṅgamaḥ/*
*enam vyasana-samhāraṁ hāram rājan gṛhāṇa tat//* "

49. *Ibid.*, 150 :
" *Devi tvat-sevana-taror atulyasya phaliṣyataḥ/*
*Puṣpodgama ivādarśi mayā hāraḥ prabhāva-bhāk//* "

(6) The intervention of the "*Japa*" between the presentation of the necklace and the appearance of Vetāla.[50]

(7) Vetāla is said to have appeared between the king and the image of the goddess.[51]

(8) Vetāla's rashness in his address to the king.[52]

(9) Vetāla's reason for offering his scissors to the king.[53]

(10) The puzzled goddess Śrī invoking the help of another goddess Bhāratī, who whispers some advice into her ear, and Śrī makes the king's hands free in order that he may finish his unfinished task of severing his head off his own trunk.[54]

(11) The king cuts off his head completely and the headless trunk dances before the goddess. Then the goddess Bhāratī restores the head again to the body so that the king is resurrected.[55]

(12) The boon of a son is bestowed by the goddess Bhāratī and not by Śrī, who requests the king to pray to the former.[56]

50. *Ibid.*, 153 cd :
"*Mantra-jāpa-layaṁ prāpa tataḥ kṣmāpa-śiromaṇiḥ//*"

51. *Ibid.*, 156 :
"*Tataḥ śrī-pratimā-rūpa-dṛg-antar-vartma-bhittitām/*
*Jhag-ity agacchad vetālaḥ kaścid bhāla-dhutā'mbaraḥ//*"

52. *Ibid.*, 166 cd :
"*Ayi mūḍha samārūḍha-mahimānaṁ na vetsi mām//*"

53. *Ibid.*, 179 :
"*Tad gṛhāṇa mahī-bhartaḥ karttariṁ mama niḥsahām/*
*Svāmi-droham asau divyo na kariṣyaty asis tava//*"

54. *Ibid.*, 213-215 :
"*Tadā lakṣmīr amande 'smin sandehe patitā satī/*
*Kiṁ-kāryatva-jaḍā sadyo hṛdā sasmāra bhāratīm//*
*Tatas tribhuvanādhīśair dhī-kṛte sevitā-'bhitaḥ/*
*Pratyakṣībhūya vāg-devī kiṁcid guptam śriye 'diśat//*
*Athā'bhyadhātta bhū-nāthaṁ śrīr asau vīra samprati/*
*tvat-khaḍgo 'yaṁ hata-stambho yathābhīṣṭam vidhīyatām//*"

55. *Ibid.*, 216-220 :
"*Ityukti sama-kālam sa svaṁ śiras taravāriṇā/*
*Chitvā gṛhānedam idaṁ kṣiptvā 'rthinaṁ prati//*
*Drāg utthāyā'kṣi-vikṣepa-bhṛbhaṅgādi mukhe sṛjan/*
*Śriyo 'gre cāru-vārībhiḥ kabandhena mudā 'naṭat//*
*Na yāti jīvitaṁ yāvat tāval lakṣmīḥ svam rayāt/*
*Dharādharasya mūrdhānaṁ kabandha-skandhagaṁ vyadhāt//*
*Kamaṇḍalu-jalenaivam amṛta-paripanthinā/*
*Vāg-devī tac-śiro 'siñcad avraṇaṁ ca babhūva tat//*
*Śiraś-chedocchalad-rakta-saṅgam angam ilā-pateḥ/*
*Svayam akṣālayal lakṣmīr vāg-vikṣepas tv ayaṁ payaḥ//*"

56. *Ibid.*, 225-226 :
"*Ahaṁ trailokya-vastūni teṣām eṣā tu jīvitam/*
*Vāg-devī jagatāṁ devī vandasvemāṁ mudā nṛpa//*

(13) A picturesque description of Vajrāyudha resting in his military camp before the night-attack.[57]

(14) The speech by Vajrāyudha justifying why Vijayavega suddenly remembered the Bālāruṇa ring, in the din of the battle.[58]

(15) Gandharvaka's anxiety to do, rather than excuse for not doing there and then, a portrait of Harivāhana inspite of his other engagements.[59]

(16) The hymns, addressed to the Love-god, sung by couples, when Malayasundarī goes to the temple.[60]

---

*Atha bhūpo 'namad vāṇīm vāṇi cā'śiṣam abravīt/*
*Bhaviṣyati bhavat-sūnur anūna-jñāna-dhir iti//"*

57. *Ibid.*, 322-326 :
"*Athā'naṅga-tithau naktaṁ muktad-rākāra-vigrahaḥ/*
*Gṛha-prahita-niḥśeṣa-mitra-mantri-viśaradaḥ//*
*Eka-dvi-gāyana-yuto dvi-tri-vaihāsikā'vṛtaḥ/*
*Sukhī tri-catura-ślāghā-catura pañcaṣānugaḥ//*
*Suptaḥ pārśvena pārśvastha-puṣpa-prakara-tārake/*
*Śaśīva śarad-ambhode talpe tārottara-cchade//*
*Candana-syandi-digdhāṅgaḥ puṣpa-srag-bhaṅga-bhāsurāḥ/*
*Vasāno vāsasī tanūkṛtendu-mahasī iva//*
*Ūrdhva-prakoṣṭha-pāṇistha-mūrdhā vajrāyudhas tadā/*
*Sthito 'naṅgārcanā-rangad-aṅganā-datta-dṛg mudā//*

58. *Ibid.*, 370-373 :
"*Arere 'tiprasakto 'si paśya mām eṣa te balam/*
*Bālāruṇa iva dhvāntaṁ raṁhasā saṁharāmy adaḥ//*
*Arere kiṅkarās Cakraṁ paramāstraṁ samarpyatām//*
*Iti bruvaṁs ca cakre 'sāu paścāt pāṇiṁ calāgulim//*
*Tayā bālāruṇoktyā 'tha sañjāta-smaraṇas tadā/*
*Ahaṁ saharṣah sotkarṣa-roma-harṣocca-kañcukaḥ//*
*Bālāruṇā'ṅgulīyam tat samādāya samudgakāt/*
*Kṣiptavān asmi taṁ pāṇim tam dhṛtvā 'ṅguli-pallave//"*

59. *Ibid.*, 731 :
"*Mayā kārya-viśeṣeṇa vyākulenā'pi samprati/*
*Tvad-rūpa-likhane hetuḥ saṁkṣepāt kathyate śṛṇu//*

60. *Ibid.*, 1262-1268 :
"*Malayānila-kallola-lola-śoṇa-dhvaja-cchalāt/*
*Antar-jayaj-janam-nūnaṁ yad anādeśa-kāriṇam//*
*Yad vidrumaruṇam bheje rāgvanti jagantyapi/*
*Cikīrṣor iva puṣpeṣor milito dalikotkaraḥ/*
*Anyeṣāṁ dyusadaṁ voḍhum eko 'pyājñāṁ pragalbhate/*
*Garīyasī smarājñā te yugalair eva yohyate//*
*Śakra-cakribhir ārādhyam śāsanam te virādhyatām/*
*Kāma pākhaṇḍināṁ jātaṁ phalaṁ bhikṣā-viḍambanā//*
*Manāṁsi yamināṁ vajra-kaṭhorāṇi sumeṣubhiḥ/*
*Anaṅga bhindann anyeṣām resāṁ bhintse bhujābhṛtām//*

(17) Gandharvadattā is referred to as the younger sister of Patralekhā, rather than of Citralekhā.[61]

(18) Both the heroes along with their brides—the heroines—take the vows of Jainism, travel on foot to visit holy shrines, and at the end undertake difficult penances.[62]

The author of the TMKU shows the poetic ability of a higher order as compared to that of Paṇḍita Lakṣmīdhara, the author of the TMKS, and that of Pallīpāla Dhanapāla, the author of the TMS. The following specimens would bear this point out :

( i ) The description of Ayodhyā :

अस्त्ययोध्यापुरी शुभ्रसौधपद्धतिभिर्यया ।
सौन्दर्यनिर्जिता नित्यं माहेन्द्रीपूर्विहस्यते ॥ —*TMKS*, 6.

अस्त्ययोध्यापुरी रम्या या शौर्याक्रिष्टचेतसा ।
ईक्ष्वाकूणां महेन्द्रेण वितीर्णेवामरावती ॥ —*TMS*, I, 7.

दधती चक्रवर्तित्वं भूर्भुवःस्वःपुरालिषु ।
अयोध्येति पुरी तत्र साधुचक्रेण युज्यते ॥

उत्क्षिप्तस्वर्गनगराऽधःकृतोरगपत्तना ।
गृहीतदिक्त्वदिक्पाला पुरी यास्ति पुराज्ञया ॥

याऽऽप्तस्वर्गकला मुक्तिकलामाप्तुमिवानिशम् ।
परिखाम्बुनि बिम्बेन न्यग्मुखी तप्यते तपः ॥

धर्मः स्वर्गप्रदः स्वर्गाधिकर्द्धौ यत्र वासिभिः ।
उद्धृतः कलिपङ्कात् कां करोतु प्रत्युपक्रियाम् ॥

तन्वन् कलापं नानाश्मवेश्मरुग् मण्डलच्छलात् ।
यस्यां घनोदयप्रीत्या नृत्यन्ति न्यायबर्हिणः ॥

---

*Sāraṁ smara bhavad-rūpam iti te kiyati stutiḥ/*
*Sāraṁ paśyanti saṁsāram api sarvaṁ tvayā 'ṅginaḥ//*
*Sthāna-sthānā-gatair evam yugmaih śṛṅgāra-hāribhiḥ//*
*Stūyamānaṁ pūjyamānaṁ sevyamānaṁ ca sarvataḥ/* "

61. *Ibid.*, 1446 ab :

" *Tava gandharvadatteti svasā devī laghiyasī/* "—This is addresed by Citralekhā to Patralekhā.

62. *Ibid.*, 1990-91, 93 ab :

" *Devyā tilakamañjaryā tathā samaraketunā/*
*Samaṁ malayasundaryā sā' 'dade sa vrataṁ guroḥ//*
*Vijahrus te pada-nyāsaiḥ prakurvāṇā vasundharām/*
*Kamalāyā vilāsāya sthala-padmavatīṁ iva//*
*Duṣkareṇārjayāmāsuḥ sukṛtaṁ caraṇena te/* "

जाह्नवीसरयूरङ्गत्तरङ्गध्वनिसङ्गमः ।
नृत्यन्त्या यत्र पावित्र्यश्रियः श्रयति तालताम् ॥ —*TMKU*, 13-18.

(ii) King Meghavāhana reveals the cause of the anxiety of his wife queen Madiravatī and himself:

कायविच्छायताहेतुरेकैव निरपत्यता ॥
एषैव कुरुते गाढमस्या अपि तनुं तनुम् ॥ *TMKS*, 20*cd*-21*ab*.

इयं च प्रेमपात्रं मे कलत्रं मदिरावती ।
मुक्त्वाऽनपत्यतामेकां न किञ्चित् खेदकारणम् ॥ —*TMS*, I, 21.

दम्पत्योः प्रेमसर्वस्वं मातुर्मदरसोदयः ।
पितुः कुलप्रदीपश्च भगवन्नास्ति नौ सुतः ॥
पुत्रहीना न भाति स्त्री भूरिभूषणभागपि ।
उदारतारताराऽपि द्यौरिवेन्दुविवर्जिता ॥
शरीरमिन्द्रियग्रामो विभूतिर्जन्म जीवितम् ।
पुंसोऽपि सर्वमफलं पुत्राननमपश्यतः ॥
तदिति ध्यानदुःखाग्निः कामं मनसि नो ज्वलन् ।
न शाम्यत्यपि राज्यश्रीदृष्टिपीयूषवृष्टिभिः ॥ —*TMKU*, 64-67.

(iii) The speech of Vetāla addressed to King Meghavāhana:

सोऽवोचत् न किमप्यन्यत् त्वदीयैव नृप क्रिया ।
यदत्र मामतिक्रम्य प्रारब्धाऽऽराधना श्रियः ॥
अहं हि सविधस्थायी नित्यमस्याः सदोऽग्रणीः ।
मयि क्लृप्तोपचाराणां फलन्तीहितसिद्धयः ॥ —*TMKS*, 71-72.

सोऽप्याख्यन्न किमप्यन्यत् तवैवाराधनाविधिः ।
मामतिक्रम्य यद् देवीं प्रसादयितुमिच्छसि ॥
अहं हि सततासेवी देव्याः परिजनाग्रणीः ।
मयि लृप्तीकृते मुग्ध सिध्यतीह समीहितम् ॥ —*TMS*, I, 74-75.

अथाननोच्छलज्ज्वाला स्फुलिङ्गालिङ्गितोऽग्रया ।
दहन्निव दिवं वाचा व्याचष्टासौ निशाचरः ॥
अयि मूढ समारूढमहिमानं न वेत्सि माम् ।
श्रीदेव्यनुचरं रात्रिचरं नाम्ना महोदरम् ॥
श्रियोऽहं परिवारत्वान्न पूर्वं पूजितस्त्वया ।
अत एतन्मुखालोकविघ्ननिघ्नीभवामि ते ॥ —*TMKU*, 165-167.

(iv) King Meghavāhana's dream :

निशाशेषेऽथ सोऽपश्यत् स्वप्ने स्तन्यं सुरद्विपम् ।
पिबन्तं मदिरावत्या गौर्या इव गणाधिपम् ॥ —*TMKS*, 123.

निशान्तसमये देव्याः स्तन्यमैरावतः पिबन् ।
स्वप्नेऽम्बिकाया हेरम्ब इवादृश्यत भूभृता ॥ —*TMS*, II, 26.

उदारसारशृङ्गारमिन्दुसुन्दरदीधितम् ॥
अवतीर्णं दिवः स्वैरमैरावणमिभप्रभुम् ॥

स्वपाणिधृतयोः स्वर्णमयमङ्गलकुम्भयोः ।
आपिबन्तं पयः स्वप्ने ददर्श मदिरावती ॥ —*TMKU*, 264-265.

It is to be noted here that in the TMKU the dream appears to the queen, rather than to the king, as is the case in the original work, as well as in the compendiums of Paṇḍita Lakṣmīdhara and Pallīpāla Dhanapāla.

(v) The description of Tāraka, the Sailor-Chief :

नीलाम्बुजदलश्यामं वसानं वाससी सिते ।
मालतीरचितापीडं पारलौष्ठपुरच्छविम् ॥

वल्गन्मुक्तालताकान्तं सचन्दनललाटिकम् ।
अपश्यं धीवरव्रातैर्वृतं तरुणनाविकम् ॥ —*TMKS*, 262-263.

कृताकृतं च तत्रस्थो यावन्नावां विभावये ।
तावन्नाविकमद्राक्षमायान्तं धीवरावृतम् ॥ —*TMS*, III, 27.

इन्द्रनीलच्छविच्छायं मूर्त्यन्तरमिवाम्बुधेः ।
दधानं वदनेनेन्दुमिवाश्रित पितृश्रियम् ॥

दधानं चन्दनस्यन्दलेखामलिकमालिनीम् ।
तरीमिव जनस्याक्ष्णां लावण्याम्बुनिमज्जताम् ॥

दधतं मूर्धजान् मूर्ध्नि मालतीप्रसवानपि ।
श्यामाश्यामतया क्लृप्तपरभागान् परस्परम् ॥

दधानमधरं शोणमपि ताम्बूलरञ्जितम् ।
श्यामदेहप्रभाम्भोधाविव विद्रुमकन्दलम् ॥

ग्रैवेयकेन सुव्यक्तानेकमौक्तिकपङ्क्तिना ।
भ्राजमानमतिश्याममम्भोधिमिव सेतुना ॥

दधानं हृदये हारं प्राकारं हृद्गुणावलेः ।
फेनपुञ्जमिवासक्तमम्भोधितरणक्षणे ॥

सर्वाङ्गावयवासक्तमुक्ताफलविभूषणम् ।
सर्वत्रपुष्पितं जात्यजातिद्रुमिव जङ्गमम् ॥

वसानमनुकूलानि दुकूलानि सिताननम् ।
शरदभ्रवितानानि नभोदेशमिवामलम् ॥
विवर्तैरिव पापस्य कैवर्तैः परिवारितम् ।
बालतालमिवानेकबिभीतकवनोद्गतम् ॥
कार्यं कृताकृतं वीक्ष्य पोतिकानामुपेयुषः ।
वेत्रिणाऽऽहूतमायान्तं नाविकं दृष्टवानहम् ॥ —*TMKU*, 525-534.

Some of the poetic imageries of the author of the ***TMKU*** are highly original and striking, as for instance :

सर्वर्द्धिसुखसंलब्धिसुधाब्धिश्रितयोस्तयोः ।
क्लेशावेशोऽभवत् पुत्रानुत्पत्तिविषबिन्दुना ॥ —*TMKU*, 30;

अथेन्दुशुभ्रे मन्दः स सौधमूर्ध्नि पदं ददौ ।
अमन्दं तु मुदामोदो हृदये मेदिनीशितुः ॥ —*TMKU*, 48.

इत्युदञ्चितरोमाञ्चमालपन्तं पतिं भुवः ।
सुधोर्मिस्वादवित्कर्णं चकार वचनैर्मुनिः ॥ —*TMKU*, 56.

यद्यसौ तादृगेवास्ति तर्हि तुष्टेन वेधसा ।
जगत्त्रितयनेत्राणां सूत्रिताऽमृतपारणा ॥ —*TMKU*, 79.

वशेन्द्रियः प्रियः क्ष्मायाः क्षमायाः पात्रतां गतः ।
मुनिदिष्टेन विधिना श्रीदेव्याराधनं व्यधात् ॥ —*TMKU*, 101.

In some of the cases where the problem of adopting the verses of the original work arises, the author of the TMKU has not come up to the level of Pallīpāla Dhanapāla's lucidity and sense of propriety in expression, as in the following comparable instances :

(1) The fine *Āryā* verse, viz.,

गुरुभिरदत्तां वोढुं वाञ्छन् मामक्रमात् त्वमचिरेण ।
स्थातासि पत्रपादपगहने तत्रान्तिकस्थाग्निः ॥[63]

of the TM has been adapted by the author of the TMKU as—

अदत्तां गुरुभिर्वोढुं वाञ्छंस्त्वमचिरेणतः ।
गन्तासि वृक्षगहने तत्र पार्श्वस्थितानलः ॥[64]

where the omission of the important word "*Akramāt*", and the replacement of the words "*Patra-pādapa*" and "*Sthātāsi*" of the original by "*Vṛkṣa*" and "*Gantāsi*" respectively, detract much of the beauty of the original. It is significant that the authors of both the TMKS and the TMS respectively have preferred to incorporate such verses without the slightest change.

63. cf. *TM* (*N*), p. 109 (12 ff.).
64. cf. *TMKU*, 480.

(2) A beautiful hymn to Jina Ṛṣabha—

शुष्कशिखरिणि कल्पशाखीव निधिरधनग्राम इव ।
कमलषण्ड इव मारवेऽध्वनि भवभीमारण्य इह ।
वीक्षितोऽसि मुनिनाथ कथमपि ॥ etc.,[65]

of the original has been marred in the adaptation in the TMKU as—

भर्तश्चिन्तामणिः पाणिं कल्पद्रुमे गृहाङ्गणम् ।
कामधुग्वेश्मनो मध्यमध्यास्तेऽद्य त्वदीक्षणात् ॥
निःशेषसुखकन्दानाममन्दानां कुकर्मणाम् ।
स्थानं संसारकान्तारमतीतोऽद्य त्वदीक्षणात् ॥[66]

which cannot stand comparison with the beautifully lucid, though simple, adaptation by Pallīpāla Dhanapāla in his TMS as—

तुष्टावाथ जगन्नाथ संसारक्षारवारिधौ ।
ऋते त्वद्दर्शनादन्यदमृतं नामृतप्रदम् ।
अस्मादेव यतो देव सङ्कल्पितफलप्रदः ।
पुण्यकल्पद्रुमः प्राणिसन्दोहस्य प्ररोहति ॥[67]

Even this is only tolerable, since it would have been better if both of them had chosen to keep the original intact, as has been done by Lakṣmīdhara :

(3) A fine suggestive *Āryā* verse—

तव राजहंस हंसीदर्शनमुदितस्य विस्मृतो नूनम् ।
सरसिजवनप्रवेशः समयेऽपि विलम्बसे येन ॥[68]

of the original hass been totally replaced in the TMKU as—

उत्फुल्लाननपद्मायां पद्मिन्यां स्नेहवानपि ।
भानुः सकलकार्याणां समयं न विलङ्घते ॥[69]

which not only omits the suggestive reference to the recent attainment of the Vidyādhara kingdom by Harivāhana who has only just come to see Tilakamañjarī, but also spoils the polite, though direct reminder about "getting late", by replacing it with a rather rash, though indirect, reminder about "negligence of proper time". It is only a slight difference of degree and emphasis; but it does exhibit a huge difference in poetic approach, when one keeps in view the fact that Harivāhana was then not a mere human king, but was an emperor (*Cakravartin*) of the whole of the northern range of the Vidyādhara mountain.

---

65. cf., *TM* (*N*), p. 218 (9 ff.).
66. cf., *TMKU*, 946-47.
67. cf., *TMS*, IV, 89-90.
68. cf., *TM* (*N*), p. 232 (11 ff.).
69. cf., *TMRU*, 991.

It is again significant that both Lakṣmīdhara and Pallīpāla Dhanapāla have preferred to adopt the original in the body of their respective texts, rather than try to mishandle, omit, or replace it.

As a result of the above changes introduced by the author of the TMKU, and his peculiar approach to the story of the TM, some damage has also been done to the story and the characterisation of the original, as summarised here. Thus:

( 1 ) The goddess Śrī is here degraded to a second place in so far as even she stands in need of advice from the goddess Bhāratī at the critical moments, and it is the latter who whispers to Śrī the advice, evidently to free the benumbed hand of king Meghavāhana leaving him free to do whatever he likes. Again, after the king has completely cut off his head, the goddess Śrī only puts the head on the trunk, but she does not have the power to join it. It is, again, the goddess Bhāratī who accomplishes the wonderful feat by merely sprinkling the water, and the king is resurrected.[70] Clearly it is the predilection of the author of the TMKU to Bhāratī that has led him to introduce one more goddess and play down the role of the one in the original.

( 2 ) The character of Vetāla suffers slightly due to an element of rudeness in his speech, while in the original he is quite courteous.[71]

( 3 ) The character of king Meghavāhana has also suffered to some extent though the author of the TMKU might have intended to elevate it to the level of a rashly heroic Rajput devotee — in so far as his satirical dialogue with Vetāla is totally omitted and the king is first martyrized and then resurrected.[72]

( 4 ) The character of queen Madirāvatī is also tempered with, but to no advantage ; she is rather degraded by ascribing to her a speech — as reported by the king to the Vidyādhra Muni — wherein she compares herself unfavourably with a she-boar.[73]

( 5 ) The tastefully mild and catholic religious background of Jainism as found in the original is here covered with an explicitly gaudy and thick coating of the dogmatic Jainistic colouring both at the beginning,[74] as well as at the end,[75] of this compendium by way of propounding the essence of the religious truths supposedly sought to be exemplified in the story of the TM in the opinion of the author of the TMKU.

70. see Supra., *TMKU*, 213-226.

71. see Supra, *TMKU*, 166; 179-180, as compared to *TM*(*N*), p. 49 (8 ff) :
"*Rājan kincid anyat tvadīyam eva ceṣṭitam*|"

72. see Supra., *TMKU*, 168.

73. see Supra., *TMKU*, 69.

74. *Ibid.*, 2-7.

75. *Ibid.*, 1979, 1983-87, 1995.

Moreover, the author of the TMKU seems to have been more anxious to devote more space to the elaborate descriptions, as for instance, of Ayodhyā, king Meghavāhana, queen Madirāvatī, the Vidyādhara Muni, Vetāla, and so on, rather than to preserve in tact the important points of the story proper. Sometimes he allowed himself the careless liberty to fail to preserve even the correct nomenclature of a place like Manipura, and of a character like Priyadarsana.[76]

The grasp of the finer points of the story on the part of the author of the TMKU is not as thorough as that of Pallīpāla Dhanapāla, who could locate, and carefully tie up, a couple of loose ends found in the original prose-romance of Dhanapāla.[77] While our author has slightly touched one of them, he does not seem to have noticed the other one.

The author of the TMKU has full command over his *Anuṣṭubh,* the only metre he has utilised for his purpose. His imageries are boundless and refreshingly original, most of them being the product of the author of the compendium, rather than being borrowed from the original prose-romance. Unlike Pallīpāla Dhanapāla who adopts a few current Apabhraṁśa usages,[78] our author sticks to the pure classical idiom. Though less concentious and artistic in faithfully epitomising the story element of the original prose-romance in comparison to the similar attempt by the author of the TMS, our work remains by far a good illustration of dexterous poetic attempt at rejuvenating and recreating an old classical story.

Indira Gandhi National
Centre for the Arts

---

76. *Ibid.*, 8-12; 13-23; 24-29; 38-45; 156-162 etc.; 'Manupura' is referred to as 'Manimandira', and 'Priyadarsana' as 'Sudarsana'.

77. cf., *TMS,* Intro., p. 25,

78. *Ibid.*, Appendix B.

पण्डितश्रीपद्मसागरप्रणीतः (?)

# ॥ तिलकमञ्जरीकथोद्धारः ॥

ॐ नमः सिद्धम् ।[1]

नमस्कृत्य जिनं वीरं सुरासुरनरार्चितम् ।
कुर्वे तिलकमञ्जर्याः कथोद्धारं प्रयत्नतः ॥ १ ॥
मिथ्यात्वाविरतियोगा[2] दुःकषायाः[3] प्रमत्तयः ।
पञ्चामी भवसामाज्यमहामुद्राधिकारिणः ॥ २ ॥
पूर्वापरार्थसंवादं सत्यहेतुं[4] विदन्नपि ।
मिथ्यात्वेन जनः कुर्याद् धर्मे गजनिमीलिकाम् ॥ ३ ॥
पुण्यकर्मापि सावद्यं मिथ्यात्वं कारयञ्जनान् ।
निर्दयस्तमपि[5] भवाद् रक्षन्नैव कथं रिपुः ॥ ४ ॥
मिथ्यादृक्तपसः शैलतरोरिव गुरोरपि ।
अन्ते दर्शितवैरस्यं स्वल्पमेव भवेत्फलम् ॥ ५ ॥
तत्त्वं देवादिमिथ्यादृक् पश्यन्नप्यन्यथेक्षते ।
यथा तैमिरिको दीपं परिवेषविशेषितम् ॥ ६ ॥
जन्तुर्मथितमिथ्यात्वः सम्यग्दर्शनभूषणः ।
अचिरान्मुक्तिमाप्नोति हरिवाहनराजवत् ॥ ७ ॥
जम्बुद्वीपभुवो भालभूते[6] भारतवर्ष्मणि ।
रत्नचित्रद्युतिं देशो[7] दिशत्युत्तरकोशलः ॥ ८ ॥
यस्मिन् मरन्दधाराभिरालवालाभिपूरिणः ।
न मेघमुक्षमीक्षन्ते महीयांसो[8] महीरुहः ॥ ९ ॥
द्यौर्येन जिग्ये[9] शैलेन्दुग्रावामृतनदीप्लुतैः ।
जितकल्पद्रुभिः शस्यैरप्रार्थितसदाफलैः ॥ १० ॥

---

1. P Folio 1 is missing; the text begins with °तापः पावको नवः ।। etc. of vs. 20 wrongly numbered as 19 in the MS. B Folio 1 is missing; the text begins with °प्रीत्या नृत्यन्ति न्यायबर्हिणः ।। etc. of vs. 17 wrongly numbered as 16 in the MS. 2. NK °विरती. 3. दुःकथाया°. 4. K संत्य°. 5. NK °स्तनपि. 6. नाल°. 7. K देशा. 8 K नहीयांसो. 9. K जिग्यै.

मूर्ति सुरेभ्यः सम्भुक्त्यै दत्वैकां सुकृतैरभूत् ।
कोटिमूर्तिरिव स्वर्गो यत्पुरीपटलच्छलात्[1] ॥ ११ ॥
धर्मक्षेत्रे स्वयं यत्र जाने जानपदच्छलात्[2] ।
सुराश्चरन्ति धर्माय त्रुटद्धर्मा द्युभोगतः ॥ १२ ॥
दधती चक्रवर्तित्वं भूर्भुवःस्वःपुरालिषु ।
अयोध्येति पुरी तत्र साधुचक्रेण युज्यते ॥ १३ ॥
उत्क्षिप्तस्वर्गनगराधःकृतोरगपत्तना ।
गृहीतदिक्स्वदिक्पाला पुरी याऽस्ति पुरांजया[3] ॥ १४ ॥
याऽऽप्तस्वर्गकला मुक्तिकलामाप्तुमिवानिशम् ।
परिखाम्बुनि[4] बिम्बेन न्यग्मुखी तप्यते तपः ॥ १५ ॥
धर्मः स्वर्गप्रदः स्वर्गाधिकर्द्धौ यत्र वासिभिः ।
उध्दृतः कलिपङ्कात् कां करोतु प्रत्युपक्रियाम् ॥ १६ ॥
तन्वन् कलापं[5] नानाश्मवेश्मरुग्मण्डलच्छलात् ।
यस्यां वनोदयप्रीत्या नृत्यन्ति न्यायबर्हिणः ॥ १७ ।[6]
जाह्नवीसरयूरङ्गत्तरङ्गध्वनिसङ्गमः ।
नृत्यन्त्या यत्र पावित्र्यश्रियः श्रयति तालताम् ॥ १८ ॥
सेवकैरनिमेषाक्षैर्वीक्ष्यमाणमुखाम्बुजः ।
तस्यामभून् महीमेघवाहनो[7] मेघवाहनः ॥ १९ ॥
आश्रिते शिशिरव्यक्तिस्तीव्रशक्तिरनाश्रिते ।
श्रितनिर्मलवर्त्मा यत्प्रतापः पावको नवः ॥ २० ॥
यदयोगार्तविश्वस्त्रीहृताम्भोरुहि[8] विष्टपे ।
विधौ विधूते यत्कीर्त्या यन्मुखं शिश्रिये श्रिया ॥ २१ ॥
यद् वस्वाभिस्तृणीचक्रे युधेति यदसिर्यमः ।
द्विषोऽमुञ्चन् मुखक्षिप्ततृणान् ग्रासगतानपि ॥ २२ ॥
गुणानां च गणानां च केलिवापीकलां दधुः ।
रोमकूपा यदङ्गे तत्क्रीडाद्भ्रान्तप्रभाम्भसः ॥ २३ ॥[9]

---

1. N °छलात्. 2. N °छलाद. 3. NK पुरां जयो. 4. K परिबाशंबु. 5. कालापं. 6. All the Mss., 1 NPBK, have through mistake given No. 16 to the vs. 17, and the mistake is carried on till the end of the work. 7. NK drop °मेघवाहनो. 8. K °दूता°; P °हृता°. 9. P omits No. 23 of the vs. and adds the letters ॥ २३ । पृ ३२ ॥ in the margin.

रूपाधिष्ठानदेवी च महादेवी महीपतेः ।
तस्याभून् मदनोन्मादमदिरा[1] मदिरावती ॥ २४ ॥
रूपश्रीवशितस्यापि कामे कान्तस्य लीनया ।
यया हृदि महासत्या न स्मरोऽपि स्म रोप्यते ॥ २५ ॥
असूर्यंपश्यया सूर्यः स्पष्टं दृष्टोऽपि नो यया ।
असाध्यमब्धिझम्पानामपि तापमवाप सः ॥ २६ ॥
मग्ने शरीरशोभासु मणिमण्डलमण्डने ।
स्वममन्यत[2] या शीलरत्नेनैव विभूषितम् ॥ २७ ॥
तया गुणैश्च भक्त्या च रूपेण च हृतं मनः ।
कथञ्चन नियुङ्क्ते स्म राजकार्येऽपि भूपतिः ॥ २८ ॥
अस्तेऽरितेजस्तपने जाते कीर्तिविधूदये ।
तया सह महीजानिर्धन्यंमन्योऽन्वभूत् सुखम् ॥ २९ ॥
सर्वर्द्धिसुखसंलब्धिसुधाब्धिश्रितयोस्तयोः ।
क्लेशावेशोऽभवत् पुत्रानुत्पत्तिविषबिन्दुना ॥ ३० ॥
राज्यश्रीसरसीकेलिहंसायां कुमुदस्तयोः ।
जायतां[3] सूनुवदनाम्भोजं हसदपश्यतोः ॥ ३१ ॥
प्रासादं भद्रशालाख्यं विशालाक्ष्या समं नृपः ।
आर्तश्चित्रविनोदाय कदाप्यारोढुमुद्यतः ॥ ३२ ॥
तदा दक्षिणतस्तेन गलगर्जि[4]गजाग्रणीः ।
ननृते तेन नादेन पुरः केलिकलापिना ॥ ३३ ॥
प्रमोदयन्निमित्तानुमोदनेन प्रियां नृपः ।
सिद्धिं मनोरथस्येव सौधाग्रमधिरूढवान् ॥ ३४ ॥
श्रितभद्रासने राज्ञि स्मेरस्वल्पपरिच्छदे ।
किं फलं शाकुनस्येह स्यादित्यालपति प्रियाम् ॥ ३५ ॥
तमसीव तडित्तेजः किञ्चिदाकस्मिकं तदा ।
उत्प्रभायां मणिस्तम्भैः सभायां समभून् महः ॥ ३६ ॥
किमेतदिति तत्तेजोनिदानज्ञानधीर्नृपः ।
चकार सपरीवारो दृग्भिरब्जमयं वियत् ॥ ३७ ॥

---

1. NK drop °मदिरा. 2. K °मन्वंत. 3. NK जायता. 4. P °गंजा°; NK °गर्जि°.

ततो विश्वत्रयीनेत्रसुकृतामृतशीतलैः ।
तीव्रांशोरंशुसम्पातैरिवोत्पादितविग्रहः ॥ ३८ ॥[1]
त्रैलोक्यजनसन्ताप[2]जननस्यानुतापतः ।
अङ्गीकृतव्रतो[3] लीलाजितात्मेव[4] मनोभवः ॥ ३९ ॥
तरङ्गशमदुग्धाब्धेरिवाभ्रंलिहतां गतः ।
दृशा पावयितुं विश्वमुच्चैर्धर्म इव स्थितः ॥ ४० ॥
दिशः सुरभयन् कीर्तिमुक्ताकुसुमसौरभैः ।
इतः क्ष्मासुकृतैः स्वर्गात् कल्पद्रुम इवोत्तरन् ॥ ४१ ॥
काममह्नाय[5] जीवालि[6]विराधनविशङ्कितः ।
इतश्चेतश्च जीमूतपूरं दूरेण वर्जयन् ॥ ४२ ॥
सूक्ष्मसूक्ष्मोत्पतत्पक्षिलक्षरक्षणदक्षिणः ।
मन्दं मन्दं परिचलन् भूमाविव नभस्यपि ॥ ४३ ॥
देहांशुलहरीलुप्तनिकामक्षामतागुणः ।
कृपाब्धिपङ्कजचक्षुरापतन् दक्षिणापथात् ॥ ४४ ॥
मन्त्रजापस्फुराद्वद्याधरो विद्याधरो मुनिः ।
तैरदर्शि दृशां भाग्यमभाग्यं दुरितावलेः ॥ ४५ ॥ कुलकम् ॥
ततः कृतार्थतां प्राप्त इव प्रीतिं परां वहन् ।
भद्रासनाद् भुवो भर्ताऽभ्युत्तस्थौ भासुराञ्जलिः ॥ ४६ ॥
अनुल्लङ्घ्येव[7] भक्तानां भक्तिः शमवतामिति ।
उत्ततārाम्बरान् मुक्तकायं तिरगतिर्यतिः ॥ ४७ ॥
अथेन्दुशुभ्रे मन्दः सः सौधमूर्ध्नि पदं ददौ ।
अमन्दं तु मुदामोदो हृदये मेदिनीशितुः ॥ ४८ ॥
वियोगतापोपनतक्षामव्योमानुकारिभिः[8] ।
ततः पादौ मुनीशस्य नृपः केशैरमार्जयत् ॥ ४९ ॥
परिच्छदोऽपि भूपस्य तापच्छेदाय तत्पदौ ।
ननाम तामरसवद् रसवद्भक्ति[9]भासुरः ॥ ५० ॥

---

1. P the 38 No. of this vs. is written in the margin. 2. NK drop °जनसन्ताप°. 3. BNK °वतो. 4. N °जितात्मेष; B जितात्मैव; K °जिनात्मेव 5. °ह्राय. 6. P जावालि° 7. N उल्लंघ्येव. 8. B The text beginning with °रिभिः etc., of vs. 496 onwards upto आरात्रि° of vs. 110 is lost, since the folios 3 and 4 are missing. 9. K तामरसचद्रसचद्भक्ति°.

स्वयं सज्जीकृते राज्ञा ततो हैमासने मुनिः ।
मार्जिते मदिरावल्या प्रदत्ताशीरुपाविशत् ॥ ५१ ॥
ततश्च भूपो भूपीठनिविष्टो विनयानतः ।
निजगाद सुधावादविधायिन्या मुनिं गिरा ॥ ५२ ॥
भगवन् भाग्यवान् सोऽपि यस्त्वां पश्यति दैवतः ।
यं पश्यसि प्रसन्नस्त्वं स पुनर्भाग्यवत्तमः ॥ ५३ ॥
मत्समः कोऽस्ति दृष्टत्वे त्वद्दृष्टो विष्टपेऽत्र तत् ।
अतोऽप्युत्कृष्टतामिच्छाम्यादेशं देहि किञ्चन ॥ ५४ ॥
आसमुद्रावनिप्राप्यमिदं राज्यमिदं वपुः ।
प्रभो नियुज्यतां स्वस्मिन् धर्म्ये कुत्रापि कर्मणि ॥ ५५ ॥
इत्युदञ्चितरोमाञ्चमालपन्तं पतिं भुवः ।
सुधोर्मिस्वादुवित्कर्णं चकार वचनैर्मुनिः ॥ ५६ ॥
ध्यानैकसाध्यधर्माणामस्माकं किं प्रयोजनम् ।
साध्यैकक्षात्रधर्मेण राज्येनाङ्गेन वा तव ॥ ५७ ॥
भवद्भक्तिगुणत्यक्ततीर्थयात्राप्रयोजनः ।
त्वामागतोऽस्मि कार्यं नो भक्तानुग्रहणं महत्[1] ॥ ५८ ॥
किङ्किणीरणनोद्भासिपताकारसनाञ्चलैः ।
प्रीतोऽस्मि गीतां त्वन्नीतिमाकर्ण्य गृहिणां गृहैः ॥ ५९ ॥
दम्पत्यो म्लानिमास्यं वां दिनान्ते चक्रयोरिव ।
आख्याति समदुःखत्वं यत्तु तन्मे मनोर्तिकृत् ॥ ६० ॥
तद् दुःखकारणाख्याने योग्योऽहमपि चेन्नृप[2] ।
तदाऽऽख्या भगवद्भक्त्या ममापि ममताऽभवत् ॥ ६१ ॥
ततः प्रपञ्चयामास स्मितोल्लासेन फेनिलाम् ।
वाचं वीचिमिवोर्वीशः स प्रमोदमहोदधिः ॥ ६२ ॥
अवधिज्ञानविन्यासविज्ञातत्रिजगद्गतेः ।
यमिनामधिनाथस्य किमकथ्यं तव प्रभोः ॥ ६३ ॥
दम्पत्योः प्रीतिसर्वस्वं मातुर्मदरसोदयः ।
पितुः कुलप्रदीपश्च भगवन् नास्ति नौ सुतः ॥ ६४ ॥

---

1. N हत्; K हरत्. 2. NPK °नृपः.

पुत्रहीना न भाति स्त्री भूरिभूषणभागपि ।
उदारतारतारापि द्यौरिवेन्दुविवर्जिता[1] ॥ ६५ ॥

शरीरमिन्द्रियग्रामो विभूतिर्जन्मजीवितम् ।
पुंसोऽपि सर्वमफलं पुत्राननमपश्यतः ॥ ६६ ॥

तदिति ध्यानदुःखाग्निः कामं मनसि[2] नो ज्वलन् ।
न शाम्यत्यपि राज्यश्रीदृष्टिपीयूष[3]वृष्टिभिः ॥ ६७ ॥

अनपत्यत्वदुःखोर्मिमग्नसर्वर्द्धिसम्मदा ।
तदद्य मां निशाशेषे कृशाङ्गीयमभाषत ॥ ६८ ॥

शूकरी पङ्कलिप्तापि पुत्रैरनुगता वरम् ।
न त्वहं[4] राज्यलीनापि स्वामिन् सुतविनाकृता ॥ ६९ ॥

अपि किङ्करकामिन्यो हसन्नन्दनहर्षिताः ।
हसन्त्यसञ्जातसुतां चक्रवर्तिवधूमपि ॥ ७० ॥

क्रीणीहि पुत्रपुण्यानि राज्यपुण्यैरपि प्रभो[5] ।
भुक्तं राज्यसुखं पुत्रसुखश्रीर्भुज्यतेऽधुना ॥ ७१ ॥

बाढमित्यालपन्तीयं[6] गण्डमण्डलमण्डनैः ।
अस्रैः[7] कज्जलसंमिश्रैर्निन्ये[8] वदनमिन्दुताम् ॥ ७२ ॥

तदा मदाननमपि श्रवदश्रुजलाविलम् ।
उद्यद्दुःखकलाकेलिधारागृहनिभं बभौ ॥ ७३ ॥

का मे गतिरिति व्यक्त[9]दुःखध्यानमये मयि ।
तदा मङ्गलपाठीति प्रातस्त्यं मङ्गलं जगौ ॥ ७४ ॥

भवद्विपदिव क्षीणा रात्रिरादित्यमण्डलम् ।
भवत्कुलमिवोदेति राजन् सेवस्व देवताः ॥ ७५ ॥

इत्युपश्रुतिवाचैव प्रीतः प्रीतामिमामहम् ।
इदं जगाद सञ्जातनन्दनोत्पत्तिनिश्चयः ॥ ७६ ॥

यथादिशसि देवि त्वं तद् गत्वा क्वापि कानने ।
पुत्रकल्पलतां कामप्याराध्याम्यद्य देवताम् ॥ ७७ ॥

यावत् फलत्यसौ तावत् सख्या राज्यश्रिया सह ।
सहस्व मद्वियोगाग्निं पुत्रायोगाग्निना समम् ॥ ७८ ॥

---

1. NK °विबर्जित. 2. K मनस्वि° 3. N °पियूव°. 4. K नन्वहं. 5. NK प्रभोः. 6. P °लपन्तायं. 7. NKP अश्रैः. 8. NKP सन्मिश्रैः. 9. P स्यक्त°; K °रित्यक्त°.

दुःखद्रुकन्दलोद्भेदजलदीकृतलोचना ।
इदं वदन्तमवदन्मामियं वामलोचना ॥ ७९ ॥
पुत्रायोगभिदे नाहं नाथ त्वद्विरहं सहे ।
असिपत्रतरुच्छायाम् आयात्यर्कभयेन[1] कः ॥ ८० ॥
अहमप्यागमिष्यामि सेवितुं देवतां वने[2] ।
नित्यं सज्जीकरिष्यामि पूजोपकरणानि वः ॥ ८१ ॥
इत्याग्रहवतीमेतां प्रवासायोग्यविग्रहाम् ।
क्षणान्तराद् बोधयितुं सौधेऽस्मिन्नहमागमम् ॥ ८२ ॥
आगच्छतोऽत्र यान्युच्चैरासन्[3] सुशकुनानि मे ।
भगवन् भवदालोकात् फलितं सद्य एव तैः ॥ ८३ ॥
बोधयन्तु भवन्तोऽपि तदिमां मन्दिर[4]स्थितौ ।
देवताराधनमतिः पुत्रीयन् याम्यहं वने ॥ ८४ ॥
अथ ध्यानक्षणस्तब्धः संलब्धज्ञानदीधितिः ।
विकस्वरमुखाम्भोजः संमेजे भारतीं यतिः ॥ ८५ ॥
अल्पैरेव दिनै राजन् राजद्रु[5]णगणद्युतिः ।
भवतो भुवनाम्भोजभानुमान् भविता सुतः ॥ ८६ ॥
स द्यामिव रविर्जैनं शासनं द्योतयिष्यति ।
तेनानल्पगुणं स्वल्पसावद्यं वच्मि किञ्चन ॥ ८७ ॥
समग्रभूमिभुग्वंशदेवतामेव तां पुनः ।
आराध्नुहि परां देवीमिन्दिरां मन्दिरे स्थितः ॥ ८८ ॥
स्वं च स्वजनवर्गं च मुग्धां[6] च प्रेयसीमिमाम् ।
मा क्लेशय वनं गत्वा देवतान्तरसेवया ॥ ८९ ॥
सज्जय श्रवणं क्षोणि[7]रक्षादक्षिण दक्षिणम् ।
विद्यां ददामि ते लक्ष्मीदेवताराधनोचिताम् ॥ ९० ॥
सत्कीर्तिजाह्नवीस्नानसदाशुचिरपि द्रुतम् ।
शुचीभूयाथ भूनाथस्तस्याजनि पुरो गुरोः ॥ ९१ ॥
तपःशुचिर्मुनीन्द्रोऽपि स विद्यामपराजिताम् ।
राज्ञे हृष्टाय हृष्टात्मा सरहस्यां रहस्यदात् ॥ ९२ ॥

---

1. NK °त्वक्कभियेन. 2. K वते. 3. NK यात्युच्चै°. 4. NPBK मंदर°. 5. NPK शाजद्°.
6. NK मुग्धं. 7. NK क्षोणे°.

अर्चन् फलैश्च रत्नैश्च[1] वासोभिश्चाद्भुतैस्ततः ।
नृपश्चक्रे मुनीन्द्रस्य क्रमौ कल्पद्रुमोपमौ ॥ ९३ ॥
अथेदृगर्चनचयानन्दितो वन्दितो मुनिः ।
राज्ञे सपरिवाराय दत्वाशीरुत्पपात खम् ॥ ९४ ॥
तत्र ज्ञानैकमार्तण्डे मुनौ स्थानान्तरं गते ।
आन्तरीणां दृशामन्धकारैः सदसि पस्फुरे ॥ ९५ ॥
अथ प्रथितमध्याह्नसन्ध्याविधिरिलाधवः ।
विचित्रं गुरुमन्त्रिभ्यो मुनिवृत्तान्तमभ्यधात् ॥ ९६ ॥
तूर्यं चाकारयल्लीलावने लीलाचलोपरि ।
अलब्धनायतं रत्नमयं श्रीदेवतालयम् ॥ ९७ ॥
महत्तरे मुहूर्तेऽथ महोत्साहमहाग्रहः ।
श्रीदेव्याः प्रतिमां तत्र प्रतिष्ठापयति स्म सः ॥ ९८ ॥
तस्मिन्नवततारा‍शु श्रीः[2] स्वयं देवतालये[3] ।
कलयेवाविशत् पद्महृदान्तः पद्मसद्मनि ॥ ९९ ॥
ततः केलिवनाकीर्णपर्णशालाकृतस्थितिः ।
मन्त्रीन्यस्तावनीभार[4]श्चतुर्थव्रतनिश्चलः ॥ १०० ॥
वशेन्द्रियः प्रियः क्ष्मायाः क्षमायाः पात्रतां गतः ।
मुनिदिष्टेन विधिना श्रीदेव्याराधनं व्यधात् ॥ १०१ ॥
कृती नित्यकृतप्रातःकृत्यं प्रचितशौचभाग् ।
वाससी विशदे धर्मद्रव्येणेव कृते वहन् ॥ १०२ ॥
अतृप्यन्नेकया[5] मूर्त्या देवीसेवनकर्मणि ।
रत्नप्रासाददेशौघबिम्बैः कृततनूशतः ॥ १०३ ॥
मूर्तेनेव स्वयशसा सलिलेन सुगन्धिना ।
स स्वयं स्नपयामास वासराभ्युदये श्रियम् ॥ १०४ ॥ विशेषकम् ॥
ततः कर्पूरकस्तूरीचन्दनागुरुभिः शुभैः ।
देवीं विलिम्पन्[6] सुरभीचक्रे चरितमात्मनः ॥ १०५ ॥
रत्नालङ्कारभारेण श्रियं भूपोऽथ भूषयन् ।
देदीप्यमान[7]मसृजन्निजमङ्गं यशोमयम् ॥ १०६ ॥

---

1. NK रत्नै°. 2. NK श्री. 3. NK देवतालय. 4. K °सार°. 5. NK अनृप्यत्रे°. 6. NK विलुंपन्. 7.N मानं°; देदीप्यमान°.

ततो विविधरत्नांशुश्री[1]वरैश्चीवरैरसौ ।
त्रिलोकीं नग्नकीं कुर्वन्निन्दिरां पर्यधापयत्[2] ॥ १०७ ॥
अलिभिः सुरभीद्रव्यजयश्रीगुणगायनैः ।
गीताभिः कुसुमस्रग्भिरथानर्चे[3] रमां नृपः ॥ १०८ ॥
निवृत्तफलनैवेद्योदकदीपकढौकतः ।
अग्रेश्रीदेवतं भूपो धूपोत्क्षेपमपि व्यधात् ॥ १०९ ॥
दीपानुत्तारणीकुर्वन्निव देहद्युतां श्रियः ।
आरात्रिकार्चनमपि व्यधत्त वसुधाधिपः[4] ॥ ११० ॥
अम्भस्तम्भनगम्भीरनीरदध्वनिधीरया ।
गिराऽथ स व्यधाद् देव्या निविश्याग्रे नवं स्तवः ॥ १११ ॥
न्यस्य देव्यां मनो दैवीं[5] मनस्युच्चमहालयः ।
जजाप क्ष्मापतिर्विद्यामृषिविद्याधरार्पिताम् ॥ ११२ ॥
स्वयमित्येष नित्येन कर्मणा निर्मलात्मकः ।
आहारमग्रहीद् गात्रधृतिमात्रकमेव सः ॥ ११३ ॥
ततः कदाचिदुद्याने कदाचित् केलिभूभृति ।
कदाचित् सरयूतीरे वीरेशः कालमक्षिपत् ॥ ११४ ॥
कदापि भवतापौघच्छेदिच्छायातिचारुषु ।
मनोविनोदं तीर्थेशवेश्मदेशेषु स व्यधात् ॥ ११५ ॥
पुनः प्रपद्य दिवसावसानं भूमिवासवः ।
तथैवाराधयामास वासनावशगः श्रियम् ॥ ११६ ॥
इत्यहर्निशसंवर्धमानमानसभावनः ।
आराधनैर्व्यधा[6]ल्लक्ष्मीं प्रसादाभिमुखीं नृपः ॥ ११७ ॥
एकदा परिपूर्णश्रीपूजनोऽभूज्जनोत्तमः ।
शक्रावतारं प्रासादमगाद् आदिजिनेशितुः ॥ ११८ ॥
द्वार एवाविशन् तत्राकस्माद् विस्मयदायिनम् ।
अशेषद्वीपदीपानां संक्षेपमिव भास्वताम् ॥ ११९ ॥
अमान्तीरिव देहे तत्कान्तीः पिण्डत्वमागताः ।
कलयन्तमलङ्कारमणिप्राग्भारदम्भतः ॥ १२० ॥

---

1. K श्रीवारै°. 2. NPK पर्यधापयन्. 3. NK °अथानर्च. 4. K वसुधा°. 5. °दैवी
6. NPK °न्यधात्°.

दिव्यद्रुकुसुमापीडक्रीडद्भृङ्गकुलच्छलात्[1] ।
धामाधिक्योद्वृता[2]स्येन्दुधूतचिह्नमिवोच्चकैः ॥ १२१ ॥

कमप्यालोकयामास त्रिकाशविकटेक्षणः ।
अदृष्टपूर्वरूपश्रीभासुरं भूपतिः सुरम् ॥ १२२ ॥

कक्षानिक्षिप्तनिस्त्रिं[3]शस्ततः कोरकयत्करः ।
उपसृत्याशु[4] तस्याग्रे तस्थौ सप्रश्रयं नृपः ॥ १२३ ॥

सोऽपि भूपालमालोक्य प्रसृतामृतकुण्डताम् ।
कलयन्[5] वाचमाचष्ट तद्वीचीलवसच्छविम् ॥ १२४ ॥

स हीन्द्रविहिताशेषजगद्भिः स्वर्गगायनैः ।
गायद्भिस्त्वद्गुणानैन्द्री[6] नाहर्षि परिषत् कदा ॥ १२५ ॥

तादृग्[7] गुणानां पात्रं स्यान्नेदृगाकृतिना विना ।
आकृत्यैवासि कथितस्तन्मे मेघवाहनः ॥ १२६ ॥

ज्वलनप्रभनामाहं सुरः सौधर्ममन्दिरः[8] ।
सौधर्माधिपतेर्देवपतेः प्रणयसेवकः ॥ १२७ ॥

आस्ते सुरः सुमालीति मम मित्रं स कान्तया ।
स्वयंप्रभाख्ययाऽऽहूतो भूतले केलिकौतुकात् ॥ १२८ ॥

विहरन् स महीमेतां विलासरससागरः ।
इयाय दयितानन्दी द्वीपं नन्दीश्वराभिधम् ॥ १२९ ॥

नन्दीश्वराब्धिवेलाद्रिचूलायां स्वःपुरोपमा ।
तेने रतिविशालाह्वा[9] स्वविलासाय तेन पूः[10] ॥ १३० ॥

तत्र तच्चारुता[11]मोहविस्मृतस्वर्गसौरभः ।
स खेलति सुखे लीनो महेलारसहेलया ॥ १३१ ॥

वनीवद् अवनीर्दग्धा विलीनेन्दुरिव क्षपा ।
निःश्रीकाऽद्य पुरी साऽभूद् आसन्नविपदेतयोः ॥ १३२ ॥

मत्वे[12]दमनुजीविभ्यस्तात्रासन्नविपद्द्रुतौ ।
अहं बोधयितुं गच्छन्नादिनाथमिहागमम् ॥ १३३ ॥

---

1. NP °छलात्°. 2. K °दवृतं°. 3. NPK °निस्त्रंश°. 4. K °त्याश्रु°. 5. NPK °त्वा°
6. NK °स्त्वगुणानैंदी°; P °स्त्वगुणानैंद्री°. 7. NK तादृगुणानां. 8. NK repeat सौधर्ममन्दिरः
9. NPK रतिविलासा°. 10. K तः. 11. NK °चारुतो°. 12. K मन्वेद°.

ततस्त्वमिह दृष्टोऽसि राजन् हृष्टोऽस्मि तत्तथा।
यथा प्रियसुहृद्बोधगतिवेगोऽपि विघ्नितः॥ १३४॥

स्वर्लोके मत्पतिर्भूमिलोके त्वं मेघवाहनः।
पतितुल्याधिपत्येन तेन मान्यतमोऽसि मे॥ १३५॥

न युक्तः शून्यहस्तस्य मान्यैः प्रथमसङ्गमः।
एनं व्यसनसंहारं हारं[1] राजन् गृहाण तत्॥ १३६॥

श्रीदेव्याऽसौ स्वसर्वस्वसारो हारोऽर्पितः पुरा।
शच्यै नाभेययात्रायां भजन्त्यै भूषणाद्भुतम्॥ १३७॥

देव्यै प्रियङ्गुसुन्दर्यै श्रयन्त्यै मत्प्रियापदम्।
सखीस्नेहेन दत्तोऽयं पुलोमसुतया[2] स्वयम्॥ १३८॥

मया नन्दीश्वरद्वीपयात्रायां जगृहेऽधुना।
तत्कण्ठादेष तत्प्रेमदुग्धार्णवतरङ्गवत्॥ १३९॥

अयं चन्द्रातपो नाम जितचन्द्रातपोऽर्चिषा[3]।
अगोचरश्चर्मदृशां दृश्यस्ते मत्प्रभावतः॥ १४०॥

गृहीतेनामुना नाशं यास्यन्ति विपदस्तव।
उर्वरावरसर्वेऽपि फलिष्यन्ति मनोरथाः॥ १४१॥

मत्प्रियाया ममाप्यल्पायुषोर्मर्त्यत्वमीयुषोः[4]।
दृष्टः कदापि त्वद्वर्ती यद्येष स्मारयेज्जनी॥ १४२॥

इत्युक्त्वैष ददौ हारं समाहारं शशित्विषाम्।
हर्षान्नृपोऽपि जग्राहानुकूलग्रहजालवत्॥ १४३॥

याम्याशु व्यसनासत्ति[5]व्याकुलाय सुमालिने।
इत्युदित्वाऽथ विद्युद्वज्जगाम ज्वलनप्रभः॥ १४४॥

तद्विस्मयस्मितमनाः स्थित्वा तत्र क्षणं नृपः।
हारं बद्ध्वोत्तरीयान्ते विहारं प्राविशत् प्रभोः॥ १४५॥

कल्पितार्थप्रदैः स्वामिन् साम्यं कल्पद्रुभिः क्व ते।
कुर्वाणस्य जनान्[6] विश्वमूर्धन्यान् ध्यायतः पदौ॥ १४६॥

---

1. K drops हारं. 2. K पुलामसुतया. 3. K °विषा. 4. NK drop the part of the vs. after ममाप्यल्पायुषोः. 5. K °संति°. 6. NPK जनात्.

इति नाभेयदेवाङ्घ्रिसेवासफलितक्षणः ।
पुनः केलिवनं क्ष्मापः प्रापार्णवमिवार्यमा ॥ १४७ ॥

सन्ध्याविधिं विधायाऽथ लक्ष्मीमभ्यर्च्य भूविभुः ।
प्रमोदोत्पुलकस्मेरकपोलफलकोऽवदत्[1] ॥ १४८ ॥

यो[2] योगचक्षुषां दृश्यः सोऽपि चर्मदृशा मया ।
यददर्शि सुरो देवि स प्रसादस्तवाद्भुतः ॥ १४९ ॥

देवि त्वत्सेवनतरोरतुल्यस्य[3] फलिष्यतः ।
पुष्पोद्गम इवादर्शि मया हारः प्रभावभाग् ॥ १५० ॥

किन्तु यं देवि दिव्याङ्गं त्वं कण्ठे कृतपूर्विणी ।
न स हारो महारोचिरुचितो मदलङ्कृतौ ॥ १५१ ॥

इत्यालपन्निलापालस्तं हारं स्तबकीकृतम् ।
निन्ये[4] श्रीदेवतापादपद्मलीलामरालताम् ॥ १५२ ॥

प्रत्यङ्गरङ्गदुत्तुङ्गपुलकाङ्कुरभासुरः ।
मन्त्रजापलयं प्राप ततः क्ष्मापशिरोमणिः ॥ १५३ ॥

तदाखिलजगद्भङ्गभयं दिविषदां ददत् ।
महाट्टहासः कोऽप्यासीद्[5] ब्रह्माण्डं खण्डयन्निव ॥ १५४ ॥

अचालीदचला[6] तेन सद्रुमाब्धिकुलाचला ।
ध्यानात् तस्य न रोमापि नरोत्तंसस्य चुक्षुभे ॥ १५५ ॥

ततः श्रीप्रतिमारूपदृगन्तवर्त्मभित्तिताम् ।
झगित्यगच्छद् वेतालः[7] कश्चिद् भालधुताम्बरः ॥ १५६ ॥

देहावयवसन्दोहीकृतक्षितिधरोत्कर[8]म् ।
रोमस्तो[9]मीकृतमणिच्छायापिङ्गोरगव्रजम् ॥ १५७ ॥

केशीकृतानलज्वालं भ्रूस्थिरीकृतविद्युतम् ।
दृग्पिङ्गतारायुगलीकृततिग्मकरद्वयम् ॥ १५८ ॥

दन्तीभूतमिल[10]द्भूतभविष्यक्षयवासरम् ।
मुखीकृतश्वभ्र[11]मुखं जिह्वाग्रीकृततक्षकम् ॥ १५९ ॥

---

1. K °ऽवदन्. 2. NK यौ. 3. NK °रतुल्पस्य; P °रतुलपस्य. 4. NPK निन्ये. 5. NPK °प्यासीब्रह्मांडं. 6. N आचालीक्ष्वला. 7. NK वेताल°. 8. NK °क्षरम्. 9. NK रोमं. 10. K °गिलद्°. 11. NK °श्वभ्रं°.

नखावलीभूतकालरात्रीसन्ध्याभ्रमण्डलम् ।
नाभीतानीतपातालं विलेपीकृततामसम् ॥ १६० ॥

भीषणं भीषणानामप्युच्चैः कालमिवाङ्गिनः ।
फेत्कारत्रस्त[1]जगतं श्वासा[2]कुलकुलाचलम् ॥ १६१ ॥

क्षुत्तृष्णाभुक्तपीतस्वमांसरक्तमिवाभितः[3] ।
अस्थिचर्मावशेषत्वात् करालं वर्ष्म बिभ्रतम् ॥ १६२ ॥

मियामभूमिस्तं वीक्ष्य स्मितधौतरदच्छदः ।
धीर[4]गम्भीरया वाचा प्रोवाचावनिवल्लभः ॥ १६३ ॥

जगद्विलक्षणाकारधारीधाराधरद्युते[5] ।
कस्त्वं मे श्रीमुखालोकविघ्नीभवसि दिश्यताम् ॥ १६४ ॥

अथाननोच्छल[6]ज्ज्वालास्फुलिङ्गालिङ्गितोऽप्रया ।
दहन्निव दिवं वाचा व्याचष्टासौ निशाचरः ॥ १६५ ॥

अयि मूढ समारूढमहिमानं न वेत्सि माम् ।
श्रीदेव्यनुचरं रात्रिचरं नाम्ना महोदरम् ॥ १६६ ॥

श्रियोऽहं परिवारत्वान्न पूर्वं पूजितस्त्वया ।
अत एतन्मुखालोकविघ्ननिघ्नीभवामि[7] ते[8] ॥ १६७ ॥

जगौ च जगतीशस् तमज्ञानान्न त्वमार्चितः ।
तत् प्रसीद महाभाग बलिं दास्यामि तेऽमितम् ॥ १६८ ॥

सोऽपि भूपमभाषिष्ट राजन् पलभुजो वयम् ।
बलिधान्यैर्न तृप्यामो[9] दुग्धैरिव सुधाभुजः ॥ १६९ ॥

अभ्यधाच्च धराजानिर्जाने वो जङ्गले रतिः[10] ।
हन्ति हन्त न मत्पाणिः प्राणिनस्तु निरागसः ॥ १७० ॥

अथावोचत वेतालः क्ष्मापाल कति न त्वया ।
राजानो जघ्निरे हृष्यदमरैः समरैः पुरा ॥ १७१ ॥

यो हन्यमानः शौर्येण चमत्कारं चकार ते ।
कपालं लोकपालस्य तस्य कस्यापि यच्छ मे ॥ १७२ ॥

---

1. NK °त्रस्त°. 2. NKP स्वासा°. 3. K °वासितः. 4. NK धरे°. 5. NPK °द्युतेः.
6. NP °नोच्छल°. 7. NK °निघ्ना°. 8. NK °भवामिति. 9. K नृप्यामो. 10. P रतिं; K रता.

तत्कपालकलापूतैः पयोभिस्तर्पयन्[1] पितॄन् ।
राजर्षेस्तव हर्षेण यशो गायामि दानजम् ॥ १७३ ॥

भूपोऽथ भारतीं भेजे भवद्भावमजानता ।
चक्रे[2] नेदृङ्[3] नृकोटीरकरोटिग्रहणं मया ॥ १७४ ॥

कृतिन्[4] प्रतीक्षसे कञ्चित् कालं यदि तदिच्छया ।
तादृशस्य शिरो दास्ये तुभ्यं कस्यापि भूभुजः ॥ १७५ ॥

यद्युत्सुकोऽसि कार्यं च यदि ते परिपूर्यते ।
तदेनं मङ्क्षु मन्मौलिं गृहाणानुगृहाण माम् ॥ १७६ ॥

इत्यात्तवाचि भूचन्द्रे हृष्यन् विकचलोचनः ।
वेतालः सैष तत्कालकार्योत्तालः समालपत् ॥ १७७ ॥

किं कुर्वेऽन्य[5]कपालैश्चेत् त्वत्कपालं[6] लभे विभोः ।
किं चन्द्रताराभ्युदयैर्भानुमान् अभ्युदेति चेत् ॥ १७८ ॥

तद् गृहाण महीभर्तः कर्तरीं मम निःसमाम् ।
स्वामिद्रोहमसौ दिव्यो न करिष्यत्यसिस्तव ॥ १७९ ॥

अथाऽभ्यधत्त भूभर्ता कर्ता सर्वमसिर्मम ।
स्वामिद्रोहो हि भृत्यस्य भर्तुरादेशलङ्घनम् ॥ १८० ॥

इत्युक्तिसमकालं स करवालं भुजालराट् ।
चकर्ष हर्षनिर्मग्नः कोशात् कोशो गुणश्रियाम् ॥ १८१ ॥

प्रथिताऽभ्युदितिं रोमाङ्कुरैः सत्त्वाङ्कुरैरिव ।
सोऽथ वामकराकृष्टशिराः स्कन्धे न्यधादसिम् ॥ १८२ ॥

असृग्भिर्दर्शयत्युच्चैस्ततः छेदानुरागिताम् ।
छिन्धि छिन्धि रयेणेति ब्रुवाणे कीकसक्वणैः ॥ १८३ ॥

स्कन्धे स्वस्वछिदोत्कण्ठाकण्डूलावयवव्रजः ।
यावच्छक्ति दृढेनाशु करेणासिमवाहयत् ॥ १८४ ॥

छिन्नार्धमूर्ध्नस्त[7]स्याथ चाल्यमानोऽप्यशक्तितः ।
चित्रन्यस्त इव च्छेदे करवालश्चचाल न ॥ १८५ ॥

रे रे परोपकारेषु नित्याकुण्ठो भवद् भवान् ।
कुण्ठः परोपकारेऽस्मिन् बद्धमुष्टिस्त्वमद्य किम् ॥ १८६ ॥

---

1. NPK तर्पयेत्. 2. वक्रे. 3. NPK नेदृग्. 4. NPBK कृतीन्. 5 NK °स्य°. 6. B drops °लं. 7. NPBK °मूर्ध्वं°.

इत्युपालभ्य भूपालः खड्गं भून्यस्तमस्तकः ।
उद्रिक्तशक्तिः पाणिभ्यामुभाभ्यामप्यचालयत् ॥ १८७ ॥
तथाऽप्यचलताभाजि कृपाणे कोपशोणरुग् ।
अस्त्रं पलादाद्[1] आदातुमातुरः सोऽयमुत्थितः ॥ १८८ ॥
तत्क्लेशमूर्च्छाधिगमग्लानेन्द्रियचयस्ततः ।
क्ष्मायामुपाविशत् सिंहचपेटार्त्त इव द्विपः ॥ १८९ ॥
ततः शुभ्रै[2]रलङ्कारैर्मिथः सङ्घटनादिभिः ।
अलङ्कृतां[3] कृतासेवै[4]स्त्रैलोक्यसुकृतैरिव ॥ १९० ॥
उन्निद्रैर्मुखचन्द्रस्य चन्द्रिकाप्रसरैरिव ।
शुभ्रताविभ्रमावासैर्वासोभिः शोभिताकृतिम् ॥ १९१ ॥
द्राग् अङ्गसङ्गिनीर्मुक्त्वा सुरद्रुमसुमस्रजः ।
लोलाभिरलिमालाभिः सेव्यमानमुखानिलम् ॥ १९२ ॥
सारं शारीरसौरभ्यमभिलुभ्य[5]द्भिरुन्मदैः ।
आलिङ्गितां गाढतमं समन्ताच्चन्दनादिभिः ॥ १९३ ॥
हृदा चापप्ररूढस्य सेवकेषु फलिष्यतः ।
प्रसादपादपस्येव प्रसूनं दधतीं स्मितम् ॥ १९४ ॥
दीर्घदारिद्र्यदुष्टाहिदष्टात् कष्टदशास्पृशः ।
जनान् जीवयितुं दृग्भ्यां वर्षन्तीममृतच्छटाः ॥ १९५ ॥
दिव्यालङ्कारगार्विष्टैः सर्वद्रव्याधिदेवतैः ।
असङ्ख्यातैः परिवृतामिन्दुमूर्तिमिवोडुभिः ॥ १९६ ॥
दिव्यप्रेक्षणकोद्योतद्योतमानविमानगाः ।
नृपः स्वप्न[6]मिवैक्षिष्ट लक्ष्मीमक्षीणसाहसः ॥ १९७ ॥ कुलकम् ॥
चिह्नादिभिः परिज्ञाय कृतावस्थोचिता[7]नतिम् ।
गिरा प्रसादमूर्त्येव देवी भूपालमालपत् ॥ १९८ ॥
भद्र त्वद्भक्तिसङ्गाभिरुच्छङ्गीकृतसम्मदा ।
तुष्टाऽस्मि ते यशस्कन्द किं ददामि वरं वृणु ॥ १९९ ॥
श्रीदेवीदर्शनसुधासेकमूर्छितमूर्छनः ।
तदाऽवदन्मुदा मन्दवेदनो मेदिनीपतिः ॥ २०० ॥

---

1. K पलंदाद्°. 2. NK शुचै°. 3. B अलंकृता°. 4. K कृतासवै°. 5. BK लुब्ध° 6. N °स्वप्न°. 7. NK °विता°.

दिवि दिग्विजयस्तम्भदम्भोद्यत्पुलकाङ्कुरा ।
भुक्तैव त्वत्प्रसादेन रसाब्धिरसना[1] मया ॥ २०१ ॥
येषां देवाधिदेवांह्रिसेवास्वेवानतं शिरः ।
राजानो मां नमश्चक्रुस्तेऽपि वेपितविग्रहाः ॥ २०२ ॥
धर्मामृताब्धिसच्चार्यनिर्मर्यादितया मया ।
मोचितं पापपङ्काच्च तापातङ्काच्च विष्टपम् ॥ २०३ ॥
अत्यर्थमर्थिनां पूर्वं पूरयित्वा मनोरथम् ।
पश्चात् तेषु[2] महादानैः पूरितः स्वमनोरथः ॥ २०४ ॥
किन्त्वद्यैवाहमस्यास्थिखण्डमात्राप्तिपूरणम् ।
शक्तः पूरयितुं कीर्तिनमनो न मनोरथम् ॥ २०५ ॥
तद् देवि मित्रदम्भेन स्तम्भितः केनचिद् द्विषा ।
तथा कुरु यथाऽसिर्मे मौलिलावाय धावति ॥ २०६ ॥
सहर्षा गाढहर्षाणि तत्सत्त्वोत्कर्षतस्ततः ।
पश्यन्ती परिवारस्य वदनानि रमाऽवदत् ॥ २०७ ॥
सर्वोऽप्ययं परीवारः शान्ताचारतमो मम ।
कपाली पलभुग् मद्यकामी नामीषु कश्चन ॥ २०८ ॥
विशेषान्मत्प्रतीहारो महात्मायं महोदरः ।
क्रीडां वत्स भवत्सत्त्वपरीक्षार्थमिति व्यधात् ॥ २०९ ॥
तत् परीक्षितसत्त्वोऽसि वरवीर वरं वृणु[3] ।
दुर्लभं तव यत् किञ्चिन् नितरां वितरामि तत् ॥ २१० ॥
अथाह स हसन् देवि सोऽयमस्तु यथा तथा ।
अहं तु पालयाम्येव पतिपन्नं शिरोऽर्पणम् ॥ २११ ॥
तत् प्रीता देवि चेत् खड्गस्तम्भं संभज्यतां ततः ।
भविष्यत्यन्यथा मृत्युरित्थमेव स्थितस्य मे ॥ २१२ ॥
तदा लक्ष्मीरमन्देऽस्मिन् सन्देहे पतिता सती ।
किङ्कार्यत्वजडा सद्यो हृदा सस्मार भारतीम् ॥ २१३ ॥
ततस्त्रिभुवनाधीशैर्धीकृते सेविताऽभितः ।
प्रत्यक्षीभूय वाग्देवी किञ्चिद् गुप्तं श्रियेऽदिशत् ॥ २१४ ॥

1. = °रशना. 2. P पश्चात्तेषु. 3. N वृणु.

अथाभ्यधत्त भूनाथं श्रीरसौ वीर सम्प्रति।
त्वत्खड्गोऽयं हतस्तम्भो यथाभीष्टं विधीयताम् ॥ २१५ ॥
इत्युक्तिसमकालं स स्वं शिरस्तरवारिणा।
छित्वा गृहाणेदमिदं वदन् क्षिप्त्वाऽर्थिनं प्रति ॥ २१६ ॥
द्राग् उत्थायाक्षिविक्षेपभ्रूभङ्गादि मुखे सृजन्।
श्रियोऽग्रे चारुचारीभिः कबन्धेन मुदाऽनटत् ॥ २१७ ॥
न याति जीवितं यावत् तावल्लक्ष्मीः[1] स्वयं स्यात्।
धराधरस्य मूर्धानं कबन्धस्कन्धगं व्यधात्[2] ॥ २१८ ॥
कमण्डलुजलेनैवममृतपरिपन्थिना।
वाग्देवी तच्छिरोऽसिञ्चद् अव्रणं च बभूव तत् ॥ २१९ ॥
शिरश्छेदोच्छल[3]द्रक्तसङ्गमङ्गमिलापतेः[4]।
स्वयमक्षालयल्लक्ष्मीर्वाग्विक्षेपस्त्वयं पयः ॥ २२० ॥
अथैनं श्रीर्जगौ नास्ति तव सत्त्वोचितो वरः।
तत् किञ्चिद्याचया मुख्य नृणां मामनृणीकुरु ॥ २२१ ॥
अथ प्रीतिसरित्पूरदूरक्षिप्ताधिबन्धनः।
भूपोऽभ्यधात् प्रसन्नाऽसि यदि स्वामिनि तद् द्रुतम् ॥ २२२ ॥
तथा कुरु यथा देवी सा सती मदिरावती।
सूनोर्दिग्विजयाख्यानैरानन्दाश्रूणि मुञ्चति ॥ २२३ ॥
वैदग्ध्येनाप्यगाधेन स[5]त्त्वेनेवास्य वश्यगा।
देव्यवादीत् कियदिदं भूयात् तेऽन्यदपि प्रियम् ॥ २२४ ॥
अहं त्रैलोक्यवस्तूनि तेषामेषा तु जीवितम्।
वाग्देवी जगतां देवी वन्दस्वेमां मुदा नृप ॥ २२५ ॥
अथ भूपोऽनमद् वाणीं वाणी चाशिषमब्रवीत्।
भविष्यति भवत्सूनुरनूनज्ञानधीरिति ॥ २२६ ॥
कण्ठे रोप्यं सुतस्यायं दिग्जयेषु प्रभावभाग्।
इति चन्द्रातपं हारं स्वयं राज्ञे रमाऽर्पयत् ॥ २२७ ॥
इदं महाविपद्घाती सङ्कटे धार्यमित्यदात्।
निजं बालारुणाह्वं च राज्ञे श्रीरङ्गुलीयकम् ॥ २२८ ॥

---

1. NPK °ल्ह्क्ष्मी; B °ल्लीक्ष्मी. 2. PB न्यधात; N त्यधात. 3. NP °छलद्°. 4. N °मिलापातः; P °मेलापातः; B °लिलापतेः. 5. NP सात्वेने°; K सत्वेने°.

नृपमालोक्य वाग्देवीश्रीदेव्यौ तरलं ततः ।
निमेषेण तिरोभूतां त्रिलोकीनयनायिते ॥ २२९ ॥

क्षणमुद्विग्नचित्तोऽथ प्रमोदभरभागपि ।
स्थित्वा तत्र धरित्रीन्दुः पत्रशालामुपागमत् ॥ २३० ॥

सज्जितं तत्र संस्तारकुशलैः[1] कुशसंस्तरम् ।
श्रान्तः शिश्राय विश्रामकामः क्ष्माकामिनीपतिः ॥ २३१ ॥

तत्र तत्तादृगाश्चर्यप्रभावचयचिन्तनैः ।
क्षणवद् गमयामास क्षणदां क्षोणिवासवः ॥ २३२ ॥

कृतप्रभातकृत्योऽथ मित्रमन्त्रीबुधादिभिः ।
सेवाहेवाकिभिर्लोकैरैत्यालोकि मुदा नृपः ॥ २३३ ॥

मुखानुरागप्रीताय तस्मै वर्गाय पृच्छते ।
रात्रिवृत्तान्तमाचख्यौ हृष्यद्रोम्णे[2] नृणां मणिः ॥ २३४ ॥

हारं चन्द्रातपं बालारुणाख्यं चाङ्गुलीयकम् ।
अदर्शयच्च चन्द्रार्कजीवितव्ये इवेह सः ॥ २३५ ॥

ततः पुरप्रवेशाय विज्ञप्तस्तैरिलापतिः ।
श्रियं प्रणम्य प्रोवाच रत्नाध्यक्षं महोदधिम् ॥ २३६ ॥

सद्धर्मस्य सितैर्हर्षहसितैरिव निर्मितः ।
हारोऽयं प्रत्यहं पूज्यः स्वामिष्टमिव दैवतम् ॥ २३७ ॥

रत्नाङ्गुलीयमेतच्च यमदिग्जयवर्तिने ।
वज्रायुधाय सेनान्ये प्रेष्यं प्रौढप्रभावभृत् ॥ २३८ ॥

वाच्यो विजयवेगाख्यरतद्विश्वास[3]पुमानिति ।
वज्रायुधाङ्गुलौ क्षेप्यमेतत् समरसङ्कटे ॥ २३९ ॥

इति हारं च तं रत्नाङ्गुलीयं च महोदधेः ।
समर्प्य सपरीवारः पुरं प्रत्यचलन्नृपः ॥ २४० ॥

तृणानीव महेन्द्रादीन् अथानन्दाम्बुधेर्बहिः ।
क्षिपन्नु[4]त्कर्षकल्लोलैरुल्लसद्भिर्मुहुर्मुहुः ॥ २४१ ॥

सर्वाङ्गभूषणमणिश्रीसङ्क्रान्तनभोमणिः ।
नभोमणीनाममितश्चक्रैरिव कृताकृतिः ॥ २४२ ॥

---

1. N repeats कुशलैः. 2. B °द्रोम्ण्ठे. 3. NPBK °विस्वास°. 4. P क्षिपन्नु°.

उद्यद्भिर्बन्दिवृन्दानां शब्दैर्जयजयादिभिः ।
वाद्यस्य पञ्चशब्दस्य शब्दसत्तामपीरयन् ॥ २४३ ॥
दूराद् अभ्यापतन्तीभिश्चिराय विरहादिव ।
उत्काभिरवनीभागान् आलिङ्गन्निव दृष्टिभिः ॥ २४४ ॥
ततः स्त्रीवृन्दनेत्रारविन्दवन्दनमालिकाम् ।
उदारवारणारूढो भूविभुः प्राविशत् पुरीम् ॥ २४५ ॥ कुलकम् ॥
सभागौरश्चिरं पौरकृतमाङ्गलिकक्रमः ।
स मन्दिराधिदेवीनामपि नेत्रोत्सवोऽभवत् ॥ २४६ ॥
गत्वा शक्रावतारादितीर्थेषु जिनपूजनैः ।
स्वं यशोऽगाययत्[1] सोऽथ पुष्पस्रग्भृङ्गकूजनैः ॥ २४७ ॥
ततस्तूर्यत्रयलयध्वस्तत्रिविधपातकः ।
दानं[2] दूनार्थिदौस्थ्योऽयं देवतावसरं व्यधात् ॥ २४८ ॥
मधुराहारयोगेषु जातदृग्मीलनो मुहुः ।
सुधान्धसोऽप्यनिमिषान् भोजनेन जिगाय सः ॥ २४९ ॥
ततश्चित्तार्त्तिदमहामोहरोगनिबर्हणम् ।
स पपौ कविगोष्ठीषु किञ्चित् काव्यरसायनम् ॥ २५० ॥
ततश्च पूर्वदिग्भागात् तमसामागमिष्यताम् ।
जगच्छायाह्वये ध्वान्ते सम्मुखीनेऽभिधावति ॥ २५१ ॥
पश्चिमाचलचूलाग्रसूर्यकान्ताग्निकान्तिभिः ।
व्यग्रीभूत इवादित्येऽम्भोधिपाताभिकाङ्क्षिणि ॥ २५२ ॥
निशापतिपथोत्पश्य चकोर[3]कुलचक्षुषाम् ।
प्रभये चारुणीभूते व्योमवर्त्मनि सन्ध्यया ॥ २५३ ॥
सन्ध्याविधिं विधायासौ सुकृती जगतीपतिः ।
सेवाकृन्नेत्र[4]कुमुदं मुदं निन्ये मुखेन्दुना ॥ २५४ ॥
जगाम याममात्रायां यामिन्यामथ पार्थिवः ।
मन्दिरं मदिरावत्याः पद्भ्यां मन्दं हृदा द्रुतम् ॥ २५५ ॥
भर्तुस्तत्कालकर्तव्यप्रत्याकुलसखीकुला ।
अभ्युत्थानं व्यधाच्चित्तमदिरा मदिरावती ॥ २५६ ॥

1. NPBK यशोगाययन्°. 2. NPBK दानदूना°. 3. NP चाकार°. 4. PB °कृत्नेत्र°; K °कृन्नेत्र°.

अलङ्चक्रे ततः शय्यां शुभ्रसज्जोत्तरच्छदाम् ।
नरेन्द्रः शारदीमब्दलेखामिव सुधाकरः ॥ २५७ ॥
वरालङ्करणा देवी हैममासनमासदत् ।
तुङ्गं मेरुगिरेः शृङ्गं कल्पवल्लीव सा पुरः ॥ २५८ ॥
तौ[1] दम्पती तदान्योन्यं मुखपीयूषकुण्डयोः ।
चिरं वियोगसंतप्ते स्नपयामासतुर्दृशौ ॥ २५९ ॥
तयोः परस्परपरीरम्भदम्भामृतप्लुतीः ।
अभीप्सतोः कृतव्याजपूरो दूरे ययौ जनः ॥ २६० ॥
परिरभ्य प्रियां भूपः स्वचरित्ररसं ततः ।
चिरकालवियोगाग्निशमोपायमपाययत् ॥ २६१ ॥
अथानन्दकथास्वादसादरीभूतकर्णयोः ।
दृशं दृशैव पिबतोस्तयोरासीन्निशा कृशा ॥ २६२ ॥
निशाशेषे दृढाश्लेषवशाद् दृग्मीलनं तयोः ।
यत्तदाऽजनि निद्रायास्तन्देवा[2]वसरं ददौ ॥ २६३ ॥
उदारमारशृङ्गारमिन्दुसुन्दरदीधितीम् ।
अवतीर्णं दिवः[3] स्वैरमैरावणमिभप्रभुम् ॥ २६४ ॥
स्वपाणिधृतयोः स्वर्णमयमङ्गलकुम्भयोः ।
आपिबन्तं पयः स्वप्ने ददर्श मदिरावती ॥ २६५ ॥
ततो जेतव्यराजीवप्रथमोन्निद्रचक्षुषः ।
आख्यद् देवी नृदेवस्य स्वप्नमुद्दामसम्मदा ॥ २६६ ॥
प्रियां सत्पुत्रसम्पत्तिं[4] व्याख्यायाथ प्रमोद्य सः ।
धर्म्याणि निर्ममे प्रातःकृत्यानि जगतीपतिः ॥ २६७ ॥
अथार्हन्नीति[5]लीलाभिर्निशां शृङ्गारभङ्गिभिः ।
नयति क्षितिपे गर्भं दधार मदिरावती ॥ २६८ ॥
प्राग्वीराणां चरित्राणि शृण्वत्युत्पुलकाकृतिः ।
सा बभञ्जोद्भवप्रज्ञा व्यासानामपि संशयान् ॥ २६९ ॥
कृतिना याचकं वीक्ष्य सा चकम्पे कृपालुका ।
अपूरयच्च तं वित्तैराकल्पकुलपूरिभिः ॥ २७० ॥

---

1. NK तो. 2. N °स्तंदेवा°. 3. NBK drop the *visarga* after दिव; P adds it afterwards. 4. NPBK °संपत्ति. 5. BK °नांति°.

सञ्चरन्ती करे यस्याः सा चक्रावलम्बनम् ।
अजीगणत् तृणमसौ वीरानप्यचलाचलान्[1] ॥ २७१ ॥
उच्चैस्तेजस्विनोऽर्कादीनपि प्रेक्ष्य[2] चुकोप सा ।
नवग्रहाङ्कवलयच्छलात् तैरप्यसेवि तत् ॥ २७२ ॥
रत्नकङ्कणमात्रालङ्करणा मुक्तभूषणा ।
सूर्येन्दुयुक्ता निस्तारा प्रातःसन्ध्येव सा बभौ ॥ २७३ ॥
काले रसालवल्लीव फलं विश्वजनेप्सितम् ।
सम्पूर्णदोहदा साऽथ सुखेन सुषुवे सुतम् ॥ २७४ ॥
शिशोस्तेजस्विनस्तस्योत्पत्तौ दीपः समीपगः ।
उद्यदुद्यच्छिखो जज्ञे स्वपक्षाभ्युदयादिव ॥ २७५ ॥
द्रुता गत्या मुखस्मित्या स्फुटं राज्ञः सुतोद्भवम् ।
आख्यन् दास्यो द्रुतश्वासा वचसा पुनरस्फुटम् ॥ २७६ ॥
पूर्वपश्चादुपेतानां तद्वक्त्रीणामभेदतः ।
मुदा नृपो ददौ दौस्थ्यशोषिकं पारितोषिकम् ॥ २७७ ॥
राजा दानोल्लसद्दीनं कारोन्मुक्तरिपूत्करम् ।
जगदानन्दनं चक्रे नन्दनोत्पत्तिमङ्गलम् ॥ २७८ ॥
देवी स्वप्नेऽत्र गर्भस्थे ददर्श हरिवाहनम् ।
इति क्ष्मापः सुतं नाम्ना चकार हरिवाहनम् ॥ २७९ ॥
गुरुणैव गुणग्रामेणान्तः प्रविशता स्वयम् ।
जननीक्षीरगौरेण स शिशुर्ववृधे क्रमात् ॥ २८० ॥
कलागुरुभ्यो भूपेन कलाभ्यासाय सोऽर्पितः ।
तेजस्विभ्यो मणिभ्योऽर्क इव तेजःप्रवृद्धये ॥ २८१ ॥
स्वभावनिर्मलोन्मीलत्कलाजालो हिमांशुवत् ।
शरद्दिनैरिवाद्योति कलाचार्यैः किमप्ययम् ॥ २८२ ॥
आगताभिः कलाभिस्तद्देहगेहस्थिता गुणाः ।
लीलालङ्घितविश्वानि यशोऽपत्यान्यजीजनत् ॥ २८३ ॥
कलाविशेषविज्ञानाद् गुरुरस्माकमप्यभूत् ।
असाविति कलाचार्यैः स कृती पितुरर्पितः ॥ २८४ ॥

1. PB °चलाद्. 2. P प्रेक्ष्य.

भूपालस्तत्कलाजालमालोक्य स्वममन्यत ।
श्रेयोमयं मदमयं प्रमोदमयमप्यहो ॥ २८५ ॥

अकारयत् कुमाराय प्रासादमथ पार्थिवः ।
विमानमेव संप्राप्तं दिवस्तद्विरहासहम् ॥ २८६ ॥

कल्पवृक्षीकृतकरो नन्वयं स्तुत्यरूपरुक् ।
गौरकीर्तिर्लसत्पौरलोकालोकमहोत्सवः ॥ २८७ ॥

शूरं[1] चारुगुणग्रामभाजनं राजनन्दनम् ।
पुत्रमै[2]त्र्याय कमपि द्रष्टुं दूतान्नृपोऽदिशत् ॥ २८८ ॥

वीक्षिताशेषभूपालसदसो जगदुश्च ते ।
कुमारमैत्र्ययोग्येन पुंसा विरहितां महीम् ॥ २८९ ॥

चिन्तासन्ततिसन्तप्तमथ भूपं सुदुःस्थित[3]म् ।
व्यजीज्ञपत् प्रतीहार[4]स्त्रिदशाहारतुल्यगीः ॥ २९० ॥

प्रधानपुरुषो दण्डपतेर्वज्रायुधस्य यः ।
ख्यातो विजयवेगाख्यः स देवांह्रीन् दिदृक्षते ॥ २९१ ॥

भ्रूभङ्गरङ्गितदृशा[5] वीशामीशेन तत्क्षणम् ।
आदिष्टो हृष्टचित्तं स तं सभायामवीविशत् ॥ २९२ ॥

हारिवैहारिकाशेषवेष एष प्रभुं भुवः ।
दूरानतशिराः पादोपान्तमेत्यानमत् पुनः ॥ २९३ ॥[6]

भूपालपाणिसंस्पृष्टः पृष्टो हृष्टोल्लसन्मनाः ।
प्रधानमानयुं योग्ये निविष्टः सोऽथ विष्टरे ॥ २९४ ॥[7]

दण्डाधिपोऽरिकरिणामङ्कुशः कुशलीत्यथ ।
सम्भाषितः स भूपेन कृती स्माह कृताञ्जलिः ॥ २९५ ॥

सुरासुरपराभूतिप्रादुर्भूतविभूतिना[8] ।
सोऽस्तु क्वा[9]कुशली स्वामिप्रतापेन पुरस्कृतः ॥ २९६ ॥

देवप्रतापदिव्यास्त्रयोगदक्षः स दक्षिणाम् ।
वशीकृत्य दिशं कृत्यप्रश्नायेह न्ययुंक्त[10] माम् ॥ २९७ ॥

---

1. NPK सूरं; B सूरचारु°. 2. N पुत्राम्भैस्या°. 3. NBK सुदुस्थितं. 4. NBK प्रतीहारं°. 5. NBK °दृशां. 6. NPB The expected wrong vs. No. 92 is dropped and No. 93 is given here. 7. NP vs. No. 93 is repeated here. 8. NK °विभूतिनी. 9. NPBK सोस्तुत्का°. 10. NK नियुक्त.

जितबालारुणं बालारुणं नामाङ्गुलीयकम् ।
साक्षात् ससाक्षिकं[1] रत्ना[2]ध्यक्षस्यार्पि म[3]येह तत् ॥ २९८ ॥
बालारुणगिरा [4]व्युच्चत्कपोलपुलको नृपः ।
ततस्तत्प्राप्तिसमयं साक्षात्कुर्वन्निवाब्रवत् ॥ २९९ ॥
द्विषत्तमोऽरुणेनेव कश्चिद् बालारुणेन वः ।
उपकारः कृतो नाम सङ्ग्रामव्यसने क्वचित् ॥ ३०० ॥
जगौ विजयवेगोऽथ नाथ किं वक्तु[5] मादृशः ।
बालारुणप्रभावोक्तौ न शक्ता वागपि स्वयम् ॥ ३०१ ॥
यत्र कुर्वन्ति भाग्यानि मन्त्रा यत्रातिकातराः ।
देवैरपि न साध्यं यत् पङ्गुर्योगोऽपि यद्गतौ ॥ ३०२ ॥
बालारुणेन तत् किञ्चिदस्माकं नाथ निर्मितम् ।
व्यसनातिशये जन्म जीवितं च विनिन्दताम् ॥ ३०३ ॥
दोर्दण्डडम्बरोपात्ते कुण्डिने दण्डनायकः ।
गते वर्षे सहर्षेण वर्षाकालमवाहयत् ॥ ३०४ ॥
ततो येन जगच्चक्रे यशःकुसुमशेखरम् ।
तं जेतुं सोऽचलत् काञ्च्यां नृपं कुसुमशेखरम् ॥ ३०५ ॥
चलाचलाचलीधूलिगुप्तसप्तहया ततः ।
चचाल त्वच्चमूः[6] कालरात्रिवद् विद्विषां विभो ॥ ३०६ ॥
महीमहेन्द्र त्वन्नुन्नवज्रायुधभयातुरः ।
स भूभृद् अविशत् काञ्चीदुर्गं दुर्ग्राहमब्धिवत् ॥ ३०७ ॥
वापीकूपसरोम्भांसि शुभ्रभांसि पदे पदे ।
बलैरुन्मूलयामास यशांसीव निजानि सः ॥ ३०८ ॥
स्थानस्थानतृणस्तोमदाहजेन दिशोऽखिलाः ।
धूमेन धूमलीचक्रे स्वेन दुर्यशसेव सः ॥ ३०९ ॥
सर्पिःतृणान्नकाष्ठौघैः पुरे तेनातिपूरिते ।
प्रहृष्टस्त्वत्प्रतापाग्निरिव मूर्त[7]श्चमूपतिः ॥ ३१० ॥
पुरान्तस्तोमरस्तोमः[8] श्यामस्तेनाहृतो बहुः ।
प्रशान्तस्वप्रतापाग्निकृष्णाङ्गारकदम्बवत् ॥ ३११ ॥

---

1. NPBK °ससाक्षकं. 2. N रत्ना°. 3. NK °स्य पिमिये°. 4. NPBK °व्युच्चुत्क°. 5. NPBK वक्तु. 6. NK °चमुं; B चमू. 7. NK मूर्तो. 8. N स्तोमरास्तानः.

स प्राकारो बृहद्वृक्षखण्डवृत्ता[1]श्ममण्डलैः ।
तद्विक्रमाणां शुशुभे रुण्डमुण्डैरिवावृतः ॥ ३१२ ॥
इति सज्जितदुर्गेऽस्मिन् सा पुरी रुरुधेऽभितः ।
त्वद्बलैर्द्वीपभूमीव पूरायातैर्नदीजलैः ॥ ३१३ ॥
स्थलीकृताऽऽशु परिखा प्राकारः[2] परिलङ्घितः ।
निष्क्रान्तश्रीः[3] कृतः शत्रुस्त्वत्सैन्यरजसैव सः ॥ ३१४ ॥
अपारेणोग्रनादेन तुरङ्गौघतरङ्गिणा ।
सा पुरी त्वद्बलौघेन वव्रे लङ्केव वार्द्धिना ॥ ३१५ ॥
प्राकाररक्षा[4]ग्रहणव्यसनव्यग्रकर्मणोः ।
प्रावर्तन्त रणारम्भा वीरसम्भारयोस्ततः ॥ ३१६ ॥
प्रौढं प्राकारमारोढुं ततोऽवतरितुं भुवि ।
रिपुच्छिदे शरैः पद्या इवोर्ध्वाधोमुखैः कृताः ॥ ३१७ ॥
प्राकारमौलिव्योमरथा ववृषुर्यन्त्रराशयः ।
पाषाणभारैरङ्गारैः क्षयाम्भोदा इव क्षितौ ॥ ३१८ ॥
सुरङ्गाभङ्गिभिर्वप्रभित्तिभागान् अपातयन् ।
त्वद्वीरा यन्त्रपाषाणैर्द्वाःकपाटान् अपाटयन् ॥ ३१९ ॥
भज्यमानो भवद्वारैः सज्यमानो निजैर्भटैः ।
वप्रः स प्रैक्षताभाग्यभाग्यमिश्रः पुमानिव ॥ ३२० ॥
परस्य तस्य रुद्धान्नजलस्त्वद्बलमण्डलः ।
उत्तमर्ण इव द्वारेऽधमर्णस्योद्यतः स्थितः ॥ ३२१ ॥
अथानङ्गतिथौ नक्तं मुक्तप्राकारविग्रहः ।
गूढप्रहितनिःशेषमित्रमन्त्रिविशारदः ॥ ३२२ ॥
एकद्विगायनयुतो द्वित्रिवैहासिकावृतः ।
सुखी त्रिचतुरश्लाघाचतुरः पञ्चषा[6]नुगः ॥ ३२३ ॥
सुप्तः पार्श्वेण पार्श्वस्थपुष्पप्रकरतारके ।
शशीव शरदम्भोदे तल्पे तारोत्तरच्छदे ॥ ३२४ ॥
चन्दनस्यन्दिदिग्धाङ्गः पुष्पस्रग्भङ्गभासुरः ।
वसानो वाससी तनूकृतेन्दुमहसी इव ॥ ३२५ ॥

Centre for the Arts

1. N °वृन्ता°. 2. NPBK प्राकारपरि°. 3. NPBK निःक्रांत°. 4. PBK °रक्षो°. 5. B The text beginning with °भित्प्र etc. of vs. 319 onwards upto °रचिन्नयत् ॥ i.e., the end of vs. 520 is lost, as the folios 12 to 18 are missing. 6. NPBK पंचशानुगः.

ऊर्ध्वप्रकोष्ठपाणिस्थमूर्धा वज्रायुधस्तदा ।
स्थितोऽनङ्गार्चनारङ्गदङ्गनादत्तदृग् मुदा ॥ ३२६ ॥
इत्यस्मिन् सम्मदामोदजितब्रह्मण्यमानसे ।
क्षयाम्बुद इव स्पर्धी कश्चित् कलकलोऽभवत् ॥ ३२७ ॥
प्रागुत्थित इवोत्थाय करस्फुरदसिस्फुरः ।
तदा वज्रायुधागारद्वार एव व्यलोक्यत ॥ ३२८ ॥
एकतो भवदत्ताद्या भानुवेगादयोऽन्यतः ।
भानुं भास इवोर्वीशास्तं वव्रुस्तीव्ररंहसः ॥ ३२९ ॥
उद्वसन्मूर्धजाः हृष्यद्रोमाणो रज्यदीक्षणाः[1] ।
तत्पुरः प्रास्फुरन्[2] वीरास्तेजोना राजितश्रियः ॥ ३३० ॥
सज्जीभूतं रथमथारुह्य मुह्य[3]द्भयोदयः ।
कटकद्वारभूवज्रार्गला वज्रायुधोऽभवत् ॥ ३३१ ॥
वर्धमानः क्रमेणाब्धेरिव वेलाविलासिनः ।
अतुलस्तुमुलः सोऽथ भीरुणां भयदोऽभवत् ॥ ३३२ ॥
नयने इव वेगस्य मरुतश्चरणाविव ।
त्वरितौ प्रणि[4]धी काण्डरात[5]काचरकौ तदा ॥ ३३३ ॥
पुरो दण्डपतेः श्रूयमाणमुद्वदनैर्जनैः ।
दूरदृष्टागतोत्तीर्णप्रणतावूचतुर्वचः ॥ ३३४ ॥
सम्प्रत्येव युधांदक्ष दक्षिणस्याः प्रतोलितः ।
निःससार बलासारः सारः समरकौतुकी ॥ ३३५ ॥
कोपारुणः कृतान्तस्य दृग् रुचीनामिवोच्चयः ।
मणिप्रणद्धसन्नाहः सोत्साहस्त्वामुपैति सः ॥ ३३६ ॥
निश्चित्याथ रणं प्रा[6]प्तं हर्षादङ्गानि दोष्मताम् ।
रोमाञ्चदण्डैः सन्नाहान् प्रहारस्पृहयाऽनुदन् ॥ ३३७ ॥
सह्य[7]मागतमेवेति दण्डाधिपतिदत्तया ।
अरीन् निरीक्ष्य धावन्तो[8] वीरास्तस्थुस्त्वदाज्ञया ॥ ३३८ ॥
आयान्ती वायुवेगेन रिपुसेनाऽब्धिवीचिवत् ।
मर्यादयेव त्वद्वीरवारेण स्खलिता ततः ॥ ३३९ ॥

---

1. K रज्यदक्षणाः. 2. N °स्फुरत्वारा°. 3. K मुग्ध°. 4. NP प्रणधी. 5. NPK कांडराव°. 6. K प्राप्यं. 7. K सद्य°. 8. NPBK धावतो.

SANS
891.23
PAD
IGNCA RAR
ACC No R-136

नीरन्ध्रोड्डीनकाण्डौघच्छन्नेन्दुकिरणे रणे ।
मणिसन्नाहविहितोद्योतेऽयुध्यन्त दोर्भृतः ॥ ३४० ॥
धूलिः[1] क्रुधेव मूर्धानमारोहन्ती पदाहता ।
रक्तै रुषेव वीराणां मूर्धोत्थैः क्षतजैर्युता ॥ ३४१ ॥
चमूभारनमद्भूम्युन्नमच्छेषफणाजुषाम् ।
रत्नानामिव तेजोभिर्वीरासृग्भिर्बभौ रणः ॥ ३४२ ॥
दृढासिदलनोत्थानां प्रवीरैर्बुबुधे युधि ।
सन्नाहरत्नलेशानां स्फुलिङ्गानां च नो भिदा ॥ ३४३ ॥
स कोऽपि समराटोपस्तदाऽजनि तथा यथा ।
प्रवेष्टुं शेक[2]तुर्नेह भयादिव जयाजयौ ॥ ३४४ ॥
इतश्चेतश्च वीराणां विरेजुरसयश्चलाः ।
दोलाधिरूढविजयश्रीलीलालोलवेणिवत् ॥ ३४५ ॥
इत्थं प्रवर्तमानेऽस्मिन् रणे वैरिबलोच्चयात् ।
निर्जगाम रथी कोऽपि प्रगे रविरिवार्णवात् ॥ ३४६ ॥
सक्रमेणाक्रमेणापि युध्यमानैर्धरा[3]धवैः ।
न[4] त्वद्बलं विशन् शेके रोद्धुं सिंह इव द्विपैः ॥ ३४७ ॥
कुत्र वज्रायुधः[5] कुत्र वज्रायुध इति ब्रुवन् ।
वीरान् वज्रायुधोऽस्मीति गिरा[6] कत्थवचीन्न सः ॥ ३४८ ॥
युवानं भानु[6]महसं दर्पिष्टं दर्पणं श्रियः ।
दोष्मन्तमन्तकमिव द्विड्बलानां महाबलम् ॥ ३४९ ॥
तमालोक्य समायातमग्रे वज्रायुधोऽरुधत् ।
चिरलब्धात्मतुल्यारिप्रवीरः प्र[7]धनोत्सुकः ॥ ३५० ॥
स तं प्रोवाच मद्दोष्णोर्भाग्यैरद्योदपादि यैः ।
दैवेन दर्शयाञ्चक्रे जयभोग्यो ययोर्भवान् ॥ ३५१ ॥
स्फुरत्स्वल्पपरीवारो वीरोत्तंस भवानिह ।
तन् मयापि मितैर्वीरैर्योद्धव्योऽसि यशोर्थिना ॥ ३५२ ॥
वज्रायुधे वदत्येवं स वीरो वीरमानिना ।
वत्रेऽ[9]नुपातिना पत्तिरधिसादिनिषादिना ॥ ३५३ ॥

---

1. K धूलि. 2. NPK सेकतु°. 3. NPBK वराधवैः. 4. NP drop न; K तं. 5. N drop कुत्र वज्रायुधः. 6. K गिरः. 7. N drops the text-portion from °महसं..of vs. 349 to धात्म°..of vs. 350. 8. NPBK °प्रवीरप्रधनो°. 9. P °तुपा°.

ततः प्रववृते युद्धं तस्य वज्रायुधस्य च ।
तृणप्रमाणप्राणानामन्येषामपि दोष्मताम् ॥ ३५४ ॥
निशाचरपिशाचादिकुलैकनयनोत्सवः ।
कृतप्रतिकृतक्रीडासमोऽभूत् समरस्तदा ॥ ३५५ ॥
वज्रायुधं च तं चारिं जयश्रीरगमन्मुहुः ।
तन्मार्गणगणापातसन्मुखोत्पातकौतुकात् ॥ ३५६ ॥
तत्र व्यतिकरे बाणक्षेपलाघवराघवः ।
जयश्रीकार्मणं शत्रोः कार्मुकं दण्डपोऽच्छिदत् ॥ ३५७ ॥
चाप[1]व्यापत्तिमुदितः स्मितधौतरदच्छदः ।
धुनानोऽन्यद् धनुर्धीरः सोऽथ वज्रायुधं जगौ ॥ ३५८ ॥
सुरासुरचमत्कारकारिवैरिपराक्रमाः ।
न मया समजीयन्त वज्रायुध युधः कति ॥ ३५९ ॥
न पुरा वपुराभोगसौम्य भीमं[2] त्वयेव मे ।
केनाप्यदर्शि कोदण्डदण्डखण्डनताण्डवम् ॥ ३६० ॥
तदिदानीं यथाशक्त्याधर[3] स्मर च देवताः ।
अयं न भवसीत्युक्त्वा[4] सोऽसङ्ख्यान् अक्षिपच्छरान् ॥ ३६१ ॥
कोदण्डमण्डलमयं तस्यादर्शि वपुस्तदा ।
नाथ त्वच्चक्रवीराणामिषुचक्रमयं पुनः ॥ ३६२ ॥
यो यो यदस्त्रमस्त्रज्ञश्चकर्ष त्वच्चमूचरः[5] ।
स स तेन समं तेन भुवि काण्डैरलोच्यत ॥ ३६३ ॥
कीनाशः किमयं किं वा रुद्रः कल्पा[6]न्तशल्यकृद् ।
किं मूर्तो मृत्युरित्यासीत् तत्र घ्नति[7]महारवः ॥ ३६४ ॥
यद्यद् उग्रं[8] करे वज्रायुधोऽप्यायुधमग्रहीत् ।
तत्तदैक्षत तत्काण्डवातेन तिलशः कृतम् ॥ ३६५ ॥
द्रुतभिन्नतनुत्राणास्तद्बाणा वज्रदण्डवत् ।
पपुर्वज्रायुधवपुःशोणितानि नता[9]ननाः ॥ ३६६ ॥
वीरोच्चये विचैतन्ये व्याकुले दण्डनायके ।
किं कृत्यमित्यहं चिन्तागृहं तत्र तदाऽभवम् ॥ ३६७ ॥

---

1. N वाप°. 2. NBK भीम. 3. N °चर. 4. NBK °त्युक्तो. 5. NPBK °वरः.
6. NPBK कल्यांत°. 7. NP घ्नति°. 8. NBK °दुग्रकरे. 9. N नतोननाः.

हा द्विड्[1]भयं तदोद्भूतं बालारुणजुषोऽपि मे ।
सुधाकुण्डतटस्थस्य निर्मतेर्मृत्युभीरिव ॥ ३६८ ॥
क्षणेऽत्र कोपसंरक्तनेत्रसंरम्भभीषणः ।
ह्रादेन ह्रेपयन् वज्रमरिं वज्रायुधो जगौ ॥ ३६९ ॥
अरेरेऽतिप्रस[2]क्तोऽसि पश्य मामेष ते बलम् ।
बालारुण इव ध्वान्तं रंहसा संहराम्यदः ॥ ३७० ॥
अरेरे किङ्कराश्चक्रं परमास्त्रं समर्प्यताम् ।
इति ब्रुवंश्च चक्रेऽसौ पश्चात् पाणिं चलाङ्गुलिम् ॥ ३७१ ॥
तया बालारुणोक्त्याऽथ सञ्जातस्मरणस्तदा ।
अहं सहर्षः सोत्कर्षरोमहर्षोच्चकञ्चुकः ॥ ३७२ ॥
बालारुणाङ्गुलीयं तत् समादाय समुद्गकात् ।
क्षिप्तवानस्मि तं पाणिं तं धृत्वाऽङ्गुलिपल्लवे ॥ ३७३ ॥
आलिङ्गत्यङ्गुलीयेऽथ तस्मिन् वज्रायुधाङ्गुलिम् ।
द्राक् क्षिप्तास्तत्क्षणादर्धपथे पेतुररेः शराः ॥ ३७४ ॥
बालारुणस्य तस्यांशुपटलेऽथ प्रसर्पति ।
अवस्वापोऽभवत् सद्यः कैरवेष्विव वैरिषु ॥ ३७५ ॥
कुचकुम्भानिव स्त्रीणां कुम्भानालिङ्ग्य कुम्भिनाम् ।
रतक्लान्तैरिवासादि सादिभिर्दृङ्[3]निमीलना ॥ ३७६ ॥
पर्याणो[4]पर्यपि स्वापरसमापुस्तुरङ्गिणः ।
विषमेऽपि समेत्येवं[5] निद्रा नयनवल्लभा ॥ ३७७ ॥
रणोच्छल[6]च्छरभ्रष्टवाजिराजिलवैर्मृदौ ।
पृष्ठे[7] रथानां रथिनः सुखिनः सुषुपुस्तमाः ॥ ३७८ ॥
भग्नवैषम्यभावास्तु वपुःपतनभारतः[8] ।
रुण्डमण्डलवेदीषु स्वापमापुः पदातयः ॥ ३७९ ॥
एवं विडम्बनापात्रं शत्रु[9]वर्गं विलोकयन् ।
विस्मय[10]स्मेरनयनः स्वयं वज्रायुधस्तदा ॥ ३८० ॥

---

1. NPBK द्विद्भयं. 2. NPK °प्रशक्तो°. 3. NPBK °दृक्निमीलना. 4. N पर्ण्याणा°. 5. P समेत्येव. 6. NP रणोछल°. 7. NK पृष्टे. 8. NPK भारत. 9. NK शत्रुवर्गं. 10. NPK विस्मयं.

अङ्गुलीयप्रभावेन भग्न[1]प्रधनमूर्च्छनैः ।
सवयोभिः समं वीरैः कैश्चित् प्रचलितोऽग्रतः ॥ ३८१ ॥
कन्दर्पमिव रूपेण मार्तण्डमिव तेजसा ।
तं वैरिणं वीरवरं रथे निद्राणमैक्षत ॥ ३८२ ॥
सुप्तयुद्धोचिताशेषसैन्यस्यारेः समीपगाम् ।
अलब्धनिद्रामद्राक्षीच्चामरग्राहिणीमसौ ॥ ३८३ ॥
कोऽयं युव[2]तमः शक्रोपम[3]विक्रमभाजनम् ।
अयमुत्तीष्ठतीत्यस्मान्[4] सुप्तोऽपि त्रासयत्यसौ ॥ ३८४ ॥
क्षत्रियोऽपि त्रिजगतीं जेतुं शक्तोऽपि लीलया ।
किमेष क्षणदायुद्धं व्यधाद् अक्षत्रियोचितम् ॥ ३८५ ॥
पृष्टा वज्रायुधेनेदं वर्षन्ती चाक्षुषैर्जलैः ।
सा चामरधरा दुःखनिश्वासवदनाऽवदत् ॥ ३८६ ॥
रिपोरस्मिन् पराभूतिं तरणौ तिमिरादिव ।
पश्यन्ती स्फुरदाश्चर्यदुःखार्त्ता निगदामि किम् ॥ ३८७॥
तथापि श्रूयतां स्तूयमानो द्वीपालिपालिभिः ।
सिंहलद्वीपभूमीपश्चन्द्रकेतुरितीरितः ॥ ३८८ ॥
मूर्ध्ना दधति यस्याज्ञां वीरा द्वीपालिपालिनः ।
शेषामिवेष्टदेवस्य श्रीस्थिरीकारकारणम् ॥ ३८९ ॥
असौ समरकेतुस्तत्पुत्रः सर्वत्र विश्रुतः ।
विक्रमेण[5] क्रमेणाथ विनयेन नयेन च ॥ ३९० ॥
न तच्छास्त्रं न तच्छस्त्रं न सा केलिर्न सा कला ।
यत्रास्य विश्वमित्रस्य न विश्रान्तः परिश्रमः ॥ ३९१ ॥
आकस्मिकप्रपातेन वीरेणानेन वैरिणः ।
शमयाञ्चक्रिरे के न पवनेनेव दीपकाः ॥ ३९२ ॥
एकोऽपि कोटिशः शत्रून् अयं दलयितुं क्षमः ।
ख्यातिं सिंह इव प्राप सिंहलक्ष्मापनन्दनः ॥ ३९३ ॥
उग्रेऽस्मिन् विग्रहे जाते राजा कुसुमशेखरः ।
श्रीचन्द्रकेतुमभ्यर्च्य साहाय्यायेनमानयत् ॥ ३९४ ॥

---

1. NP भग्न°. 2. N सुव°; K सुप्त°. 3. P °यम° 4. PK °स्मात्. 5. NK drop °क्रमेण after वि°.

मन्मथस्य तिथावद्य निरवद्यविभूषणः ।
जगाम कामदेवस्य देवागारमयं प्रगे ॥ ३९५ ॥

तत्रायं गच्छदागच्छन्मृगाक्षीवर्गवीक्षणैः ।
नयने रमयामास गमयामास वासरम् ॥ ३९६ ॥

हृदयानन्दकन्दर्पनवोत्सवकुतूहली ।
आजगाम न यामिन्यामप्ययं निजमालयम् ॥ ३९७ ॥

अकस्मादेत्य यामिन्या यामे धामनि सम्भ्रमी ।
बलात्ययमथारातिशमनः समनीनहत्[1] ॥ ३९८ ॥

मन्त्रिभिर्वार्यमाणोऽपि धार्यमाणोऽपि बन्धुभिः ।
दैवादयमिहापत्य प्रत्यपादीदृशीं दशाम् ॥ ३९९ ॥

इत्यालपन्त्यामेतस्यां ध्वान्तकान्तारपावकः ।
प्राचीनाचलचूलाग्रचुम्बि[2]बिम्बोऽभवद् रविः ॥ ४०० ॥

अरे वज्रायुध युद्धं मुञ्च मूढ म्रियस्व मा ।
मृतानां पुनरावृत्तिः क्वेत्याटोपेन जल्पता ॥ ४०१ ॥

सद्यो विद्राणनिद्रेण द्रुतं समरकेतुना ।
अथोपस्थे रथोपस्थाच्चलपाटलचक्षुषा ॥ ४०२ ॥

दृष्ट्वाऽथ निपुणालोकी रिपुणाऽऽत्मानमावृतम् ।
जितंमन्यो गलन्मन्यु[3]रयं जज्ञे नताननः ॥ ४०३ ॥

सन्मान्य महतां मान्यमेनं वज्रायुधस्ततः ।
रथमारोप्य सारथ्यमवाप्यालयमानयत् ॥ ४०४ ॥

कुमारं तुलङ्गताशैला गन्धतैलाभिमर्दितम् ।
तं मल्लाः स्नपयामासुरनुष्णाशीतलैर्जलैः ॥ ४०५ ॥

अथात्तधौतचीरेण[4] वीरेण विमला[5]त्मना ।
प्रशान्तमनसा तेन प्रतेने देवतार्चनम् ॥ ४०६ ॥

अथ वज्रायुधेनात्तव्यजनः स्वजनैः समम् ।
असौ षड्समाहारं बुभुजे[6] भुजभृद्वरः ॥ ४०७ ॥

तृप्तमेकरसस्वादसुधाहारोपहासिनम् ।
ताम्बूलालेपनेपथ्यैस्तमथानर्च दण्डपः ॥ ४०८ ॥

---

1. NK समनानहत. 2. N °वुंबि°; K °बुंबि°. 3. NK °मत्यु°. 4. K °वीरेण. 5. K धिमला°. 6. K बुजुजे.

हृद्वर्तिरणदुःखौघापह्नवोल्लासितस्मितम् ।
जगौ वज्रायुधो बद्धाञ्जलिस्तं विनयानतः ॥ ४०९ ॥
वीरकोटीर को नाम विक्रमेऽस्तु समस्त[1]व ।
त्वया हतानां वीराणां मुञ्चत्यर्धासनं हरिः ॥ ४१० ॥
शौर्यादिगुणहीनस्ते समः कल्पद्रुमोऽपि न ।
भूभोगमिच्छतां दत्से द्युभोगं हि द्विषामपि ॥ ४११ ॥
मरुच्चरति भोगीन्द्र भोगेन्द्रगजहस्तयोः ।
यदन्तस्तत् तयोरन्तःसारेण त्वद्भुजौ कृतौ ॥ ४१२ ॥
वीरशान्तरसौ मिश्रीभूयाभूतां भवद्दृशौ ।
पृथग्भावेन पश्यन्तौ वीरावीरमयं जगत् ॥ ४१३ ॥
किं वा बहूदितेनेह गुणशौर्यशमादिभिः ।
न[2] भवत्सन्निभः कोऽपि सुरासुरनरादिषु ॥ ४१४ ॥
युधे वज्रायुधेनाहं मर्त्यकीटेन निर्जितः ।
विश्वाजेय गुणामेय मेयमस्तु खिद्रा तव ॥ ४१५ ॥
पश्य पश्य महाभाग्यदृश्यं स्वजयकारणम् ।
इत्यङ्गुलीयं तस्मै स बालारुणमदीदृशत् ॥ ४१६ ॥
तद्विलोकनमात्रेण गात्रे तत्सैन्यदोष्मताम् ।
महाप्रहारजः क्लेशः सद्य एव व्ययं गतः ॥ ४१७ ॥
प्रभाभिरङ्गुलीयस्य प्रभावैश्च चम[3]त्कृतः ।
कुमारः स विसस्मार पराजयभवां शुचम् ॥ ४१८ ॥
दिशन् बालारुणावाप्तिं श्रीसेवारम्भसम्भवाम् ।
तमथानन्दयन् दण्डपतिस्त्वच्चरितैर्विभो ॥ ४१९ ॥
त्वत्साहसोक्तिकल्लोलविलोलवदनाम्बुजम् ।
आलपत् तं पुनर्दण्डपतिर्विनयगौरगीः ॥ ४२० ॥
मम क्षमस्व तद् वीर तेने यत् तव विप्रियम् ।
मया जयार्थमक्षत्रोचितं दुर्बलबाहुना ॥ ४२१ ॥
इयं श्रीरयमप्यात्मा त्वदधीनतमौ मम ।
क्षत्रचूडामणे यत्र स्पृहा तत्र गृहाण तत् ॥ ४२२ ॥
नृसिंह सिंहलद्वीपं काञ्चीं वा गन्तुमिच्छसि ।
सम्यक् समं समागत्य क्व त्वां मुञ्चामि कथ्यताम् ॥ ४२३ ॥

1. N °स्त्व. 2. NP त. 3. NK ठमत्कृतः.

निर्विकल्पमिदं जल्पत्य[1]ल्पभाषिणि दण्डपे ।
वचः प्रचितपीयूष[2]स्वाद[3]मादत्त भूपभूः ॥ ४२४ ॥
वज्रायुध कथं शौर्यवज्रायुध वदस्य[4]दः ।
जगत्यास्ते समस्तेऽपि कस्ते समगुणः पुमान् ॥ ४२५ ॥
तादृक्समरसंरम्भनिर्दम्भभुजविक्रमः ।
जितकाशिनमात्मानं दिशस्यजित[5]काशिनम् ॥ ४२६ ॥
मेघवाहनभूपालप्रतापतपनस्य ते ।
पादान् दधति के नाम न मूर्धसु महीभृतः ॥ ४२७ ॥
भवद्गीतामृतैः क्षीणविषा[6] विषभृतोऽभवन् ।
अनिमेषदृशोऽप्यासन् सुखमीलितचक्षुषः ॥ ४२८ ॥
दुर्वृत्तभूपदलनाधानैर्दानैश्च कैश्चन ।
विश्वं विश्वम्भराचक्रं चक्रे प्रीतिमयं त्वया ॥ ४२९ ॥
विश्वविश्वोपकारिन् मे तत् कुरूप[7]कृतिं कृतिन् ।
मेघवाहनपादाब्जसेवावसरदानतः ॥ ४३० ॥
इत्युक्तवन्तं सम्मान्य तमिलानाथनन्दनम् ।
दण्डेशः प्रेषयामास स्वामिन् इह मया सह ॥ ४३१ ॥
श्रीचित्तहरणौ युष्मच्चरणौ पद्मवत् प्रभो ।
शेखरीकर्तुमुत्कोऽयमुद्यानेऽस्ति कृतास्पदः ॥ ४३२ ॥
इत्थं कथामथाकर्ण्य कर्णयोरमृतं नृपः ।
मुदमभ्यधिकां प्राप पुत्रजन्मोत्सवादपि ॥ ४३३ ॥
तादृ[8]ग्वीरवरालोकौत्सुक्योत्फु[9]ल्लविलोचनः ।
ऊर्ध्वं पुरः प्रतीहारं हरदासमथादिशत् ॥ ४३४ ॥
व्यक्ता तवास्ति भक्तिर्या कुमारे हरिवाहने ।
तां विशेष्यैतदास्थानं तं वीरं तूर्ण[10]मानय[11] ॥ ४३५ ॥
इति क्षिती[12]न्दोरादेशमासाद्यामन्दसम्मदः ।
तं कुमारमगाद् दण्डी जवोद्दण्डीभवद्गतिः ॥ ४३६ ॥
तं प्रणम्याह्वयन् भक्तिभारतीं स बभार ताम् ।
भेजे तद्भटभारोऽपि चमत्कारोदयं य[13]या ॥ ४३७ ॥

---

1. K °त्प°. 2. NK °पियूव°. 3. N °स्वाद°. 4. K वदस्पदः. 5. K °स्पजित°. 6. N °विंषा. 7. NK °कूरूप°. 8. NPBK °तादृक्°. 9. NP °त्पुल्ल°. 10. K नूर्ण°. 11. N °मानय. 12. N क्षितींदो°. 13. NPBK ययौ.

शृङ्गारजितशृङ्गारयोनिः परिजनावृतः ।
सम्मुखाभ्या[1]पतद् भूरि भूपालपरिवारितः ॥ ४३८ ॥
आनन्दयन् विदग्धेन धीरेण मधुरेण च ।
विलोकितेन विदुषो वीरान् वरवधूरपि ॥ ४३९ ॥
पथा पुरःसरद्दण्डीमण्डितेनागमत् ततः ।
रङ्गत्तुरङ्गो भूनाथभवनं चन्द्रकेतुभूः ॥ ४४० ॥
विमुक्ताग्रपथालोकैस्तारकैरिव भास्करः ।
प्रदेशं प्राप्तवान् सोऽथ मेघवाहनभूषितम् ॥ ४४१ ॥
दृङ्[2]मार्गमयमागत्य कुमारेन्द्रः कृतानतिः ।
गत्वा प[3]दान्ते भूनाथमाह्वयन्तं ननाम च[4] ॥ ४४२ ॥
पुत्रस्नेहाधिकेनामुं स्नेहेनालिङ्ग्य पार्थिवः ।
आदिदेशास्य सर्वेषां पीठं धुरि धराभुजाम् ॥ ४४३ ॥
तन्मुखेन्दुद्युतिसुधां चिरं पीत्वाऽथ भूपतिः ।
आदिष्टविष्ट[5]रस्तं वाक्पी[6]यूषं समपाययत् ॥ ४४४ ॥
वीरप्रकाण्ड मत्पुण्यताण्डवाडम्बरो महान् ।
वित्तं वीररसस्येह येनाकार्षि भवानपि ॥ ४४५ ॥
दक्षिणापथयात्रा मेऽधिका कल्पद्रुमादपि ।
भवान् फलं ययाऽदायि लोकोत्तरमचिन्तितम् ॥ ४४६ ॥
रत्नशैलाप्तलीलायाः पितृराज्यश्रियो यथा ।
मनस्तेऽऽकर्षि मत्पुत्रमित्रलब्धिर्जयत्यसौ ॥ ४४७ ॥
स्वास्थ्ये यस्येदृशी मूर्तिर्मु[7]नेरिव शमैकभूः ।
रणाटोपे च तत्तेजो दावाग्निरिव दुःसहम् ॥ ४४८ ॥
स त्वं सुदुर्लभो भाग्यैस्त्रिलोकस्वाम्यदैरपि ।
मित्रं येनाद्य लब्धोऽसि तं स्तवीम्यङ्गजं निजम् ॥ ४४९ ॥
इत्युक्त्वा वलित[8]ग्रीवः पार्श्वदेशनिवेशिनम् ।
उवाच नन्दनं मेघवाहनो हरिवाहनम् ॥ ४५० ॥

---

1. K °भ्यायत°. 2. NPBK दृग्मार्ग°. 3. P पंदांते. 4. K व. 5. NPBK °विस्तर°. 6. K °पायूषं. 7. NBK °मुनि.° 8. K थलित°.

स्वयं हर्षाश्रुभिर्दत्ताचमनं परम् आत्मनः ।
हृदीमं सुहृदं वत्स दृग्द्वारेणाशु वेशय ॥ ४५१ ॥
सुधांशुः सु[1]लभो नाके नागलोके सुधारसः ।
सुहृदेकस्तु सर्वत्र दुर्लभः सर्वतापभित् ॥ ४५२ ॥
सुधांशुमपि विद्वेष्टि त्यजेद् दूरे प्रियामपि ।
रथाङ्गः सुहृदा तीव्रच्छविनाऽपि विनाकृतः ॥ ४५३ ॥
अ[2]यं तुल्यवया वीरः कलाशालागुणालयः ।
सुहृत्तया भवद्भाग्यैर्मन्मथस्येव चन्द्रमाः ॥ ४५४ ॥
वर्तनीयं तथाऽमुत्र पुत्र स्यात् पश्यतां यथा[3] ।
अनयोरनुजन्मा कः कोऽग्रजन्मेति संशयः ॥ ४५५ ॥
इत्या[4]ज्ञां पितुरादाय पाणिभ्यामिव सम्मदी ।
संयोजिताञ्जलिव्याजात् कुमारः शिरसि न्यधात् ॥ ४५६ ॥
विसृज्याथ सभां भूपे कृत्यान्तरकृतोद्यमे ।
गन्तुं पर्याकुले राजसपर्याजनने जने[5] ॥ ४५७ ॥
कुमारो नभसीवोद्यद्बिम्बः समरकेतुना ।
मन्दिरं मदिरावत्या जगाम प्रणनाम ताम् ॥ ४५८ ॥
मातुर्विज्ञातवृत्तान्तमवाप्तमणिभूषणम् ।
तमादाय स्वमावासमभ्युवास नृपात्मजः ॥ ४५९ ॥
तेन सिंहलसिंहेन समम[6]न्यैश्च राजभिः ।
चकार राजभूः स्नानभोजनादिविधीन्[7] सुधीः ॥ ४६० ॥
सुदृष्टिर्नृपदिष्टोऽक्षपटलाधिकृतस्तदा ।
सक[8]श्मीरं कुमाराय दत्तवान्[9] उत्तरापथम् ॥ ४६१ ॥
ददौ समरकेतोश्च सर्वदायसमन्वि[10]तान् ।
देशान् अङ्गसुखान् अङ्गजीवने जीवितं श्रियः ॥ ४६२ ॥
चिन्तयाऽपि भवेत् क्लेश इत्यसंस्पृष्टमेतयोः ।
समस्तमर्थमुर्वीशः प्रसन्नो निखिलं व्यधात् ॥ ४६३ ॥

---

1. NPBK सुधांशुसुलभो. 2. NK अय. 3. NPK यथाः. 4. NPK इत्याज्ञा. 5. NK जते. 6. P °मत्यै.° 7. PK विधीरसुधीः. 8. NPK °कस्मीरं. 9. PK °तुत्तरा.° 10. P समत्वितान्.

स्वतोऽप्यधिकविश्वासैर्मानुषैर्मदिरावती ।
त[1]त्कार्यभोजनाद्यङ्गसङ्गतं सततं व्यधात् ॥ ४६४ ॥
असतीमर्जितुं केचित् केचित्[2] स्थिरयितुं सतीम् ।
गतां च केचिदानेतुं प्रतिष्ठां तौ सिषेविरे ॥ ४६५ ॥
आकलय्य कलाचार्याः कलौघा[3]तृप्तिमेतयोः ।
इत्यदूराद् अलञ्चक्रुः सभां प्रतिभयान्विताः ॥ ४६६ ॥
इमौ कुमारकोटीरौ जातौ हेतुर्जगन्मुदाम् ।
मिथः प्रसादन[4]परौ शरत्कालविधू इव ॥ ४६७ ॥
अभूत् परस्परोत्कर्षहेतु वर्तनमेतयोः ।
अलङ्कारस्थितस्वर्णरत्नयोरिव दीपयोः ॥ ४६८ ॥
ग्रीष्मेऽन्येद्युः कुमारेन्दुः शेषनिर्मोकनिर्मले ।
वसानो वाससी मत्तकोकिलोद्यानमीयिवान् ॥ ४६९ ॥
पर्यायमीलिभिः पद्मै कैरवैश्चे[5]क्षणैरिव ।
सरयूरपि यद्रूपं पश्यन्ती सुखमन्वभूत् ॥ ४७० ॥
विज्ञानातिशयभ्राजमानं तत्राम्बुमण्डपम् ।
प्राविशद् विस्मयोत्फुल्ललोचनः क्ष्मापनन्दनः ॥ ४७१ ॥
ज्ञातसेवाक्षणायातराज[6]लोकपरिच्छदः ।
आसामासात्र संसारसर्वस्व इव भूपभूः ॥ ४७२ ॥
कलासु कुशलाः शास्त्रचतुरा मधुरा गिरि ।
समारभन्त सामन्तसुताः काव्यविचारणाम् ॥ ४७३ ॥
केष्वप्युच्चैरलङ्कारकलितानि मृदूनि च ।
प्रियाङ्गानीव काव्यानि स्मृत्वा धूनत्सु कन्धराम् ॥ ४७४ ॥
क्रियाकारकगुप्तानि मन्त्रणानीव मन्त्रिणाम् ।
केषुचिद् राजपुत्रेषु विमृशत्सु मुहुर्मुहुः ॥ ४७५ ॥
कलनर्मकलाभिज्ञः सम्मतः सर्वसंसदः ।
जगाद मञ्जु मञ्जीरः कुमारं सुकुमारवाक् ॥ ४७६ ॥
अनेकतरुणोत्सेकपात्रं यात्रां विलोकितुम् ।
अनङ्गभवनेऽनङ्गत्रयोदश्यामगामहम् ॥ ४७७ ॥

1. N त्वत्कार्य.° 2. N केचिन्. 3. P कलौषा.° 4. NPBK °प्रासादम.° 5. NPBK °श्रक्षणै°
6. NK °रज°.

कर्पूरच्छु[1]रितां शस्तकस्तूरीलिखिताक्षराम् ।
दत्तकश्मी[2]रजरजश्चन्दनस्यन्द[3]मुद्रिकाम् ॥ ४७८ ॥

समुद्रामरुणाशोक[4]तलाप्तां भूर्जपत्रिकाम् ।
उन्मुद्र्य रहसि स्थित्वा कौतुकात् तामवाचयम् ॥ ४७९ ॥

अदत्तां गुरुभिर्वोढुं वाञ्छंस्त्वमचिरेण माम्[5] ।
गन्तासि वृक्षगहने तत्र पार्श्वस्थितानलः ॥ ४८० ॥

श्लोकस्य परमेतस्य[6] परमार्थमवैमि न ।
विरागे चा[7]नुरागे च समानगमनस्पृशः ॥ ४८१ ॥

अथान्येषु कुमारेषु विमर्शान्दोलितात्मसु ।
जगावगाधवाग्बुद्धिवाहनं हरिवाहनः[8] ॥ ४८२ ॥

कयोश्चित् कन्यकायूनोर्वनं किञ्चिदुपेयुषोः ।
दर्शनं चानुरागश्च परस्परमजायत ॥ ४८३ ॥

युवा याचंस्तद्गुरुभ्यः कन्यां नाप कथञ्चन ।
अपहारादिनेष्टं[9] तमुद्वोढुं सैवमब्रवीत् ॥ ४८४ ॥

आद्यमेव वने यत्र जातं दर्शनमावयोः ।
तिष्ठेस्तत्र त्वमेकाकी वह्निमादाय सन्निधौ ॥ ४८५ ॥

तदानीमहमेष्यामि तत्र मां सुभगोद्वहेः ।
अन्तरेणापहारादिक्लेशलेशमशङ्कितः ॥ ४८६ ॥

ध्रुवमेवैतदीदृक्ष[10]लेखप्रेषणकारणम् ।
सम्भाव्यतेऽमुनार्थेन विरागध्वनन[11]नं पुनः ॥ ४८७ ॥

मा लेखहारिका लेखं ममोन्मुद्र्य[12] कदाचन ।
कार्षीद् रहस्यस्फुटनं वैदग्ध्यं चैष वेत्तु[13] मे ॥ ४८८ ॥

साधु साधु कुमारस्य सन्दि[14]ग्धार्थविवेचनम् ।
प्रज्ञायाः पाटवं किञ्चिचकास्ति भुवनोत्तरम् ॥ ४८९ ॥

वाणीविभ्रमकश्[15]मीरे मञ्जी[16]रे निगदत्यदः ।
अन्येषु च कुमारेषु विना समरकेतुना ॥ ४९० ॥

---

1. NK °रच्छुरितां. 2. NPK °करमीर°. 3. NK °स्येद°. 4. N °शौक.° 5. N drops माम. 6. N drops परमेतस्य. 7. NPK वा°. 8. N हरिवाहत:. 9. NPK °नेवृंत°. 10. K °तदावृक्ष°. 11. K °ध्वनन. 12. N °मनोन्मु°; PK °न्यु°. 13. NPK चेत्तु. 14. NK सदिग्धा°. 15. NPK °कस्मीरे. 16. NK मजीरे.

अभूत् समरकेतोस्तु विषादविषमं मुखम् ।
प्रतिबिम्बितकालुष्यमणिदर्पणविभ्रमम् ॥ ४९१ ॥
वहद्वहलनिः[1]श्वासमरुज्जाततपागमम् ।
मन्दानुपातानुकृतसावग्रहघनाघनम् ॥ ४९२ ॥
तथाविधं तमाचष्ट कलिङ्गाधिपतेः सुतः ।
हसन् कमलगुप्ताख्यः कुमारस्यातिसम्मतः ॥ ४९३ ॥
स्वप्रज्ञया कुमारेण राजलोक इवात्र[2] किम् ।
न रञ्जितः शतमुखो भूत्वा यत्[3] स्तौषि नोन्मुखः ॥ ४९४ ॥
मञ्जीरः पत्रिकां हृत्वोद्वाहं विहतवान् ययोः[4] ।
तयोर्दुःखेन निर्धूतप्रमोदोऽभूः किमी[5]दृशः ॥ ४९५ ॥
इत्यादिनर्मवचनैर्हसतो राजनन्दनान्[6] ।
कोऽयं विप्लव इत्युक्त्वा रुद्ध्वाऽऽह हरिवाहनः ॥ ४९६ ॥
बन्धो समरकेतो त्वं कच्चित् क्वचिदपीदृशः ।
प्रबन्धस्याभवः पात्रं तदेतेनाधुनाऽस्मरः ॥ ४९७ ॥
इत्युक्तः समरकेतुरुत्तरीयेण लोचने ।
परिमृज्याश्रुकलिते स स्माह हरिवाहनम् ॥ ४९८ ॥
सामान्येन परिज्ञातमर्थं स्वप्रज्ञया तव ।
ब्रुवाणोऽहं विशेषेण नेष्यामि पुनरुक्तताम् ॥ ४९९ ॥
सिंहलानामलङ्कारं रङ्गशालाख्यपत्तनम् ।
अनुशास्ति गलत्तन्द्रश्चन्द्रकेतुः[7] पिता मम ॥ ५०० ॥
देशकालाद्यवष्टम्भसम्भृताहंयुताभृतः ।
पूर्वप्रपन्नमप्यर्थसार्थदायमयच्छतः ॥ ५०१ ॥
असमागमने हेतून् आह्वाने वदतो बहून् ।
उक्त्या दर्शयतः प्रीतिं युक्त्या प्रातीप्यकारिणः ॥ ५०२ ॥
सुवेलनिकटान् दुष्टसामन्ताननुशासितुम् ।
कदाचन तरीसैन्यं निर्दैन्यं समनीनहत् ॥ ५०३ ॥ विशेषकम् ॥
यथाशक्तिकृतानेकशास्त्रशास्त्रपरिश्रमम् ।
राजेन्दुर्यौवराज्ये मां न्यस्य तस्याधिपं व्यधात् ॥ ५०४ ॥

---

1. NPK °निश्वास°. 2. N इवान्न. 3. NPK यस्तौषि. 4. K पयोः. 5. NK किनीदृशः
6. NK °नन्दनात्. 7. NK °श्चंद्रकेतुं.

अर्पितानल्पपादातसामन्तामात्य[1]भूमिपम् ।
पुण्येऽहनि हतापायशुभाय प्रजिघाय माम् ॥ ५०५ ॥
भृङ्गारीकारित[2]स्नानः कृतप्रकृतमङ्गलः ।
काशाभवासाः सर्वाङ्गमुक्ताभूषणभूषितः[3] ॥ ५०६ ॥
वज्राङ्कुशाभिधानेन महा[4]मात्रेण सज्जितम् ।
अहमारोहममर[5]वल्लभं गन्धसिन्धुरम् ॥ ५०७ ॥
दृढावनद्धतूणीरबन्धुरस्कन्धदुर्धरः ।
समाश्लिष्टधनुर्यष्टिमध्यः सव्येन पाणिना ॥ ५०८ ॥
सलीलललनोद्धूयमानचामरडम्बरः ।
वैतालिककुलोद्घुष्यमाणम[6]न्द्रजयध्वनिः ॥ ५०९ ॥
सुकृताम्भोधिसम्भूतं नि[7]ष्कलङ्कमिवोडुपम् ।
अहीयमानः बिभ्राणः शुभमातपवारणम् ॥ ५१० ॥
लभमानः कुलस्त्रीणामाशीराशीन्[8] पदे पदे ।
मङ्गलातोद्यनिर्घोषैः श्रियमाकर्षयन्निव ॥ ५११ ॥
वराहवाहपञ्चास्यकाश्य[9]पीप्रमुखैर्ध्वजैः ।
सयादसं नभाम्भोधिं कुर्वाणो निरगां पुरः ॥ ५१२ ॥
उच्चावचकरकूटेषु सरसां पालिषु द्रुषु[10] ।
द्रष्टुमारुरुहुर्ग्राम्या अकस्मात् सैन्यमागतम् ॥ ५१३ ॥
व्यपदिश्योपदामात्रं द्रष्टुमेव समागतान् ।
सत्कुर्वन् ग्राम्यानाजन्मस्मर्तव्यैरुचितोच्चयैः ॥ ५१४ ॥
फेनमुक्ताफलस्रग्भिः सह सञ्जातजन्मभिः ।
सुरैरिव विराजद्भिः कल्लोलैः कलितोत्सवम् ॥ ५१५ ॥
विमुक्तिसुखसारस्य संसारस्य च साधुभिः ।
निर्नीत[11]मेकदृष्टान्तमदृष्टान्ततया पुरः ॥ ५१६ ॥
अदर्शं दर्शनीयानां चन्द्र[12]मद्युद्रुमश्रियाम् ।
एकां जन्मभुवं पारावारमारचितारवम् ॥ ५१७ ॥

---

1. K °मान्य°. 2. NPK °कारितः. 3. N °भूषित. 4. K मदामात्रेण. 5. K °बल्लभं. 6. K °मिंद्र°. 7. NPK निःकलंक°. 8. K °स्पदे. 9. NP °कास्यपी°; K °कास्यपि°. 10. NK द्रुषु. 11. N तिर्नीत°. 12. NPBK चेद्युम°.

तत्तटे कटकावासः प्रक्लृप्त[1]पटमण्डपः ।
रुचिराचिरजातत्वाद् अभूद् दिव्यपुरो[2]पमः ॥ ५१८ ॥
निखातनिश्चलस्थूणाबद्धवेणुदलवृतिम् ।
राजचिह्न[3]कृतोल्लासं स्वावासं श्रितवानहम् ॥ ५१९ ॥
वैधुर्यं विगणय्या[4]हं पितृ[5]पादवियोगजम् ।
दिग्देशग्रहणोपायं सहामात्यैरचिन्त[6]यम् ॥ ५२० ॥
आसन्नवेलाकूलेभ्यः पोताननाययन्न[7]हम् ।
द्वित्राण्य[8]हानि तत्रास्थां लोकांश्च प्रतिपालयन् ॥ ५२१ ॥
अन्येद्युः पुष्पनैवेद्यवासोलङ्करणादिभिः ।
नरैस्तदाचारपरै रत्ना[9]करमपूजयम् ॥ ५२२ ॥
पटहेषु प्रयाणाय रट[10]त्सु विकटस्वरम् ।
कार्यजातैरतिक्रान्तभूयिष्ठायां तदा निशि ॥ ५२३ ॥
अवतारभुवं सिन्धोः सैन्यजाते समेयुषि ।
मुक्ततल्पोऽल्पपादात[11]मागमं बाह्यमण्डपम् ॥ ५२४ ॥ युग्मम् ॥
इन्द्रनीलच्छविच्छायं मूर्त्यन्तरमिवाम्बुधेः ।
दधानं वदनेनेन्दुमित्राश्रितपितृश्रियम्[12] ॥ ५२५ ॥
दधा[13]नं चन्दनस्यन्दलेखामलिकमालिनीम् ।
तरीमिव जनस्याक्ष्णां लावण्याम्बुनिमज्जताम् ॥ ५२६ ॥
दधतं मूर्धजान् मूर्ध्नि मालती[14]प्रसवान[15]पि ।
श्यामा[16]श्यामतया क्लृप्त[17]परभागान् परस्परम् ॥ ५२७ ॥
दधानमधरं शोणमपि ताम्बूलरञ्जितम् ।
श्यामदेहप्रभाम्भोधाविव विद्रुमकन्दलम् ॥ ५२८ ॥
गैवेयकेन सुव्यक्तानेकमौक्तिकपङ्क्तिना ।
भ्राजमानमतिश्याममम्भो[18]धिमिव सेतुना ॥ ५२९ ॥
दधानं हृदये[19] हारं प्राकारं हृ[20]द्गुणावलेः ।
फेनपुञ्जमिवासक्तमम्भोधितरणक्षणे ॥ ५३० ॥

---

1. NPK प्रक्लृप्त°. 2. NPBK °पुरोगमः. 3. K °चित्र°. 4. NK °य्याह. 5. N पितृ°. 6. K °चिन्तयत्. 7. K °यत्नहं. 8. K °प्यहानि. 9. K रत्नाकर°. 10. N रटन्सु. 11. NPBK °पादांत°. 12. K °श्रयम्. 13. NK दधानि. 14. N मालत्री°. 15. NK °प्रसवातपि. 16. B °मापाश्याम°. 17. NBK क्लृप्त°. 18. NK °नंभोधि°. 19. PB हृदये. 20. P हृद्गुणा°.

सर्वाङ्गावयवासक्तमुक्ताजालवि[1]भूषणम् ।
सर्वत्र पुष्पितं जात्यजातिद्रु[2]मिव जङ्गमम् ॥ ५३१ ॥
वसानमनुकूलानि दुकूलानि सिताननम्[3] ।
शरदभ्रवितानानि नभोदेशमिवामलम् ॥ ५३२ ॥
विवर्तैरिव पापस्य कैवर्तैः परिवारितम् ।
बालतालमिवानेकबिभी[4]तकवनोद्गतम् ॥ ५३३ ॥
कार्यं कृताकृतं वीक्ष्य पोतिकानामुपेयुषः[5] ।
वेत्रिणा[6]हूतमायान्तं नाविकं दृष्टवानहम् ॥ ५३४ ॥
तदाकृत्यादिना जातविस्मयेन मयोदितः ।
कोऽयमित्यूचि[7]वान् पोत[8]सचिवो यक्षपालितः ॥ ५३५ ॥
अयं कैवर्ततन्त्रस्य सकलस्यापि शासिता ।
नाविक[9]स्तटिनीनाथपाथस्ताघ[10]विशारदः ॥ ५३६ ॥
नैव नाविकनीकाशः सदाकारश्चकास्त्ययम् ।
इति जल्पितवन्तं मामजल्पत् पोत[11]मन्त्रिराट् ॥ ५३७ ॥
यथा कुमार रूपेण चकास्त्ययमनीदृशः ।
उद्यत्क्रमेण शौर्येण कुलेनापि तथा शृणु ॥ ५३८ ॥
सुवर्णद्वीपद्वीपश्रीमणिमन्दिर[12]पत्तने ।
रमणो वसुदत्ताया वणिग् वैश्रवणोऽभवत् ॥ ५३९ ॥
यस्य कल्पमिवाचारमादाय चतुरो जनः ।
सन्मार्गे सञ्चरत्युच्चैराराद्धुं कीर्तिदेवताम् ॥ ५४० ॥
अवेहि तारकं तस्यापत्यमेतन् महाद्भुतम् ।
मित्रमण्डलगेनापि भेजे येन निजं महः ॥ ५४१ ॥
निजरूपपराभूतपुरुहूतपुरीजनः ।
समभ्यस्तकलाशास्त्रः स प्राप्तनवयौवनः ॥ ५४२ ॥
महाद्वीपेषु बहुषु व्यवहाराय सञ्चरन् ।
अखण्डभाण्डसम्पूर्णतर्या पुर्यामिहागमत् ॥ ५४३ ॥
अबद्धपौरसम्पातपरिहारविधित्सया ।
तटिनीशतटेदत्तावासस्यैतस्य तस्थुषः ॥ ५४४ ॥

---

1. B °चिभूषणम्. 2. NK °दुमिव. 3. BK सितानितम्. 4. NBK विभातक. 5. B °मुपेयुषा. 6. K °णाहृत°. 7. N °त्यूविवान्°. 8. P योत°. 9. P नाचेक°. 10. K °स्ताथ°. 11. PBK योत°. 12. The name of the port is मणिपुर in Dhanpāla's TM.

समस्तकर्णधाराधिनाथेन जल्केतुना ।
समं मैत्र्यमभूद्दैवात् कुरङ्गेण विधोरिव ॥ ५४५ ॥
अगण्यपुण्यलावण्यरसभङ्गितरङ्गिणी ।
स्वर्गाच्छाप[1]परिभ्रष्टां साक्षाद् देवाङ्गनामिव ॥ ५४६ ॥
जल्केतुः सुतां प्रैषीत् तस्यावासे सुदर्शनाम् ।
हारमर्पयितुं मैत्रीमलङ्कर्तुमिवाशिशुम् ॥ ५४७ ॥ युग्मम् ॥
तदा सञ्जातरागां तां सत्कृत्य विससर्ज सः ।
येन तेन मिषेणेति सा तं द्रष्टुं त्व[2]हर्दिनम् ॥ ५४८ ॥
पश्यन्ती सा तमन्येद्युर्निशातमसविक्लवा ।
समेऽपि कुट्टिमतले पपात प्रस्खलत्पदम् ॥ ५४९ ॥
निर्विलम्बं समुत्थाप्य तां करेणावलम्बिताम् ।
स जगाद प्रमादस्ते सुभ्रु कः स्खलितासि यत् ॥ ५५० ॥
शनैर्व्रज निजं गेहं देहं सुवृण्व[3]नावृतम् ।
तत्पाणिप्राणतुल्काऽलपत् कालोऽयमित्यसौ ॥ ५५१ ॥
गृहीतपाणिर्भवता कुमारैवं विसंस्थुल[4]म् ।
संवृणोमि कथं देहं कथं यामि गृहान्तरम् ॥ ५५२ ॥
इदं तवैव संवृत्तं ममाश्रयतया गृहम् ।
संत्यजामि सह प्राणैरमीभिर्विरहासहम् ॥ ५५३ ॥
इत्युक्त्वा[5] ह्रीविनम्रास्यजितोत्तंससरोरुहा ।
सा वामचरणाङ्गुष्ठेनोल्लिखन्ती क्षितिं स्थिता ॥ ५५४ ॥
असावपि स्मरस्मेररूपेण वचनेन च ।
तस्याः पीयूषशीतेन करस्पर्शेन चातुषत् ॥ ५५५ ॥
सस्मितास्योऽवददसाव[6]सौ चेत् तन्वि निश्चयः ।
तदा मदालयप्राणपरिच्छदधनानि ते ॥ ५५६ ॥
इदं वदन् स्मरश्चेदं स्त्रीरत्नं दु[7]ष्कुलादपि ।
ग्राह्यमित्याशु तां पाणौकृत्य कान्तां[8] चकार सः ॥ ५५७ ॥
तया समं स मन्दाक्ष्या[9] दाक्ष्यमुख्यगुणा[10]ढ्यया ।
कामं चिक्रीड निष्पीड[11]मना बन्धुधनादिषु ॥ ५५८ ॥

---

1. PNB स्वर्गाछाप°. 2. NB न्वहर्दिनम्. 3. NK सुवृणु नावृतं. 4. NK °स्थूल. 5. PNK इत्युक्ता. 6. NPBK °दसावासौ. 7. NPBK दुःकुला°. 8. PK कान्ता°; B कान्ती°; N कान्तांचाकार. 9. B मन्दाक्ष्य. 10. NPBK °घया. 11. B °माना.

भिन्नपोतस्य कस्यापि जलधौ जलकेतुना ।
इयमापि सुतेत्येवं जनैरुक्तोऽपि युक्तिभिः ॥ ५५९ ॥

सुधासबन्धुभिर्बन्धुसन्देशैर्देशमात्मनः ।
स्मार्यमाणमपि प्राप न सत्रपतया त्वयम् ॥ ५६० ॥

अन्यदाऽयं समाहूय स्वामिना चन्द्रकेतुना ।
चक्रे किमेतज् जामातर् इत्युक्तः सस्मितं वचः ॥ ५६१ ॥

प्राच्यां त्वस्योन्नतिं ध्यायन् ददौ देवः प्रसादतः ।
स्वाम्यं नाविकतन्त्रस्य बहुदायसमन्वितम् ॥ ५६२ ॥

अयं या[1]दःप्रतीकारसिन्धुमध्यविशारदः[2] ।
नौकर्मकुशलश्चान्य[3]त्कर्णधाराधिपोऽचिरात् ॥ ५६३ ॥

अयं यद्यपि वयसा पञ्चविंशतिवार्षिकः ।
तथापि पाथसां नाथं वर्षीयानिव वेत्त्यमु[4]म् ॥ ५६४ ॥

निजनावि विधायामुं कर्णधारं कुमार तत् ।
कार्यजातमयत्नेन दुःसाधमपि साधय ॥ ५६५ ॥

तस्मिन्नेवं वदत्येव स कैवर्तकुलप्रभुः ।
प्रणम्य प्रणयादूचे गिरा मां सुकुमारया ॥ ५६६ ॥

कुमार जययात्राया घोषणानुपदं स्यात् ।
अभ्ये[5]त्य तटमम्भोधे[6]र्यानपात्राण्यसज्जयम् ॥ ५६७ ॥

तदा चक्रधनुर्दण्डमण्डलाग्रादिभूषणाः[7] ।
तरीरारुरुहुर्वीरा नीरान्नादिमनोरमाः ॥ ५६८ ॥

कुमारः शत्रु[8]विजययात्रां नाम महातरीम् ।
आरोहत्वन्यहेतुश्चेन्नास्ति कश्चिद् विलम्बितुम् ॥ ५६९ ॥

इति तद्वचनस्यान्ते मुहूर्ते लाग्निकोदिते ।
राजलोकं कृतालोकं व्यावर्त्याम्बुनिधेस्तटात् ॥ ५७० ॥

दत्तहस्तावलम्बोऽहं तारकेणाथ तां तरीम् ।
आरुह्य न्यषदं मत्तवारणे वीरवेष्टितः ॥ ५७१ ॥

---

1. B पादः. 2. B °विशारदैः. 3. N °श्चान्प°. 4. PN °यमु. 5. NK अन्येत्य. 6. B °धीर्या°. 7. NPBK °भूषणः. 8. The name, in the original work of Dhanapāla, is विजययात्रा.

पठत्सु बन्दिवृन्देषु ध्वनत्सु जलदादिषु ।
प्रतस्थे तत्[1] तरीसैन्यं परितः परिवार्य माम् ॥ ५७२ ॥
सत्स्व[2]प्पात्रावधानेषु नाविकेष्वात्मकर्मसु ।
भक्त्यभिव्यक्तयेऽरित्रं व्यापारयति तारके ॥ ५७३ ॥
अदृश्य[3]नगरारामगृहग्रामशिलोच्चयम् ।
अम्भोधेरास[4]दं देशमक्लेशवशमानसः ॥ ५७४ ॥
अकस्माच्च प्रयाणं तत् सामन्ताः श्रुतपूर्विणः ।
शङ्कापङ्काविलधियोऽनुपदं द्रुत[5]मापतन् ॥ ५७५ ॥
अभिषेणयितव्ये[6]षु सामन्तेष्वप्रतर्कितः ।
प्रतिकूलो विधिरिव सर्वस्वं समुपाहृ[7]रम् ॥ ५७६ ॥
अप्रतर्कितसम्पातं मां श्येनमिव पक्षिणः ।
प्रेक्ष्यत क्षीणगतयः केचिन्नं[8]ष्टुमशक्नुवन् ॥ ५७७ ॥
कांश्चिन्निर्भरनिद्राणान् वयं दुर्गाश्रया इति ।
व्यधां हृ[9]तविग्रहतानुलूक इव मौकलीन् ॥ ५७८ ॥
अतिस्तब्धान् नदीपूरः पादपानिव कां[10]श्चन ।
श्लथितक्षितिसम्बन्धान् हेलयैवोदमूलयम् ॥ ५७९ ॥
कांश्चित् सुदूरमाकृष्य विधायोपात्तसम्पदः ।
अमुञ्चं नगगु[11]च्छाग्रानिवाव[12]चितसत्फलान्[13] ॥ ५८० ॥
अकिञ्चित्करतां नीतानेतान् स्थानात् प्रचालितान् ।
न्य[14]वेशयं पुनः स्थाने मल्लाङ्गावयवानिव ॥ ५८१ ॥
दुष्टसामन्तसार्थेना[15]जयं द्वीपपतीनपि ।
गृहाणि ज्वालयत्यन्यान्येकत्र ज्वलितोऽनलः ॥ ५८२ ॥
अमन्दचन्दनस्य[16]न्दगन्धसम्बन्धबन्धुरः ।
यत्रोज्जीवयते वायुर्यमिनां मूर्च्छितं स्मरम् ॥ ५८३ ॥
यत्र नीरन्ध्रमाकन्दचन्दनाशोककानने ।
विवेद वेदनां तापप्रभवां न कदापि भूः ॥ ५८४ ॥
यस्य विभ्राजते शृङ्गे शृङ्गारितनभोन्तरे ।
हिरण्मयी पुरी लङ्काऽलङ्कारमुकुटोपमा ॥ ५८५ ॥

---

1. NB तत्. 2. = सत्सु+अप्–पात्र–अवधानेषु. 3. PNB °श्य°. 4. NPBK °रासंद. 5. N °डुत°. 6. NBK °तव्ये°. 7. NK °पादरम्. 8. NBK °श्रंष्टु°. 9. B हंत°. 10. PBK कांश्चनः. 11. NP °गुछा°. 12. N °निवाचित°. 13. B °फलात्. 14. N त्यवेशयं. 15. NB सार्थेनजयं. 16. NK °स्पन्द°.

संरुद्धाब्धिमहावेलं सुवेलं शैलमा[1]प्य तम् ।
आवासयं स्वसैन्यानि दत्तदैन्या[2]नि विद्विषाम् ॥ ५८६ ॥
उपदानुपदायातैरुत्खातप्रतिरोपितैः ।
तत्रत्या[3]नेकसामन्तैः कामं तैर्व्यक्तभक्तिभिः ॥ ५८७ ॥
सावदातप्रदेशानामकराणां च दर्शनैः ।
विनोद्यमानः कतिचित् तत्रातिष्ठमहान्यहम् ॥ ५८८ ॥
ततोऽपि प्रहितायातैश्चरैरावेदितक्षणः ।
यथेच्छदत्तदु[4]ष्प्रापवस्तुतोषितनाविकः ॥ ५८९ ॥
बहुप्रधाननिर्व्यूढैः प्रधानै राजसूनुभिः ।
पत्तिभिश्च सहोपात्तकियद्दि[5]वसशम्बलैः ॥ ५९० ॥
चौर्यवृत्तेः पर्वतकाभिधभिल्लचमूपतेः ।
राजधान्यामवस्कन्दमविज्ञातमपातयम् ॥ ५९१ ॥ विशेषकम् ॥
निस्त्रिं[6]शशास्त्रसम्पातप[7]लायितमलिम्लुचः ।
तस्य सर्वस्वमादाय शिबिराभिमुखोऽभवम् ॥ ५९२ ॥
प्रयाणे यान्तमाचेऽपि भट्टपुत्रोऽत्रिनामकः ।
निशि त्रिभागशेषायां कृताननतिरुवाच माम् ॥ ५९३ ॥
त्वां राज[8]पुत्र सेनानीर्विज्ञापयति मन्मुखात् ।
पश्या[9]सौ रत्नकूटोऽद्रिकूटो घृष्टाम्बरः पुरः ॥ ५९४ ॥
योऽवतंसः पयोराशेः पञ्चशैलस्य भूषणम् ।
क्रीडाभूः स्वर्गिवर्गस्य सिद्धिक्षेत्रं खचा[10]रिणाम् ॥ ५९५ ॥
सुलभाम्भसि सुप्रापचन्दनादिद्रुमै[11]धसि ।
सफलानेकवृक्षे च सैन्यावासोऽत्र युज्यते ॥ ५९६ ॥
प्रयाणस्यानणीयस्त्वान्नाविकाः श्रान्तबाहवः ।
न प्रयोक्तुमरित्राणि साम्प्रतं प्रभविष्णवः ॥ ५९७ ॥
नापि चैनमतीतानामपरः कोऽपि पर्वतः ।
द्वीपो वाऽस्ति समीपे यः स्कन्धावारभरक्षमः ॥ ५९८ ॥
अत्र द्वित्राणि विश्रान्ता[12] दिनानि ननु नाविकाः ।
तरीस्तरीतुम[13]म्भोधिं सन्धास्यन्ति कुस[14]न्धिषु ॥ ५९९ ॥

---

1. NBK °माप्प. 2. NBK °दैत्यानि. 3. NK °त्यानेक°. 4. NPBK दुःप्राप. 5. NK °कियदिवस°. 6. NPBK निस्तृंश°. 7. N °पालायित°. 8. NPBK रात्र°. 9. NK पश्यासौ. 10. N खवा°; B खावा°. 11. NPBK °द्रुमेधसि. 12. B विश्रीता. 13. NPBK °मंधभोधिं. 14. NPK सैंधिषु.

युद्धघातितयोधानां व्रणकर्मापि दुष्करम् ।
संरोहकौषधाधारे भवेदत्र धराधरे[1] ॥ ६०० ॥
स्वादून्यादाय नीराणि चन्दनादीन्धनानि च ।
व्यतियान्ति पयोराशिमनायासेन सैनिकाः ॥ ६०१ ॥
प्रमाणं युवराज त्वमत्रेत्य[2]स्मिन्नवस्थिते ।
तत्कालमुत्प्रयाणाय भेरीमहमवादयम् ॥ ६०२ ॥
भेरीशब्दं मन्त्रमिव नाविकानां निशम्यताम् ।
अरित्रवाहनाद्ध[3]स्ता जातस्तम्भा इव स्थिताः ॥ ६०३ ॥
सर्वा अपि तदा नावो नगस्याभिमुखा बभुः ।
स्र[4]वन्त्य इव पाथोधेरब्जि[5]न्य इव भास्वतः ॥ ६०४ ॥
अहंप्रथमिकापूर्वं पर्वतस्य गुहागृहान् ।
तदाऽग्रसैनिका दूरादूरीचक्रुरुरुस्वरम् ॥ ६०५ ॥
प्रयोजनवशादेकपदेऽनेकजनारवैः ।
अभूत् कोलाहलाद्वैतं मन्थक्षण इवार्णवे ॥ ६०६ ॥
तदा वियुज्यमानानां जनैः प्रियतमैरिव ।
शून्यताऽपि चकास्ति स्म नावां वामाभ्रुवामिव ॥ ६०७ ॥
समायाते समायाति समायास्यति वा पृथक् ।
नौचक्रे सर्वशिबिरबुद्धिं बध्नाति गौरवात् ॥ ६०८ ॥
वितर्कस्यादिमं वेश्म विस्मयस्यापनिद्रकः ।
वीणावेणुमृदङ्गादिवादित्रध्वनिगर्भितः ॥ ६०९ ॥
दर्पोत्फुल्ल[6]महामल्लकरास्फोटस्फुटीकृतः ।
आगान् मङ्गलसङ्गीतध्वनिस्तत्र मरुद्दिशः ॥ ६१० ॥ युग्मम् ॥
सावधानस्तदुत्थाननिदानज्ञानवाञ्छया ।
पार्श्वस्थचामरच्छत्रधारादिपरिवारितः ॥ ६११ ॥
विसृष्टसकलक्ष्मापकलापः स्वपरिच्छदः ।
अवदं तारकं गीतप्रीतनिश्चलतारकम् ॥ ६१२ ॥ युग्मम् ॥
ध्वनिः स्वप्रभवं द्रष्टुमुत्साहयति मामयम् ।
त्वं चानेन प्रयाणेन सखे खिन्नोऽसि सम्प्रति ॥ ६१३ ॥

1. N °धरो. 2. N °त्रेन्यस्मि°. 3. N °द्धस्ता. 4. NPBK श्रवंत्य. 5. N °रजिन्य.
6. NBK °त्पुछ°.

नियोक्तुं युज्यसे न त्वं स त्वं कृत्वा तथाप्यमूम् ।
नावं सज्जय पाश्चात्यं शिबिरं यावदेत्यदः ॥ ६१४ ॥

गृहतन्त्रं जना नावो यावदुत्तारयन्ति च ।
आयावस्तावदालोक्य लोकं गीतप्रवर्तकम् ॥ ६१५ ॥

राज्याभिषेकं विद्यायाः सिद्धिं कन्यास्वयंवरम् ।
देवे कुत्रा[1]पि यात्रां वा वक्ति वादित्रनिःस्वनः ॥ ६१६ ॥

तालस्फुटतयाऽऽसन्नदेशं वाऽवैम्यमुं ध्वनिम् ।
इत्या[2]ख्यान्तमभाषिष्ट तारको मामधोमुखः ॥ ६१७ ॥

युवराज व्रजामः स्राक्[3] पश्या[4]मश्र कुतूहलम् ।
परं परिसरेष्वद्रेर्विषमोऽयं महोदधिः ॥ ६१८ ॥

सम्भाव्यते च यादांसि महीयांसि पदे पदे ।
आवर्ता विहितस्वान्तपरावर्ताः परं शतः ॥ ६१९ ॥

केनापि कर्णधारेण वार्धा[5]वनवधारिते ।
Indira Gandhi National
निशायामविभाव्योच्चनिम्नोदकतटाश्मनि ॥ ६२० ॥

क्षणकाङ्क्षितसान्निध्यनावां चासन्निधानतः ।
यातं क्लेशविधायीदमिति मन्दायते मतिः ॥ ६२१ ॥

एकदा ध्वनिमश्रौषं पुराऽत्रावासितः स्वयम् ।
सकर्णकर्णधाराणां मुखात् पुनरनेकशः ॥ ६२२ ॥

मनो ममापि तद् वेत्तुमभ्येतुमुदितत्वरम् ।
न यामि मार्गवैषम्यशङ्कया संयतः पुनः ॥ ६२३ ॥

अवदं मित्र मा त्रासीः कष्टाद् हृदि विकल्पितात् ।
तरीं त्वरय निःशङ्कमङ्कस्थं चिन्तितं विदन् ॥ ६२४ ॥

एवं कृतदिदृक्षं च प्रदेशमसमीक्ष्य तम् ।
नावयोर्गतयोः पश्चात्तापः सौख्यं प्रदास्यति ॥ ६२५ ॥

---

1. N कुशपि. 2. NK °त्याख्या°. 3. NPBK श्राक्. 4. B पश्पाम°. 5. = वार्धौ+अनवधारिते.

निर्दम्भहृदवष्टम्भवतः सर्वोऽपि वारिधिः ।
गो[1]ष्पदं ते तदंशेऽपि कथमेवं विकल्पना ॥ ६२६ ॥
अदर्शितव्यभीचारे सारे सति भुजद्वये ।
कीदृक्षस्त्वन्यसाहाय्यापेक्षोपक्षेपडिण्डिमः ॥ ६२७ ॥
इति ब्रुवाणमब्रूत मां स मांसल[2]सौहृदः ।
कुमार किं भ्रूसञ्चारप्रेर्य्ये मय्यनुवर्तना ॥ ६२८ ॥
या[3]नं कष्टमकष्टं वा सर्वथाऽभीष्टमेव ते ।
इत्युदित्वाऽर्णवं[4] नत्वा तरीं त्वरयति स्म सः ॥ ६२९ ॥
अमन्दस्पन्दनादक्षि दक्षिणं मम च क्षणम् ।
प्रथया कथयामास समासन्नसुखश्रियम् ॥ ६३० ॥
समीपस्थोपकरणैः स्वस्वदेशनिवेशितैः ।
विधीयमानसान्निध्यः पञ्चषैरे[5]ष नाविकैः ॥ ६३१ ॥
मध्ये जलानि संरुन्धन् सन्दधानश्च सन्धिषु ।
नाव[6]मद्रि[7]तटग्रावजाते क्वचिदसञ्जयन् ॥ ६३२ ॥
पाठीनमीनमकरप्रमुखासंख्य[8]यादसाम् ।
प्रतिकुर्वन्नुपायैः स्वैः समीपमुपसर्पताम् ॥ ६३३ ॥
प्रकामं त्वरयन् क्वापि क्वचनापि विमन्दयन् ।
ध्वनेस्तस्यानुसारेण प्राचेतसदिशाऽनयत् ॥ ६३४ ॥
आतोद्यध्वनिना तेन समीपीभूतहेतुना ।
प्रमोदतु[9]न्दिलमपि तदाऽनृत्यन्मनो मम ॥ ६३५ ॥
ध्वनेः स्रोतः[10] प्रतिस्रोतः[11] सञ्चरन्मन्मनः शनैः ।
तत्कालं कलयामास कालचित्रकतुल्यताम् ॥ ६३६ ॥
किञ्चित् तिष्ठति शेषेऽथ निशाया इव वर्त्मनः ।
विश्रान्तः स ध्वनिः[12] श्रान्तश्चिरं विलसनादिव ॥ ६३७ ॥

---

1. NPBK गोःपदं. 2. N मांसह्ल°. 3. NP पानं. 4. NPB °र्णव°. 5. NBK °पंचषैरष. 6. N नये°. 7. N°मप्रि°. 8. N °संख्यादसाम्. 9. N तुंदिल°. 10. NPK श्रोतः. 11. NPK प्रतिश्रोतः; N repeats प्रतिश्रो after this through oversight; B drops प्रतिश्रोतः. 12. NPBK ध्वनिश्रांत°.

उच्छन्नगमनोत्साहोऽप्याशु शुश्रूषया ध्वनेः ।
स्तोकं नीत्वा तरीं धृत्वा तारको मामवोचत ॥ ६३८ ॥
मार्गस्य[1] दर्शकोऽस्माकं प्रदीप इव स ध्वनिः ।
उच्चतां नीचतां प्राप्य व्यरमत् सहसाऽधुना ॥ ६३९ ॥
आज्ञापय प्रयात्वेषा बद्धवागेव किं तरी ।
उत प्रस्खलितगतिः पश्चाद् व्यावर्ततामियम् ॥ ६४० ॥
गत्वाऽवश्यं विलोक्यं चेद् विलोक्यमिति निश्चयः ।
तदा यातु तरी शैलनितम्बाध्वावलम्बिनी ॥ ६४१ ॥
अथ दृष्टेन का सिद्धिः कौतुकेनेति मे मतिः ।
ततः प्रतीपमापत्य सैन्यमाश्वा[2]स्यते स्वकम् ॥ ६४२ ॥
क्रियन्ते राजकार्याणि कौतुकान्यम्बुधौ पुनः ।
सुलभानि कुमारेण व्रजता जययात्रया ॥ ६४३ ॥
किञ्चाद्री रत्नकूटोऽयं केवलोऽपि विलोकितः ।
कौतुकानामनायासं कौतुकं पूरयिष्यति ॥ ६४४ ॥
अत्र दीव्यन्ति दीव्यानि मिथुनान्यमरद्रुषु ।
गन्धगृध्रभ्रमद्भृङ्गीसङ्गीतकविराजिषु ॥ ६४५ ॥
पद्मरागरुचोऽमुष्य क्षतवि[3]द्रुमविभ्रमाः ।
अन्तरायं व्यधुर्वार्द्धौ न केषां व्रजतामिह ॥ ६४६ ॥
यद्वाऽमुमद्भुतं वीक्ष्य कुमारोऽलीकभाषिणम् ।
कलयिष्यति मां पश्चादित्यसौ मौनमास्थितः ॥ ६४७ ॥
अध्यायगमनमभूत् कायक्लेशाय केवलम्[4] ।
लज्जाविषादवैलक्ष्यलक्ष्यमात्मानमादधे ॥ ६४८ ॥
अहमद्यैव दुर्दैवात् सञ्जाताफलचापलः ।
स्वमुखं मन्त्रिमुख्यानां दर्शयाम्य[5]त्रपः कथम् ॥ ६४९ ॥
कथं कलितकालुष्या वर्षाकालापगा[6] इव ।
कार्याः प्रसादविशदाः शरदेव प्रिया मया ॥ ६५० ॥

---

1. NBK °स्प. 2. NPBK °मास्वास्यते. 3. NB °विद्रुम°. 4. NBK केवल. 5. B दर्शयामात्रपः. 6. B reads °कार्याः for °पगाः and drops कार्याः in C.

मन्दस्नेहा भविष्यन्ति ममानेनाज्ञकर्मणा ।
सुहृदः सहसंवृद्धा दुर्वातेन तिला इव ॥ ६५१ ॥

एवं चिन्तातु[1]रस्यागात् [2]परिणामं विभावरी ।
शिथिलीभूतनक्षत्रदन्तनेत्रेन्दुमस्तका ॥ ६५२ ॥

मुक्ता तारकचक्रेण सोडुपाऽपि विभावरी ।
मज्जति स्मार्णवाणांसि प्रोच्छलन्ति ततोऽभितः ॥ ६५३ ॥

नूनं विश्वमिवात्मानमप्यन्तर्धातुमी[3]श्वरम् ।
तमस्तेन क्षणाज्जातमदृश्यं पश्यतोऽपि मे ॥ ६५४ ॥

दिशामुल्लापयन्तीनामिव पक्षिकुलारवैः ।
संमुखं बालमार्तण्डः शनैः[4] प्रासारयत् करान् ॥ ६५५ ॥

प्राचीं विस्तारि[5]तारुण्यां श्रयन्तं पतिमब्जिनी ।
वीक्ष्यालिच्छलतोऽमुञ्चदश्रुश्रेणिं घनाञ्जनाम् ॥ ६५६ ॥

मूर्त्यन्तरमिवौ[6]र्वाग्नेर्म[7]ज्जानमिव विद्युताम् ।
उत्पतन्तं ततः शैलात् तेजःपुञ्जं व्यलोकयम् ॥ ६५७ ॥

किमेतदिति नि[8]र्यामैः सहोद्ग्रीवं व्यलोकयन् ।
अलङ्कारप्रभा प्रादुर्भूताऽद्भुततमार्द्धिकम् ॥ ६५८ ॥

लीलावहलितोत्साहवाह[9]वारणवाहनम् ।
मण्डिताकाशकासारपुण्डरीकोत्तरश्रियम् ॥ ६५९ ॥

पारिजातस्र[10]गामोदानुचरभ्रमरावलिम् ।
तत्राद्राक्षं खेचराणां व्रजन्तं व्रजमम्बरे ॥ ६६० ॥

अचिन्तयं नूनमयं विद्याधरजनो नगे ।
समासूत्रितसङ्गीतप्रीतः प्रचलितोऽधुना ॥ ६६१ ॥

तेषां वचनविन्यासै[11]र्वैपुल्यासैर्विजृ[12]म्भितैः ।
अदवीयसि देशे तं सङ्गीतकपदं विदन् ॥ ६६२ ॥

पुनरुज्जीवदानन्दः कौतुकालोककौतुकी ।
तारकेण तरीं तारं प्रेरयामासिवान् पुरः ॥ ६६३ ॥

---

1. N. drops °तु°. 2. B. °गात्पारि° 3. B °मपीश्वरम्. 4. NK शतैः. 5. NPBK °स्तारता°. 6. NPBK °मिवोर्वा°. 7. NPBK °ग्नेमज्जा°. 8. B निर्यामैः. 9. N drops °वाह°; K °वारि°. 10. NPBK °श्रगा°. 11. NK °न्यासौ°. 12. B विभृजंभितैः.

तिर्यग्निर्यातभूमीध्रपादान् दूरेण मुञ्च[1]ती ।
कियन्तमपि पन्थानं जवाद् यावज्जगाम नौ:[2] ॥ ६६४ ॥

तत्कालनृत्तलो[3]कस्याभिनयानिव लीलया ।
अनिलान्दो[4]लनैर्व्योम्नि कुर्वत्याढ्यं पताकया ॥ ६६५ ॥

प्रौढालोकदुरालोकसर्वावयवसन्धिना ।
पद्मरागमयेनोच्चैः कलशे[5]नानुशीलित[6]म् ॥ ६६६ ॥

उच्छृङ्खलं प्रचलतः[7] स्तम्भनाय जगद्गृ[8]दः ।
दधानं पीतलध्यानं सौवर्णशिखरच्छलात् ॥ ६६७ ॥

जम्बूद्वीपमिवोद्दण्डजगतीजित्वरप्रभम् ।
महात्मनां मन इव समुन्नतिमनोहरम् ॥ ६६८ ॥

श्रीदार्णवसुवर्णाद्रिसर्वस्वेन विनिर्मितम् ।
तस्याद्रेर्मुकु[9]टं तावदद्रा[10]क्षं जिनमन्दि[11]रम् ॥ ६६९ ॥

प्राकारस्य तदीयस्य भित्तिमाश्रित्य दक्षिणाम् ।
प्रियामिव[12] मनोवृत्तिर्विशश्राम तदा तरी ॥ ६७० ॥

इतस्ततस्तदालोकव्यापारितविलोचनम् ।
अवदं तारकं तारमुदगारमहं गिरम् ॥ ६७१ ॥

सखे शिखरिणः पादैर्विषमोऽयमिहार्णवः ।
नाविका[13]नामविषयोऽखिलाब्धिविदुषामपि ॥ ६७२ ॥

दर्शनेनास्य निःशेषदर्शनीयशिरोमणेः ।
प्रयास इव जन्मापि प्राप साफल्यमात्मनः ॥ ६७३ ॥

साम्रा[14]ज्यमपि संत्य[15]ज्य भुक्त्वा कन्दफलाद्यपि ।
पशुतामपि संप्राप्य विप्रयुज्यापि बन्धुताम् ॥ ६७४ ॥

इहावस्थायिनो धन्या[16] येषां पुण्यं क्षणे क्षणे ।
प्ररोहतितरां सौख्यसर्वस्वं भुञ्जतामपि ॥ ६७५ ॥

---

1. B मुचती. 2. NPBK नौ. 3. B °लौक° 4. B. °लान्दौलनै° 5. NPBK कलसेना°. 6. NK शीलिताम्. 7. PNK प्रचलतस्तम्भनाय. 8. NPBK जगद्वृदः. 9. B drops °मुंकुटं. 10. NK °प्राक्षं. 11. B. °मन्दिरः 12. B प्रियामव. 13. PNK नाविकाणा°; B नाविकारणा°. 14. B सार्माज्य°. 15. B संव्यज्य. 16. NBK धन्पा.

समानय पयःपुष्पप्रकरं च जवाद् यथा ।
स्नानशुद्धतमात्मानः पूजयामोऽत्र दैवतम् ॥ ६७६ ॥

तारकः स्माह विस्मेरसरोरुहवनास्विह ।
सुधाकुण्डसपिण्डासु वापीष्वापः स्फुरन्त्यलम् ॥ ६७७ ॥

पारिजातवनाघ्रातशिखरेऽत्र गिरीश्वरे ।
सुखानेयाः सुमनसो मरन्दमुदितालयः ॥ ६७८ ॥

परं[1] विज्ञापयामि त्वां कुमार हृदि चिन्तया ।
कथमत्र प्रवेष्टव्यमभ्यर्णे[2]ऽपि जिनालये ॥ ६७९ ॥

यत् तोरणपरिष्का[3]रं गोपुरं परिवीक्ष्यते ।
टङ्कच्छिन्नतटापीडप्राकारस्थं तदुच्चकैः ॥ ६८० ॥

लघुद्वाराणि यान्यत्र सम्भवन्त्यपराण्यपि ।
आकाशस्फटिकभित्तौ दुर्विभाव्यानि तानि नः ॥ ६८१ ॥

आर्द्रचन्दनमालाभिः प्रणालीप्रक्षरज्जलैः ।
विज्ञायमानाधु[4]निकसङ्गीतविरताविह ॥ ६८२ ॥

जनैर्नूनमशून्यत्वमिदानीमवगम्यते ।
तद् दृष्टिगोचरीभूतं पृष्ट्वा कञ्चिद् उपक्रमे ॥ ६८३ ॥ युग्मम् ॥

अभ्रंलिहजिनगृहव[5]प्रान्तेभ्रान्ततारके ।
तारके तारकेशाभवदने वदतीदृशम् ॥ ६८४ ॥

सुवर्णकङ्कणक्वाणप्रत्तप्राणप्रसृत्वरः ।
प्रस्खलन्मेखलादामसंवरप्रवरीकृतः ॥ ६८५ ॥

सिञ्चन्नमृतनिःष्य[6]न्दबिन्दुभिः कर्णकोटरम् ।
श्रूयमाणो विचलितग्रीवं वापीसितच्छदैः ॥ ६८६ ॥

यथा स देशं देशस्य शनैस्तारतरोऽभवत् ।
अजायत श्रुतिपथपथिको नूपुरध्वनिः ॥ ६८७ ॥ कलापकम् ॥

ध्वनेस्तस्या[7]नुसारेणास्माकं प्रेरितचक्षुषाम् ।
वप्रारूढा दृशां मार्गमी[8]युर्मृगविलोचनाः ॥ ६८८ ॥

---

1. B परि. 2. NK °भ्यणे°. 3. NPBK °परिस्कारं 4. NK °नाधनिक°. 5. B °गृहत्-प्रात°. 6. NPBK °निस्यंद°. 7. B °स्वप्या°. 8. B °मीमीयु°.

याः सङ्क्रान्तं नदीकान्तजाड्यं परिजिहीर्षवः ।
आतपं सेवितुमिवावतेरुर्जलदेवताः ॥ ६८९ ॥

यास्तमिस्रै[1]रित्रोद्विग्नाः पातालान्नागकन्यकाः ।
चैत्यमीयुर्धृतालोकमर्कालोकविशेषितम् ॥ ६९० ॥

याः सुधालोडिततडिद्द्र[2]विणेनेव निर्मिताः ।
याः[3] पारिजातजन्मोर्वीं श्रिताः कल्पलता इव ॥ ६९१ ॥

तारणामिन्दु[4]लेखावद् वल्लीनां कल्पवल्लिवत् ।
विद्यानां शब्दविद्यावद् धे[5]नूनां कामधेनुवत् ॥ ६९२ ॥

देवीनां पद्मवासावत् तासामभ्यधिकां श्रिया ।
द्विरष्टवर्षदेशी[6]यां कन्यामेकामलोकयम् ॥ ६९३ ॥ युग्मम् ॥

आस्यं यस्या[7] विलोक्यार्कः स्वबन्धुपरिभावुकम् ।
मा गात् कष्टमितीवाभूच्छुचि छत्रमुपर्यदः ॥ ६९४ ॥

लावण्यसरणीमस्या[8] लावण्यं यात्विति न्यधात् ।
कपोलपालीं विपुलां कर्णपालीं ततो विधिः ॥ ६९५ ॥

यस्या आस्यदृशौ जिष्णू मृगलक्ष्ममृगौ युतौ ।
धात्रा योजयता सख्यं ख्यापितं शमशीलयोः ॥ ६९६ ॥

यत्तु[9]ङ्गस्तनयोर्यूनामधिरूढं मनो स्यात् ।
परिश्रान्तमिवाशक्यं नावरोढुं कदाचन ॥ ६९७ ॥

एवं च समरकेतुकथया हरिवाहने[10] ।
समं कमलगुप्तादिकुमारैर्हृष्टचेतसि ॥ ६९८ ॥

अभ्येत्य वेत्रिणी स्माह कुमार कथयाऽनया ।
ससृजे श्रोत्रयोः[11] शर्म नेत्रयोः कुरु साम्प्रतम् ॥ ६९९ ॥

इत्युदित्वा चित्रपटमसौ प्रासारयत् पुरः[12] ।
कुमारस्तत्र लिखितं कन्यारूपं न्यरूपयत् ॥ ७०० ॥

मुहुर्मुहुर्मुखे कण्ठकन्दले स्तनमण्डले ।
नाभीनिवेशे जघनप्रदेशे पदबाहुषु ॥ ७०१ ॥

---

1. NPBK °स्तमिश्रै°. 2. NPBK तडित्द्रविणे°. 3. drops याः. 4. B °मिंदु°. 5. NPBK धेनुनां 6. B °देवशीयां 7. NPBK यस्य. 8. NPB °स्यामस्या. 9. NB यत्तुग°. 10. NK हरिवाहते. 11. B श्रोत्रयोश°. 12. NK पुनरः.

रागसागरशफरीं दृशं व्यापारयन् भृशम् ।
पटं समरकेत्वादिकुमाराणामदर्शयत् ॥ ७०२ ॥

वज्रार्गले कुतः प्राप्तस्त्वयाऽयं चित्रितः पटः[1] ।
इति पृष्टा कुमारेण वेत्रिणीदं व्यजिज्ञपत् ॥ ७०३ ॥

निजं नियोगमाधाय वनावनिदिदृक्षया ।
भ्राम्यन्ती द्रुषु[2] याताऽहमतिमुक्तकमण्डपम् ॥ ७०४ ॥

शया[3]नमब्जिनीपत्र[4]स्रस्तरे तत्र दारकम् ।
वैदेशि[5]कं पञ्चदशवर्षदेश्यमलोकयम् ॥ ७०५ ॥

तेनान्तिकमुपेताऽहं पृष्टा कस्य परिच्छदः ।
भ्रमत्ययमलङ्कारधन्यस्तन्वीत्यथावदम् ॥ ७०६ ॥

इहास्ति नृपतिर्मेघवाहनः शत्रुगाहनः ।
समस्तभरतक्षेत्रक्षेत्रसे[6]वाश्रमक्रमः ॥ ७०७ ॥

वैमानिकसुरश्रेणेः पुरो यस्य पुरन्दरः ।
प्राशंसच्छतशोऽनेकनिर्व्यूढभुजविक्रमम् ॥ ७०८ ॥

अर्थिनां[7] देयमेवेति व्रती लक्ष्मीं प्रसादयन् ।
महोदरार्थे मूर्धानं निजं चिच्छेद योऽसिना ॥ ७०९ ॥

सप्रसादश्रिया[8] दत्तः शस्त्रशास्त्रविशारदः[9] ।
तस्य सूनुरनू[10]नश्रीः कुमारो हरिवाहनः ॥ ७१० ॥

नृपपुत्रपरीवारः क्रीडोद्यानेऽत्र[11] सोऽधुना ।
जलमण्डपमध्यास्ते नवनूतलतावृतम्[12] ॥ ७११ ॥

पाण्डित्यनृत्यगीतादिकुशलानामहङ्कृताम् ।
विवादमस्ति भिन्दान इदानीं विज्ञसंसदि ॥ ७१२ ॥

दृशं स्वस्य चकोरीं[13] चेत् सुहितीकर्तुमिच्छसि ।
दर्शनेन कुमारेन्दोश्चल तर्हि मया सह ॥ ७१३ ॥

स स्माह विस्फुरच्छात्तिं श्रीपर्वतरसाश्रितम् ।
उत्सुकोऽस्मि स्वयमहं कुमारमवलोकितु[14]म् ॥ ७१४ ॥

---

1. B पिटः. 2. B दुषु. 3. NK drop श°. 4. B °श्रस्तरे. 5. B वैदेशकं. 6. NPK °सैवा°. 7. B अर्थिना. 8. B °दाश्रया. 9. B. °विशारदाः. 10. B °नूरनंश्री: 11. B. °नेतृसो°. 12. B लतावृत्तं. 13. B °रीवे°. 14. B °लोकितुम्.

परं किमपि कर्तव्यं कृत्वाऽनुपदमेत्र ते ।
समेष्यामि मदुपदामुपादाय पुरो व्रज ॥ ७१५ ॥

इति प्रसेविकामध्यात् समाकृष्य प्रयत्नतः ।
अमुं स मेऽर्पयामास स्वहस्तलिखि[1]तं पटम् ॥ ७१६ ॥

असावेवं वद[2]न्त्येव तमीक्षणपथातिथिम् ।
गत्वा संमुखमानीय कुमाराय न्यनीनमत् ॥ ७१७ ॥

एह्येहीति गिरा स्निग्धदृशा चोपचितादरम् ।
समीपमुपविश्याथ कुमारं[3] व्याजहार सः ॥ ७१८ ॥

अप्रगल्भः प्रगल्भेन सकलासु कलास्वहम् ।
शिक्षणीयः कुमारेण यत्क्षू[4]णं चित्रकर्मणि ॥ ७१९ ॥

व्याजहार कुमारस्तं मित्र चित्रगतिस्तव ।
साक्षीकृतगुरुजनाऽजनि जाने स्वयंवरा ॥ ७२० ॥

अस्तोकचम्पकालोककलितं शैलमूर्धनि ।
इदं परिसरस्फारं सरः सरसिजोज्ज्वलम् ॥ ७२१ ॥

रूपशोभापराभूतपुरुहूतपुरीजनम् ।
कन्यारत्नमिदं मूर्ध्नि विधृतातपवारणम् ॥ ७२२ ॥

एताश्च योषितश्चारुवेषा लेखाङ्गनानिभाः ।
एतत्परिच्छदीभूताः प्रभूता लिखिताः पटे ॥ ७२३ ॥

अमी मनुष्यसञ्चारचकिता विकृताननाः ।
लेखानामपि दुर्लेखा लिखिता हंससारसाः ॥ ७२४ ॥

परं पुरुषरूपेण विना नैतद् विराजते ।
यथा पुरुषकारेण सैन्यं शून्यं सुचार्वपि ॥ ७२५ ॥

एतन्मानेन पुरुषं क[5]र्तुं चेन्न भवान् विभुः ।
तदा त्वक्षूणपो[6]षाय लिखाम्यहमिहानय ॥ ७२६ ॥

स स्माह युज्यते सर्वमेतत् सामान्ययोषिति[7] ।
अत्र योषिद्विशेषे तु न क्षूणं दातुमर्हसि ॥ ७२७ ॥

---

1. NPBK °लिषितं. 2. NBK °वेव. 3. B कुमार. 4. NK. °क्षुणं. 5. B कर्तुं. 6. NBK °पेषाय. 7. B योषित.

पुरुषद्विष्टवामभ्रूरूपमेतत [1]पटे कृतम् ।
ततः पुरुषरूपस्यावकाशोऽप्य[2]स्तु कीदृशः ॥ ७२८ ॥

सन्देहश्चेत् कुमारस्य पुंरूपकरणे मम ।
दर्शयामि तदेदानीमपि कृत्वा तव प्रभो ॥ ७२९ ॥

पुंरूपेण किमन्येन कृतेन यदि वा मम ।
निजप्रयोजनेनैतत् कृ[3]त्यं तावकमस्ति तत् ॥ ७३० ॥

मया कार्यविशेषेण व्याकुलेनापि संप्रति ।
त्वद्रूपलिखने हेतुः संक्षेपात् कथ्यते शृणु ॥ ७३१ ॥

अनेकनररत्नाढ्यवैताढ्य[4]गिरिमण्डनम् ।
अस्ति श्रीरथनूपुरचक्रवालाभिधं पुरम् ॥ ७३२ ॥

अन्वहं यत्र वादित्रध्वनयः खेचरश्रियः ।
भूरिभावैः प्रनृत्यन्त्याः कुर्युरचार्यकं परम् ॥ ७३३ ॥

रणार्जितजयश्रीणामालयस्तदपालयत् ।
क्रीडाक्रान्तद्विषच्चक्रश्चक्रसेननरेश्वरः ॥ ७३४ ॥

स्थिरास्तस्थुर्यदीयानां महासुकृतकर्मणाम् ।
सङ्ख्यानध्यानविगलच्चापला यद्गृहे श्रियः ॥ ७३५ ॥

अक्षूणदक्षिणश्रेणिनृपचूडामणिव्रजैः ।
सञ्जातसङ्ख्या यस्याज्ञा परं तेजोभरं दधौ ॥ ७३६ ॥

तस्यास्ति पत्रलेखायाः प्रेयस्याः कुक्षिसम्भवा ।
सुतोपयाचितशतैर्लब्धा तिलकमञ्जरी ॥ ७३७ ॥

यस्या सुलावण्यलवः पीयूषप्लवकल्पया ।
दृशाऽधुना कुमारेण चित्रमित्रं पवित्रितः ॥ ७३८ ॥

विलासेन गवामास्यं यदीयं श्रोत्रनेत्रयोः ।
प्रीणकं केवलदृशामिन्दुं मन्दयति श्रिया ॥ ७३९ ॥

निर्जितामपि रूपेण रतिं स्वाभीष्टवस्तुनि ।
योजयन्त्या अहं यस्याः पश्यामि नवगौरवम् ॥ ७४० ॥

कमप्यनीक्ष्यमाणा वा स्वरूपायोचितं वरम् ।
असौ प्रतीक्ष्यमाणा वा शैशवेऽङ्गीकृतावधिम् ॥ ७४१ ॥

---

1. B °भेस्पत्यटे. 2. B °प्यसु. 3. B कृत्य. 4. B. °वैताय°.

स्वातन्त्र्यस्पृहयालुर्वा पारवश्याद्धि बिभ्यती ।
पाणिग्रहणनामासौ सहते न युवत्यपि ॥ ७४२ ॥

अनुरूपवरं चक्रसेनः खेचरचक्रभृत् ।
खेचरेष्वीक्षितुं काङ्क्षन्नादिक्षत् खेचरांश्चरान् ॥ ७४३ ॥

प्रज्ञप्तिर्भक्तिविज्ञप्ता स्वप्नान्तर्मातुरादिशत् ।
भूगोचरेषु वत्साया वरः कोऽपि भविष्यति ॥ ७४४ ॥

चित्रलेखां मदीयाम्बां सुताधात्रीं दिदेश सा ।
चित्रकर्मणि दक्षा त्वं सुता चात्रानुरागिणी ॥ ७४५ ॥

तद् आत्मीयपरीवारसारवारवधूजनैः ।
क्ष्माचरक्ष्माचरसुतरूपाण्यालिख्य लक्षशः ॥ ७४६ ॥

स्वस्वकालेख्यकलाकलापस्पष्टनच्छलात् ।
अस्यास्तिलकमञ्जर्याः समानीय प्रदर्शय ॥ ७४७ ॥

दाक्ष्य[1]दाक्षि[2]ण्यलावण्यभाग्यसौभाग्यसम्पदः ।
तदीया वर्णय पुरो वत्साया[3] वत्सलाशया ॥ ७४८ ॥

कुर्वाणानामिदमपि यदि चक्षुः कदाचन ।
विश्राम्यति तनूजायाः क्वचन क्ष्माधनात्मजे ॥ ७४९ ॥

मदम्बया प्रपद्येदं तदैव प्रहिता हिताः ।
उक्तोऽहं चाधिकारोऽस्ति गन्धर्वक तवाप्यसौ ॥ ७५० ॥

विचित्रवीर्यदेवस्य सुवेलवसतेः पितुः ।
पार्श्वेऽसि प्रेषितः किन्तु कार्यतः पत्रलेखया ॥ ७५१ ॥

ततस्त्वं शक्यसे वक्तुं नान्यत् किञ्चित् परं त्वया ।
आगच्छता वचोऽस्माकं विज्ञप्यं खेचरशितुः ॥ ७५२ ॥

या सा काञ्चीशकुसुमशेखरस्याग्रिमा प्रिया ।
देवी गन्धर्वदत्तेति नामसा[4]म्याद् विशङ्किता ॥ ७५३ ॥

रत्नकूटस्यायतने यात्रायां निशि च श्रुता ।
त्वया सा सैव गन्धर्वदत्ता देवस्य नन्दना ॥ ७५४ ॥

---

1. NPBK दाक्ष°. 2. NPBK °दाक्षण्य°. 3. B drops वत्साया. 4. B °स्याम्या°.

यतो विनाऽपि देवस्यादेशं गत्वा मया स्वयम् ।
दृष्टा स्वज्ञातिवर्गस्याश्वा[1]सिता कुशलोक्तिभिः ॥ ७५५ ॥
पृष्टया च मिथः सम्यगावैजयन्त्युपप्लवात् ।
निजप्रवासवृत्तान्तः स्वयं सर्वो निवेदितः[2] ॥ ७५६ ॥
एवं विभाव्य देवेन सन्दिग्ध[3]व्यं न तां प्रति ।
इत्यतिक्रम्य तत्पुर्यां रात्रिमेकां पुनः प्रगे ॥ ७५७ ॥
विमोच्यात्मानमागत्य काञ्चीं तां भर्तृदारिकाम् ।
गन्धर्वदत्तामाराध्यागन्तव्यमविलम्बितम् ॥ ७५८ ॥
गच्छतस्ते सहायोऽयं चित्रमायनभश्वरः ।
सिद्ध[4]या बहुरूपिण्या विद्यया बलवत्तरः ॥ ७५९ ॥
इत्यवश्यं विधातव्यं राजकार्यं विजानता ।
धीमता गन्तुमेवाहमादेश्यो नान्यकर्मणि ॥ ७६० ॥
इदानीमुत्सुकतया सामान्यमपि रूपकम् ।
नेशः कर्तुं कुमारस्य यत्न[5]कृत्यं तु का कथा ॥ ७६१ ॥
अन्तरायो न कश्चिच्चेत् तदाऽऽगच्छद्दिवाऽप्यहम् ।
अवस्थाय कुमारस्य लिखिष्याम्येव रूपकम् ॥ ७६२ ॥
ततस्तिलकमञ्जर्याः पुरुषद्वेषिताग्रहम् ।
हरिष्ये बन्धुताचित्तसन्तापप्रकरैः सह ॥ ७६३ ॥
राज[6]कार्योद्यतः कालविलम्बे न क्षमोऽधुना ।
गच्छतस्तु निजं कार्यमपि किञ्चिदिहादिश ॥ ७६४ ॥
एतस्यां[7] दिशि लेखं वा सन्देशं वाऽल्पवस्तु वा ।
पुण्यपात्रस्य कस्यापि कृते मम समर्पय[8] ॥ ७६५ ॥
कुमारस्तमभाषिष्ट कृष्टदाक्ष्यादिसद्गुणम् ।
दक्षिणस्यां न लेखादिदक्षिणीयोऽस्ति कोऽपि मे ॥ ७६६ ॥
पराधीनो दिनमपि नावस्थापयितुं भवान् ।
शक्यतेऽस्माभिरीदृक्षकलाकेलिविचक्षणः ॥ ७६७ ॥
चक्रसेनसुतारूपमिदमर्पयता त्वया ।
समस्ताश्चर्यवीक्षाणां कृता वयमकौतुकाः[9] ॥ ७६८ ॥

1. NPB °स्वासिता°. 2. B निवेदित. 3. B. °गधव्यं. 4. B सिन्यथा. 5. NPB यन्न°. 6. B राजा°. 7. B एतस्या. 8. B समर्पयः. 9. B °कौतुका.

दत्त्वाऽऽभरणवस्त्राणि ससंभ्रममविभ्रमः ।
समागच्छे द्रुतमिति कुमारो विससर्ज तम्[1] ॥ ७६९ ॥

ऊचे समरकेतुस्तु निजलेखं समर्प्य तम् ।
प्रत्यावृत्तः सुवेलाद्रेर्भवान्[2] काञ्चीं गमिष्यति ॥ ७७० ॥

तत्र गन्धर्वदत्ताङ्गजन्मनः कान्तिसद्मनः ।
दद्यान्मलयसुन्दर्या लेखं रहसि रंहसा ॥ ७७१ ॥

स तथेति प्रपद्यार्थमापृच्छ्य सपरिच्छद[3]म् ।
कुमारं चित्र[4]मायेन सङ्गतो वियता गतः ॥ ७७२ ॥

क्षणं नीत्वा कुमारस्तत्कथयाऽवसथे निशि ।
स्मरन् गन्धर्वकालापकलापं हृद्यधादिति ॥ ७७३ ॥

चक्रसेनसुतारूपमसरूपमुवाच सः ।
तादृक्प्र[5]तिकृतौ यस्या रूपलेश इति ब्रुवन्[6] ॥ ७७४ ॥

यद्यसौ तादृगेवास्ति तर्हि तुष्टेन वेधसा ।
जगत्त्रितयनेत्राणां सूत्रिताऽमृ[7]तपारणा ॥ ७७५ ॥

विद्याधराणामन[8]या भवन्त्याऽजनि गौरवम् ।
अभवन्त्या[9] प्रियात्वेन लाघवं भुवनोत्तरम् ॥ ७७६ ॥

भूचरेषु वरोऽमुष्या भावीत्येतावताऽपि मे ।
अहो मनः समारब्धप्रचण्डतमताण्डवम् ॥ ७७७ ॥

तत्पाणिपल्लवं पाणिप्रणयीकृत्य कः कृती ।
लप्स्यते प्रथमां रेखां भाग्यसौभाग्यशालिषु ॥ ७७८ ॥

विकारास्तच्छु[10]तेः प्रादुर्भवन्तोऽङ्गे बलादपि ।
सङ्गोप्या इङ्गितज्ञानां कथमग्रे विप[11]श्चिताम् ॥ ७७९ ॥

क वैताढ्यः क[12] साकेतं स्पृहयंस्तां मृगीदृशम् ।
छु[13]रीकार इवाकाशं हन्तुमस्मि समुद्यतः ॥ ७८० ॥

व्यावर्तमानो मध्येन स किं खेचरदारकः ।
यास्यति क्षणमात्रक्या मैत्र्या मन्त्रितमानसः ॥ ७८१ ॥

---

1. B नं. 2. NPBK भवात्काचीं. 3. N °च्छहं; B °छंद. 4. NPBK बित्र°. 5. NP °त्रति°. 6. NPK ब्रुवत्. 7. B °त्रत°. 8. B °मनाया. 9. NPK °वंत्पा. 10. K °तत्कृतेः 11. N षिविप°. 12. B drops क. 13. K छरी°.

समेतो वा स वैताढ्यं किमाढ्य[1]ङ्करणान् गुणान् ।
वदन् मयायत्तचित्तां राजपुत्रीं करिष्यति ॥ ७८२ ॥

इत्य[2]नल्पविकल्पश्रीविश्रामभवनं भवन् ।
दरिद्रो निद्रयाऽनैषित् स रात्रिं[3] कैरवोपमः ॥ ७८३ ॥

प्रातः प्राप्तसुहृद्वर्गस्त[4]देवोपवनं पुनः ।
स तद्वार्तासुधापानसङ्केतस्थानमीयिवान् ॥ ७८४ ॥

तत्र चित्रपटारब्धवार्ताव्यतिकरेण सः ।
दिवसं गमयामास मांसलोत्कण्ठया सह ॥ ७८५ ॥

न[5]वोन्मीलितसौभाग्यमिवासौ दक्षिणां दिशम् ।
प्रेक्षमाणः क्षणमपि नेक्षणे विन्यवर्तयेत् ॥ ७८६ ॥

पश्यतोऽपि कुमारस्य वर्त्मनाऽगात् स दा[6]रकः ।
सन्तापवर्धनाद् ग्रीष्मः सापराध इवाभ्यगात् ॥ ७८७ ॥

मङ्गलातोद्यजीमूतध्वानसंनृत्तबर्हिणि ।
प्रविवेश जगत्याशु प्रावृड्[7]विश्वप्रियङ्करा ॥ ७८८ ॥

जाम्बूनदद्युतं विद्युल्लतां जम्बूपमेऽम्बुदे ।
तद्वर्णवर्णिकां पश्यन्नाश्व[8]सीन्न्यश्व[9]सीच्च सः ॥ ७८९ ॥

जलदे धृतकोदण्डे धारानारा[10]चवर्षिणि ।
भीतेव तस्य हृद[11]यात् सा भीरुर्निः[12]ससार न ॥ ७९० ॥

घनैः प्रवर्षिभिस्तापः समं तद्विधुरीकृतः ।
प्रविश्य [13]हृदये तस्य तस्थौ विधुरबान्धवे ॥ ७९१ ॥

वरं वियोगिनां तापमान्तरं प्रतिकुर्वताम् ।
गच्छ[14]न्नुत्तरतां गीष्मो न प्रावृडुपहास[15]कृत् ॥ ७९२ ॥

तापमेवंविधमसौ धृतापि स्नेहले हृदि ।
चक्रे तस्य भवेन्नूनं प्रियोऽप्यप्रियकृत् क्वचित् ॥ ७९३ ॥

---

1. P °माद्यं°. 2. NK इत्यतल्प°; B इत्युन°. 3. NK रात्रि. 4. B °स्तादेवो°. 5. NK तवो°. 6. B दीरकः. 7. NPK पावृद्विश्व°. 8. NPBK °नास्वसी°. 9. NPBK °न्न्यस्वसी°. 10. B °रा° is dropped in °नारात्र°. 11. P हृदयात. 12. B °भिःनिसार. 13. P हृदये. 14. B हासनःकृत्. 15. गछन्नु°.

व्यतिक्रान्तासु वर्षासु शरद् अम्बुजलोचना ।
शशाङ्कवदना सेव वीक्षितुं पाप तद्दशाम् ॥ ७९४ ॥
वेणुवीणाविनोदेषु विमुखोऽपि तदा पुनः ।
स प्रावर्तत सुहृदां स्वाभिप्रायं निगूहितुम् ॥ ७९५ ॥
प्रेषीन्ना[1]क्ष्यपि कौबेर्यां श्वा[2]सं श्रान्तोऽपि नामुचत् ।
नैच्छच्चित्रपटं द्रष्टुं शङ्का मा क्वापि भूदिति ॥ ७९६ ॥
गन्धर्वकस्यागमने सर्वथाऽनाशमानसः ।
अरत्या[3] तत्र च स्थातुमक्षमः क्ष्मापनन्दनः ॥ ७९७ ॥
अयं मनोविनोदाय यियासुर्दिशमुत्तरा[4]म् ।
देशवीक्षा[5]शयं मन्त्रीमुख्यैः क्ष्मापं व्यजिज्ञपत् ॥ ७९८ ॥
नृपानुमत्या[6] समरकेत्वाद्यैर्नृपजैर्युतः ।
सोऽथ चतुरङ्गचमू[7]वृतोऽचालीत् क्षणे शुभे ॥ ७९९ ॥
पदे पदे पदार्थानां चारुतां विज्ञदर्शिताम् ।
पश्यन् ददौ प्रयाणानि निर्विलम्बं स कानिचित् ॥ ८०० ॥
ग्रामानेतान् अ[8]दाद् देवः सत्राय स्मितमानसः ।
गृहा[9]रम्भनिमग्नानां दानमालम्बनं नृणाम् ॥ ८०१ ॥
व्योमोल्लेखिशिखो[10] रत्नकुम्भार्चिग्रस्तदिक्तमाः ।
नित्यं जगति नृत्यन्त्याः[11] स्वकीर्ते[12]र्दीपकोपमः ॥ ८०२ ॥
प्रासादोऽयं प्रसन्नेन देवेन श्रीमदर्हतः ।
समं जयपुरेणात्र कारितो विजितारिणा ॥ ८०३ ॥ युग्मम् ॥
उदीची[13]दण्डनाथेन श्रीमता नीतिवर्मणा ।
अक्षूणहूणनृ[14]पतिः पातितोऽत्र रणाङ्गणे ॥ ८०४ ॥
पोतैरपि सुखेनैवावगाढं वारिधिं हसत् ।
एतत् सरो दुर्विगाहं[15] महीयोभिरपि[16] ध्रुवम् ॥ ८०५ ॥
पूर्वजेन त्वदीयेन कारितं हारि तेजसा ।
इह स्नातेव तत्कीर्तिरजनिष्टामलीमसा ॥ ८०६ ॥

---

1. P °त्ताक्ष्य°. 2. NPBK स्वासं. 3. NPK अरत्पा. 4. B °मुत्तरा. 5. NPBK वीक्ष्या°. 6. NK °मन्या. 7. N चस्त°. 8. B °नदा° is dropped. 9. B गृही°. 10. B °शिषो. 11. N नृत्यंस्याः. 12. NPBK °कीर्ति°. 13. NK उदीचीं. 14. P °तृपतिः. 15. K °गाहे. 16. P °रवि.

सरितः पुरतोऽ[1]मुष्या देशः समरकेतवे ।
राज्ञाऽदीयत विद्वेषिविक्रमाम्भोधिसे[2]तवे ॥ ८०७ ॥

एवं पश्यं[3]श्चरोद्दिष्टान् देशानादेश्यभूभुजाम् ।
स्वश्रीकृताङ्गसौहित्यं लौहित्यं प्राप हेलया ॥ ८०८ ॥

विनोदैर्विविधैस्तत्र नयतः कालमन्यदा ।
मातङ्गसाधनाध्यक्षः पुष्कराक्षो[4] व्यजिज्ञपत् ॥ ८०९ ॥

कुमाराद्य करी वैरीयमदण्डाभिधो निशि ।
निर्गत्यागादरण्यानीमनीकमुखमण्डन[5]म् ॥ ८१० ॥

दृष्टश्चानुपदप्राप्तैस्तदाधोरणपूरुषैः ।
न शेके पुनरानेतुं स[6] तैर्यत्नशतैरपि ॥ ८११ ॥

ततोऽरण्येभयूथेन यावत् सङ्गच्छते न सः ।
तावत् साधनिकं कञ्चित् तमानेतुं समादिश[7] ॥ ८१२ ॥

एवमाकर्ण्य कमलगुप्तं शिबिररक्षकम् ।
कृत्वा सादी[8] कुमरोऽगात् समं समरकेतुना[9] ॥ ८१३ ॥

अह्नि चिह्नितोत्तु[10]ङ्गगिरिशृङ्गानुसारिभिः ।
दर्शिताध्वा हस्तिपकैस्तदरण्यमवाप सः ॥ ८१४ ॥

वन्यद्विपमदामोदात् पाषाणानिभविभ्रमान् ।
आघ्न[11]न्तं दन्तमुशलैः परिणम्य मुहुर्मुहुः ॥ ८१५ ॥

मषीपिण्डसपिण्डाङ्गं कृतसंहत[12]बृंहितम् ।
वर्षन्तं दानधाराभिर्धरागतमिवाम्बुदम् ॥ ८१६ ॥

अमान्तमिव चित्ता[13]न्तः क्रोधं सुचिरसन्ततम् ।
वमन्तमिव बन्धूकबन्धुभिर्दृष्टिदिष्टिभिः ॥ ८१७ ॥

भर्त्सयद्भिर्भृशं कैश्चित् ताडयद्भिश्च कैश्चन ।
सान्त्वयद्भिस्तथा कैश्चित् परिस्फुटवदु[14]क्तिभिः ॥ ८१८ ॥

पदबन्धोद्यतैः[15] कैश्चित् कैश्चिदङ्कुशपाणिभिः ।
आधोरणैः समाक्रान्तं[16] कुमारः[17] प्रैक्षत[18] द्विपम् ॥ ८१९ ॥

---

1. NK °नुष्या. 2. K °सेतेवे. 3. NPK पश्यं°. 4. K °क्ष्ये. 5. NB मंडतं; K मंडठं. 6. P drops स and adds it afterwards. 7. NPBK समादिशत्. 8. = सादीकृत्वा ? 9. N समरेकतुना. 10. N °त्तुंग°. 11. K आघ्रंतं. 12. PK वृंहितं. B बृहितं. 13. K चिह्वांतः. 14. NPK °वद्°. 15. K °द्यनैः. 16. NK °क्रांत. 17. B कुमार. 18. NPBK प्रैक्ष्यत.

कुमारः पाणिना वीणामादाय विषमं क्षितौ ।
उपवीणयितुं वीणाप्रवीण उपचक्रमे ॥ ८२० ॥

कर्णातिथेर्ध्वनेस्तस्य करीन्द्रः[1] कर्णचापलम् ।
आतिथेयं करोति स्म विस्मृतक्रोधपाटवः ॥ ८२१ ॥

तेन वीणाप्रणादेन विलीनानां रुषामिव ।
अश्रुश्रेणिमिषात् पेतुः किल निःस्य[2]न्दबिन्दवः ॥ ८२२ ॥

मा भूत् पदरवैर्विघ्नो मम कर्णाध्वनि ध्वनेः ।
इतीव वारणोऽचालीत् मन्दमन्दपदप्रदः ॥ ८२३ ॥

स कुमारवराभ्यर्णमाजगाम मतङ्ग[3]जः ।
मर्यादामनु कल्लोलमिव[4] कल्लोलिनीपतेः ॥ ८२४ ॥

मन्त्रेण स्तम्भित इव समुत्कीर्ण इवाश्मनि ।
गलच्चैतन्य इव स निश्चलाङ्गस्तदा स्थितः ॥ ८२५ ॥

मन्यमानः कुमारस्तं वशीभूतं वशाधिपम् ।
आरुरोह समुत्पत्य[5] [6]सृणिः [7]सृणिरिति ब्रुवन् ॥ ८२६ ॥

दिशो दिशः समादाय समादायाङ्कुशान् सितान् ।
आधोरणप्रवीणेषु धावमानेषु वेगतः ॥ ८२७ ॥

अधिष्ठित इवादृष्टप्रभावेण स केनचित् ।
करी चचाल तत्कालमुत्तालक्रमसङ्क्रमः ॥ ८२८ ॥

अयं गच्छ[8]त्ययं गच्छ[9]त्येवं कोलाहलाकुलाः ।
पत्तयः सादिनश्चामुमनुजग्मुर्मरुत्त्व[10]राः ॥ ८२९ ॥

इदमाकर्ण्यते घण्टारणितं [11]बृंहितं त्विदम् ।
एवं प्रतिपदं जातभ्रमः श्रममचिन्तयन् ॥ ८३० ॥

यातायात पथाऽनेनेत्युच्चैः संत्वरयन् नरान् ।
स्वयं समरकेतुस्तदरण्यं दिनमभ्रमत् ॥ ८३१ ॥

अस्तमीयुषि मार्तण्डे संपिण्ड्य सह सैनिकैः ।
कुमारानिष्ट[12]सूचाभिः सः द्रोर्मूलेऽनयन्निशाम् ॥ ८३२ ॥

---

1. B करीद्रः. 2. NPK निस्पंद°. 3. B मतगजः 4. NK drop कल्लोलमिव. 5. NK समुत्पत्य. 6. PB शृणिः; NK drop शृणिः 7. PB शृणि°; K श्रुणि°. 8. NP गछ°. 9. NP गछ°. 10. NPK मरुस्वराः. 11. NPK बृंहितं. 12. P निष्ठशूचा°; NBK °शूचा°.

पुनः प्रातभ्रमत्कर्णप्रकीर्णकविभूषितम् ।
तरुं दृष्ट्वा पथाऽनेन यातो हस्तीति निश्चयात् ॥ ८३३ ॥

गच्छ[1]न्नग्रे गिरिनदीतटं द्विपपदाङ्कितम् ।
पश्यन् विशेषतोऽयासीत् स कुमारदिदृक्षया ॥ ८३४ ॥

तरूणां निचितत्वेन विषमत्वेन चाश्मनाम् ।
न सादिनो व्रजन्त्यग्रे व्रतिनो दुर्गताविव ॥ ८३५ ॥

एवमावेदिते तज्ज्ञैः[2] केवलान् पुरुषान् पुरः ।
न्ययुङ्क्त युवराजोऽस्था[3]दरण्ये सैनिकैः सह ॥ ८३६ ॥

मिथः कथास्वपि जडैर्विषादात् सैनिकैर्वृतम् ।
युवराजं तृतीयेऽह्नि समीयुः प्रेषिताः नराः ॥ ८३७ ॥

तनुरेखापरिख्यातखदिरद्रु[4]मसङ्क्रमाः ।
क्षामताख्यायमानान्नपानीयपरिवर्जनाः[5] ॥ ८३८ ॥

मुखविच्छायताव्यक्तवाञ्छितार्थासमृद्ध[6]यः ।
अन्योन्यपृष्ठव्यवस्थानसन्मानितमनस्त्र[7]पाः ॥ ८३९ ॥

पृष्टाः कुमारवृत्तान्तं स्वयं समरकेतुना ।
विहितानतयः खेदमन्दामाददि[8]रे गिरम् ॥ ८४० ॥

युवराज तवादेशाद् वनदेशविहारिभिः ।
कुमारः प्रापि नास्माभिः कल्पद्रुरिव पापिभिः ॥ ८४१ ॥

दुश्चरित्रेण नाम्ना[9] च स मातङ्गः पुनर्भ्रमन् ।
ऋते कुमारमालोकि विना पुण्यैः पुमानिति ॥ ८४२ ॥

दर्शि[10]तस्वामिभक्तीनां दोषः कोऽप्यस्ति नात्र वः ।
इत्युक्त्वा[11] युवराजस्तान् विललापावि[12]लाशयः ॥ ८४३ ॥

हा बन्धो हा कलासिन्धो हा समाश्रितवत्सल ।
हा निःशेषगुणाधार हा सारस्नेहगेहभूः ॥ ८४४ ॥

प्रसादं कमलादेव्या नैमित्तिकवचांसि च ।
निन्यिषेऽलीकतामन्त्यां दशां गच्छ[13]न् गजाधमात् ॥ ८४५ ॥

---

1. P गछ° 2. NK तज्ञिः. 3. K °स्थो°. 4. B °दुर्म°. 5. K वर्ज्जवां. 6. NP समृद्धयः. 7. NP °सुपाः. 8. K °दगिरे. 9. NK नाम्रा. 10. B दशिति°. 11. NP °क्ता; K °त्तय. 12. NPK °बिला°. 13. NP गछन्.

स एवं विलपन् सर्वैः समं सामन्तसैनिकैः ।
यामिनीं समतिक्रम्य प्रभाते प्रोक्तवानिति ॥ ८४६ ॥

भो भो यान्तु भवन्तः श्रीस्कन्धावारे वदन्तु च ।
एवं कमलगुप्ताय कलिङ्गाधिपसूनवे ॥ ८४७ ॥

कुमारोपार्जितैर्वित्तैः सहैव सकलं बलम् ।
स्वामिने कोशलेन्द्राय द्रुतं गत्वा समर्प्यताम् ॥ ८४८ ॥

कुमारमनु[1]यास्यामि यो मामाद्येऽपि दर्शने ।
अमं[2]स्त सु[3]हृदं कर्मकरमप्यग्रिमः सताम् ॥ ८४९ ॥

स मां[4] विनाऽन्यलोकेऽपि प्रीतिं नाधिगमिष्यति ।
इत्यग्निसाधनेनाहं संगमिष्यामि तं द्रु[5]तम् ॥ ८५० ॥

आरचय्य ततस्तूर्णं चितामुचितकोविदः ।
स आप्तैर्विधृतोऽपि स्वं भस्मसात्कर्तुमाचलत् ॥ ८५१ ॥

तदा कमलगुप्तस्य हृत्तुल्यो लेखहारकः ।
अभ्येत्य[6] परितोषा[7]ख्यः कौमारं लेखमार्पयत् ॥ ८५२ ॥

हरिवाहननामाङ्को लेखः समरकेतवे ।
बभूव शो[8]कशल्यस्य विशल्यौषधिसम्भवः ॥ ८५३ ॥

स स्वेनाधिगतार्थं च लेखमाप्तकरेऽकरोत् ।
कथमा[9]गादयमिति तेनोक्तः स पुमान् जगौ ॥ ८५४ ॥

कुमारः क्वापि नापिती वाचि कर्णपथातिथौ ।
आक्रन्दाद्वैतमखिलस्कन्धावारजनेऽभवत् ॥ ८५५ ॥

प्रसादवित्तकजने मर्तुमेव समुद्यते ।
वेलावि[10]त्तेषु हन्तुं[11] स्वं समुत्क्षिप्तमहासिषु ॥ ८५६ ॥

तीर्थनिक्षिप्तकाष्ठेषु[12] वृद्धमन्त्रिषु वेत्रभृत् ।
लेखं कमलगुप्तस्य द्वारप्राप्तं समार्पयत् ॥ ८५७ ॥

तदैवातिप्रमोदेन सेनानीस्तमवाचयत् ।
स्वस्त्यमुष्या महा[13]टव्याः कुमारो हरिवाहनः ॥ ८५८ ॥

---

1. K °मतु°. 2. B असंस्त. 3. NK drop सु°. 4. B मा. 5. N द्रुतं. 6. N °न्य. 7. NPK परितोखाख्यः. 8. B सोक°. 9. K कथमांगा°. 10. NPBK चित्तेषु. 11. NBK हृदं 12. NPK काष्ठेषु. 13. B मठाटव्याः.

लौ[1]हित्यतटकटके सुहृदं चन्द्रकेतुजम् ।
यु[2]क्तं कमलगुप्तेन स[3]स्नेहं निगदत्यदः ॥ ८५९ ॥

अहमत्रास्मि कुशली तथा कार्यं यथा न मे ।
देवोऽपहारजां वार्तां वेत्ति दुःखाकरीमिति ॥ ८६० ॥

स संवर्तितलेखश्च दिक्षु संवीक्ष्य सर्वतः ।
भद्राः[4] केनायमानायीत्य[5]पृच्छ[6]ल्लेखहारकान् ॥ ८६१ ॥

यदा तेषु न कोऽप्याख्यत् तदा सञ्जातविस्मयः ।
आलोच्य मन्त्रिभिर्लेखं लिलेख स्वयमेव सः ॥ ८६२ ॥

द्वारोर्व्यां गोमयालेपशुचौ पुष्पादिपूजितम् ।
लेखं न्य[7]स्य ललाटाग्रयुक्तपाणिपुटोऽभवत् ॥ ८६३ ॥

कुमारलेखमादाय जनोऽयं येन जीवितः ।
सानुकम्पं स गृह्णा[8]तु विज्ञप्तिं[9] विज्ञ[10]धीरिति ॥ ८६४ ॥ युग्मम् ॥

तदैवान्तिकमाकन्दादागत्यैकः शुकः खगः ।
लेखं चञ्चुपुटेनाशु गृहीत्वोदीच्यखं ययौ ॥ ८६५ ॥

सेनानीर्विस्मितः स्माह सह सामन्तमन्त्रिभिः ।
आनैषीद् अहहानैषील्लेखमेष कथं शुकः ॥ ८६६ ॥

कुमारकुशलोदन्तमनन्तस्नेहगेहभूः ।
युवराजो वने नाप्य शोकश[11]ङ्कुसमाकुलः ॥ ८६७ ॥

मान्यो मान्योचितं किञ्चित् कर्म कुर्याद् अनार्यकम् ।
इति लेखं समर्प्याशु तेनाहं प्रेषितः प्रभो ॥ ८६८ ॥

अहं मार्गस्य दुर्गत्वं विगणय्यागमं रयात् ।
भवन्तमाश्रितजनमनःसङ्कल्पित[12]प्रदम् ॥ ८६९ ॥

इत्याक[13]र्ण्य दुकूलानि निजाङ्गाभरणानि च ।
ददाति च तदा तस्मै युवराजः प्रसादतः ॥ ८७० ॥

अमात्यराजलोकेन समं सञ्जातभोजनः ।
मध्याह्ने स्वप्नपर्यन्ते स हृ[14]दीत्थमचिन्तयत् ॥ ८७१ ॥

---

1. NPBK लौहित्य°. 2. B जुक्तं. 3. NPK सस्तेहं. 4. N भद्रां. 5. NK °त्यष्ट°. 6. P °पृच्छ°. 7. NK त्यस्य. 8. B गृह्णातु. 9. K °ति. 10. NK drop °ज्ञ°. 11. P °संतु°, corrected later on as °संकु°; NBK °संकु°. 12. K °संकल्पितः. 13. B °कर्णी. 14. NK हृंदी.

कुमारो नामनिर्देशान्न[1] लिलेखाटवीमपि ।
मामन्वा[2]यास्यतामासीद् आयासः सुहृदामिति ॥ ८७२ ॥

नैवाबुद्ध[3] कुमारः किं युवराजः स मां विना ।
अनिर्दिष्टां भ्रमन् भूमिं भृशमायासमेष्यति ॥ ८७३ ॥

अङ्गार इव कर्पूरं तं कुमारं विनाऽधुना ।
कथंकारमहं यामि मेघवाहनभूपतिम् ॥ ८७४ ॥

स काय इव विच्छा[4]यः कुमारेण[5] विनाऽऽत्मना ।
सकलत्रोऽपि पृथ्वीन्दुर्दर्शनीयः कथं मया ॥ ८७५ ॥

सरसीव सरोजस्य तिष्ठतः शिबि[6]रेऽपि मे ।
विच्छा[7]यस्य विना मित्रं हृदयं भावि शुन्मयम् ॥ ८७६ ॥

अहं खलु भविष्यामि कुमारानुपदं गमी ।
द्वीपान्तरेऽपि दिवसः स्वमित्रमनुगच्छ[8]ति ॥ ८७७ ॥

अप्रकाशितमेवैतज्जने परिजनेऽपि च ।
कर्तव्यमिति निश्चित्य स निशामनुपालयत् ॥ ८७८ ॥

छ[9]न्नं ममापि गन्तायमिति कोपादिवांशुमान् ।
बिम्बीफलकलालम्बी स बभूवापरो[10]ऽतिथिः ॥ ८७९ ॥

खगे देशान्तरं याति स्वनामबहुमानिनः ।
खगाः शाखिशिखारूढाः जगुः प्रस्थानमङ्गलम् ॥ ८८० ॥

पृष्ठे[11] प्रधाविता यान्ती मा हार्षीद् वैरिणी निशा ।
इति भीरुरिवाहः[12]श्रीर्गताऽऽदाय मणिं रविम् ॥ ८८१ ॥

दिनेशः सदिनः क्वास्तीत्यन्वेष्टुमिव शर्वरी ।
भुवनान्तः स्फुरद्दीपा प्रविवेशाविशङ्किता ॥ ८८२ ॥

दुष्टेन तमसा विश्वं नूनं स्यान्मलीनीकृतम् ।
इति कोपादिवाताम्रस्तुहिनांशु[13]रधावत ॥ ८८३ ॥

नियोगिन इव प्राप्तनियोगा जगदन्त[14]रे ।
राज्ञः कराः कृशतरा अपि प्रापुः परां श्रियम् ॥ ८८४ ॥

---

1. B °निर्देस्वन्न. 2. °मत्वा°. 3. NPK °बुद्धः. 4. NP विछायः; B छिछायः. 5. B °रेणा°. 6. NP शिविरे°. 7. NP विछाय°. 8. NP गछति. 9. K च्छन्नं, 10, N °पारा°. 11. NPBK पृष्ठे. 12. NPBK °हश्री°. 13. K तुहिनांसु°. 14. N °दंतेरे,

दक्षैरप्यलक्ष्यगतिपरिणामः सितद्युतिः ।
गगनाङ्गणमध्यास्त युवराजस्तदा सदः ॥ ८८५ ॥

सेवासमयसंप्राप्तं राजलोकं निजौकसि ।
निर्निदेशोचितालापकलापस्फुटसंमदम् ॥ ८८६ ॥

आत्मनोऽपि परीवारे निद्रामुद्रितलोचने ।
निशीथे निर्ययावेष निशितासिपरिच्छ[1]दः ॥ ८८७ ॥

पत्रपांसु[2]तृणाकीर्णेनाध्वना सञ्चचार सः ।
यथाऽनुपदिकः कोऽपि न भवेत् पददर्शनात् ॥ ८८८ ॥

दूरात् परिचि[3]तान् मुञ्चन् पथि केनाप्यनासजन् ।
मर्यादीकृतवैताढ्य उदीचीपथि सोऽचलत् ॥ ८८९ ॥

मध्याह्नसमये शैल[4]नदीकूलकृतस्थितिः ।
देवतावसरस्यान्ते फलान्याहरति स्म सः ॥ ८९० ॥

पुनःपर्यटपन्थानमायासं विगणय्य सः ।
नक्तं सिंह इवास्वाप्सीन्महीधरगुहागुहे ॥ ८९१ ॥

आपादमस्तकं मुक्तामणिप्रगुणितश्रियः ।
शतशः[5] शबरीः पश्यन् पयोधिलहरीरिव ॥ ८९२ ॥

सहर्षान् पर्षदासीनान् मषीसखतनुत्विषः ।
भिल्ला निभालयन् प्रेतराजस्यानुचरानिव[6] ॥ ८९३ ॥

अङ्गानां च नगानां च नारीणां चासितत्विषाम् ।
दर्शनादेकवर्णत्वं जानंस्तत्र तदापि सः ॥ ८९४ ॥

अनेकजन्तुसन्तानवधबाधानिबन्धनम् ।
भिल्लपल्लीकृतान्तस्य भल्लीवद् व्य[7]त्यवाहयत् ॥ ८९५ ॥ कलापकम् ॥

कुसुमैः सुरभीकर्तुं घनानामुपकारिणाम् ।
उच्चैरम्बरमभ्येयुः कुलीना यत्र पादपाः ॥ ८९६ ॥

कुजानां च ग[8]जानां च स्वच्छा[9]याकरशीकरैः ।
मिथो यत्रोपकर्तॄ[10]णामेति मध्यं दिनं[11] सुखम् ॥ ८९७ ॥

---

1. NP °परिछदः. 2. NPBK °पांशु°. 3. B परिचिंतान्. 4. B शैम°. 5. B drops °शः. 6. NK °निवा. 7. NPB °वद्वयत्य°; K °वद्मत्य°. 8. B चरगजानां. 9. NP स्वछाया°, 10. NPK °कर्तृणा°. 11. NK दिन.

यस्यामहर्दिवं मत्तः सिंहनादः पदे पदे ।
आज्ञेव प्रेतराजस्य रुणद्धि[1] गतिमङ्गिनाम् ॥ ८९८ ॥

बहुदिव्यौषधैरपि व्याधी[2]नां या निकेतनम् ।
स्फुरत्शशधरौघाऽपि चित्रं तापपदाऽङ्गिनाम् ॥ ८९९ ॥

निर्भयत्वेन जानानः स भीमामप्यभीषणाम् ।
अटवीं तामती[3]याय व्यापत्तीमिव लीलया ॥ ९०० ॥

विहर्तुं वनमन्येद्युः कामरूपाधिपानुजः ।
गच्छ[4]न् मित्रधरोऽद्राक्षीत् तं मध्याह्ने पथि स्थितम् ॥ ९०१ ॥

युवराजः कथमसावेकाकीति विशङ्कितः ।
नत्वा क्षेमं कुमारस्य पृष्ट्वा तं सोऽनयद् गृहे ॥ ९०२ ॥

आवेदितापहारं तं कुमारस्यानुरूपया ।
भक्त्या[5] संपूज्य सर्वस्वं गृहाणेति जगाद सः ॥ ९०३ ॥

पाथेयमप्य[6]नादायानुयातं तं[7] निवर्त्य च ।
युवराजोऽप्यपन्थानमग्रिमं त्वरितोऽग्रहीत् ॥ ९०४ ॥

आर्यानार्यविशोऽमुष्य द्रुतमाक्रमतः क्रमात् ।
व्यतिचक्राम षण्मासी भूशयस्य फलाशिनः ॥ ९०५ ॥

पश्चिमेन स्फ[8]टिकाद्रेरुपवैताढ्यमन्यदा ।
एकशृङ्गगिरेः शृङ्गे स ददर्श महासरः ॥ ९०६ ॥

सौष्ठ[9]वेन प्र[10]देशानां रुध्यमानः पदे पदे ।
अदृष्टपारं यच्चित्रैरपीत्याख्यामगादिमाम् ॥ ९०७ ॥

एवंविधमतोऽन्यत्र सरो नास्तीति शाखिभिः ।
शाखामिषेण यत्रोच्चैः सर्वदिक्ष्व[11]र्दिताः कराः ॥ ९०८ ॥

चेलुः प्रतिदिशं यस्य वातोद्धूता महोर्मयः ।
सेना इव स्व[12]वन्तीशं गाम्भीर्येण जिगीषवः ॥ ९०९ ॥

सुस्वादुना गभीरेण निर्जित्यानेन नीरधिः ।
जाने निः[13]शेषवसुधामण्डलस्य बहिः कृतः ॥ ९१० ॥

---

1. NP रुणद्धि. 2. B व्याधीयानां. 3. NPBK °मतिया°. 4. NP गछन्. 5. B भक्तंपा. 6. PB °प्या°. 7. NK drop तं. 8. NPBK स्फुटिका°. 9. B °ष्ठ°. 10. NPBK प्रदेशानां. 11. NPBK °क्ष्वर्द्धि°. 12. NPK श्र°. 13. NK ति:°.

उपर्यधश्च नेदृक्षमन्यन् मन्ये महासरः ।
वैताढ्यपातालभुजां तेनात्रायान्ति सुभ्रुवः ॥ ९११ ॥

कनकाम्भोजकिञ्जल्कसुरभीभूतवारिणि ।
तत्र स्नात्वा श्रमस्यादाद् युवराजो जलाञ्जलिम् ॥ ९१२ ॥

माधवीमण्डप[1]स्यान्तः समस्तश्रमहारिणि ।
सुष्वाप स्फ[2]टिकशिलातले तल्पानुकारिणि ॥ ९१३ ॥

वीचीनां ग्रास[3]मध्याह्वव्यतिवाहनहेलया ।
कृतकोलाहलध्वानं सिञ्चन्तीनां मिथः किल ॥ ९१४ ॥

रभसेनानिलैः सार्धं धावितैः शीकरोत्करैः ।
हृतशारीरसन्तापं तं निद्रा सहसाऽऽश्लिषत् ॥ ९१५ ॥

ददर्श दिष्टमाश्लिष्टमेकया कल्पवीरुधा ।
पारिजाततरुं स्वप्ने सहसा स व्यबोधि च ॥ ९१६ ॥

मित्रं ममात्र कुत्रापि ध्रुवं संगस्य[4]ते द्रुतम् ।
इति निश्चितवानेष सविशेषमुदास्पदम् ॥ ९१७ ॥

परितः स्फुरितोन्मेषां हेषां प्रवरवाजिनाम् ।
शुश्राव स्वप्नजानन्दमाकन्दमधुविभ्रमाम् ॥ ९१८ ॥

सोऽचिन्तयद् इहारण्ये हिंस्रश्वा[5]पदसम्पदि ।
नृपपदत्तरङ्गाणां तुरङ्गाणां क सङ्गतिः ॥ ९१९ ॥

परं जिष्णुर्नृपः कश्चिच्चलितः स्या[6]द् दिशां जये ।
मृगयाकाम्यया कोऽपि पल्लीपतिरथाभ्यगात् ॥ ९२० ॥

विद्याधरनृपः कोऽपि क्रीडितुं यदि वाऽऽगमत् ।
इति हेतुं ध्वनेर्ज्ञातुं निर्ययौ[7] स लतागृहात् ॥ ९२१ ॥

सरःपुलिनवैपुल्याद् बाहुल्याच्च महीरुहाम् ।
अयं किमपि नाद्राक्षीद् दिक्षु चक्षुः[8] क्षिपन्न[9]पि ॥ ९२२ ॥

ज्ञातेनापि किमेतेन समारब्धविरोधिना ।
एवं विमृश्य विश्रामं[10] विश्रमो गन्तुमस्म[11]रत् ॥ ९२३ ॥

---

1. P °मडप°. 2. NPBK स्फु°. 3. NPB drop °स°. 4. K °म्य°. 5. NPBK °स्वा°. 6. NPBK स्या°. 7. NK निर्ययो. 8. NPK चक्षु; B. चिक्षु. 9. B क्षिपत्तिपि. 10. NPBK °म. 11. B °स्मिरत्.

कृपाणं पाणिनाऽऽदाय पद्मसब्रह्मचारिणा ।
अंसेन स्फुरताऽक्ष्णा च दक्षिणेन कृत[1]त्वरः ॥ ९२४ ॥
सौ[2]न्दर्येण प्रदेशानां स्खल्यमानः पदे पदे ।
औत्सुक्येन च मनसस्त्वर्यमाणः पुनः पुनः ॥ ९२५ ॥
निर्विलम्बतया गन्तुं स्थातुं चायमनीश्वरः ।
प्राचीतडागतीरेण प्रतस्थे दिशमुत्तराम् ॥ ९२६ ॥
स वामदक्षिणक्षिप्तचक्षुरैक्षत हेलया ।
जलस्थलचरान् हस्तिहयप्रमुखजन्मिनः ॥ ९२७ ॥
स गतः सरसस्तीरमुत्तरं शोभयोत्तरम् ।
स देशेऽदर्शद् उद्यानमास्थानंप्रतिमं मधोः ॥ ९२८ ॥
श्या[3]मं पुष्पाञ्चितं चान्तर्ध्वान्तताराममयं निशः ।
यन्निधानमिवाक्षय्य[4]ममेयं भानुरोचिषाम् ॥ ९२९ ॥
यत्र किन्नरयुग्मानां गायतां स्पर्धया मिथः ।
अभ्यस्यन्तीव सम्यत्वं शृण्वन्तोऽवहिता मृगाः ॥ ९३० ॥
यत्रामन्त्रितमामोदैः परितः षट्पदीकुलम् ।
अनिर्धारितगमनं भ्रा[5]म्यन् निर्मूच्छ[6]नायते ॥ ९३१ ॥
पश्यतां निर्निमेषाक्षि यस्मिन्नाप्या[7]यके दृशाम् ।
नराणाममराणां च नान्तरं जातु जायते ॥ ९३२ ॥
प्रज्वलन्त्यो महौषध्यो[8] यदाजहुस्तमो निशि ।
यत्र श्यामप्रभादम्भादुद्गिरन्तीव तद्दिने ॥ ९३३ ॥
अहो कीदृग् अरण्ये[9]ऽपि मनसः स्तम्भनं वनम् ।
एवं कौतुकसंरुद्धपुरोगतिरिहाविशत् ॥ ९३४ ॥
वनान्तः कल्पवृक्षाणामेव ष[10]ण्डमखण्ड[11]रुक् ।
कुतश्चिच्चकितैर्देवैः कृतन्यासमिवासदत् ॥ ९३५ ॥
यत्रोपमानं किं तेषां कल्पद्रूणां भवत्विह ।
विवर्तः कमला येषां शृङ्गारो जगतामपि ॥ ९३६ ॥

---

1. B क्षत°. 2. B सौद°. 3. NPBK श्या°. 4. NPBK °क्ष्यम°. 5. NPK भ्रम्यन्. 6. NP °मूंछि°. 7. NPK °प्या°. 8. NPK °ध्यो. 9. NPK °ण्ये°. 10. K खंड°. 11. N °डरखंम°.

किमेकं वर्ण्यते तस्य कल्पद्रोरेक एव यः ।
समकालमनेकेषां दारिद्र्यं द्रोग्धुमीश्वरः ॥ ९३७ ॥

दलान्येव दुकूलानि मञ्जर्यो भूषणावलिः ।
फलं सङ्कल्पितं यस्य तरुः सोऽप्युच्यते जनैः ॥ ९३८ ॥

इति जल्पन् पुरोऽपश्यच्चै[1]त्यं नाम्ना सुदर्शनम् ।
राजत्यामूलचूलं[2] यत् पद्मरागशिलामयम् ॥ ९३९ ॥

यत्प्रभारुणितं व्योम वीक्ष्य प्राप्ताः पराह[3]तिः ।
भास्करस्याश्वसन्तोऽश्वा वल्ग[4]न्ति मदमन्थरम् ॥ ९४० ॥

एतावदीदृशं कुत्र कर्त्रा दलितमाप्यत ।
एवं विस्मयविवशः प्राविशत् स तद[5]न्तरे ॥ ९४१ ॥

अपश्यन्मण्डपे तत्र मणिपाञ्चालिकागणम्[6] ।
स्फटि[7]कद्युति दुग्धाब्धौ खेलद्गोत्रमिव श्रियः ॥ ९४२ ॥

अनुभावेन केनापि स्त्यानीभूताऽमृतैरिव ।
विनिर्मितामष्टमहाप्रतिहार्यपरिच्छदाम् ॥ ९४३ ॥

गर्भागारेऽनगारेन्द्रनाभेयप्रतिमामयम् ।
अदर्शद् दर्शनीयानां सीमानममितत्विषम् ॥ ९४४ ॥

भुवनेष्वप्यसम्भाव्यं तद् रूपं स निरूपयन् ।
संप्रमुग्धोऽविदग्धोऽपि स्थित्वा नत्वा तमब्रवीत् ॥ ९४५ ॥

भ[8]र्तश्चिन्तामणिः पाणिं कल्पद्रुर्मे[9] गृहाङ्गणम् ।
कामधुग् वेश्मनो मध्यमध्यास्तेऽद्य त्वदीक्षणात् ॥ ९४६ ॥

निःशेषासुखकन्दानाममन्दानां कुकर्मणाम् ।
स्थानं संसारकान्तारमतीतोऽद्य त्वदीक्षणात् ॥ ९४७ ॥

इत्यभिष्टुत्य चैत्यस्य जगतीमीक्षितुं भ्रमन् ।
हरिवाहननामाङ्कं स श्लोकमशृ[10]णोत् तदा ॥ ९४८ ॥

हरिवाहन बिभ्राणे त्वयि दानधुरं चिरम् ।
निश्चिन्तः खेलतु[11] वने नन्दने कल्पपादपः ॥ ९४९ ॥

---

1. B °बै°. 2. B चूडलं. 3. NPK °हृतिः. 4. B वलांति. 5. PNBK °तंदं°. 6 NBK. °गण. 7. NPBK स्फुटिक°. 8. NPB भर्तः श्चि°; K भरत°. 9. NPK °मेर्गृं°. 10. K °सृ°. 11, NK °नु.

सुस्व[1]प्नादिसमुत्पन्नानन्दसञ्जीवनौषधैः ।
ध्वानस्तस्यानुसारेण याम्यद्वारेण स व्रजन् ॥ ९५० ॥

रम्यतायामकुण्ठस्य मठस्य प्रविशन् मुखे ।
उत्तीर्णमुपरि क्ष्मायाः स गन्धर्वकमैक्षत ॥ ९५१ ॥

युवराजं स गन्धर्वः प्रत्यभिज्ञातवानपि ।
संप्रमुग्धः पुनस्तत्स्थावसंभाव्यतया[2] तथा ॥ ९५२ ॥

अये गन्धर्वक इति तेनोक्तः स स[3]सम्भ्रमः ।
दिष्ट्या युवराट् समरकेतुरित्युक्तवान् नतः ॥ ९५३ ॥

वातायननिषण्ण[4]स्तं पदसंवाहनोद्यतम् ।
अगाधसत्त्वो[5] गन्धर्वं सोऽगदद् गदतांवरः ॥ ९५४ ॥

प्रत्यहं स्पृहणीयेन दर्शनेनैव ते वयम् ।
जाता गतश्रमाः सम्यक्कार्यसिद्धेरिवाधुना ॥ ९५५ ॥

भ्रातः प्रातः समेष्यामीत्युक्त्वा त्वयि तदा गते ।
अनागच्छ[6]ति कुशलवार्तामप्य[7]प्रयच्छति ॥ ९५६ ॥

शरीरकारणं किञ्चिदासीत् तस्यान्तरायकम् ।
यद्वा दैववशात् किञ्चित् कार्यान्तरमुपस्थि[8]तम् ॥ ९५७ ॥

विस्मृता वा वयमिति त्वच्चिन्ताचा[9]न्तचेतसा ।
गतं नः स कुमाराणां कष्टान्मासचतुष्टयम् ॥ ९५८ ॥

झगिति प्रत्यभिज्ञानान्न तावद् विस्मृता वयम् ।
द्वितीयेऽह्नि भवान्[10] कच्चिन्मलयाद्रितटेऽगमत् ॥ ९५९ ॥

ऊचे विचित्रवीर्याय चित्रलेखार्पितं वचः ।
गन्धर्वदत्तां [11]द्रविडराजकान्तां[12] तथैक्षत ॥ ९६० ॥

मल्लेखस्तत्सुतापाणिपद्मभ्रमरतां गतः ।
कियन्तमपि कालं त्वं कच्चित् काञ्च्यामवस्थितः ॥ ९६१ ॥

क[13]च्चित् तिलकमञ्जर्याः क्वापि प्राप्युचितो वरः ।
चित्रमायः सहायस्ते कुत्रेदानीं स वर्तते ॥ ९६२ ॥

---

1. K °स्वप्ना. 2. NK °तथा. 3. NK मसं°. 4. B °निषण°. 5. PNBK °सत्वो. 6. NP °छ°. 7. NPK °प्य°. 8. PN °स्ठि°. 9. NPBK °वांत°. 10. K °त्क°. 11. B द्र°. 12. K °कांता. 13. K क्व°.

कोऽयं गिरिः सरः केनाखानीदमतिमानसम् ।
इदमायतनं केन साराममपि कारितम् ॥ ९६३ ॥

प्रभाविलुप्तसूर्यांशुमाणिक्यकृतकुट्टिमे ।
कश्चा[1]स्त्यत्र मठे येन कृतवार्तोऽधुनाऽऽगमः ॥ ९६४ ॥

स एवं युवराजेन पृष्टः प्रोवाच तां प्रति ।
एतद् विज्ञपयिष्यामि पश्चात् सम्प्रत्यदः शृणु ॥ ९६५ ॥

सिद्धाढ्यविद्यो वैताढ्यशिखरे चण्डगह्वरे ।
इदानीं खेचरस्वाम्येऽभिषिक्तः सर्वखेचरैः ॥ ९६६ ॥

एतस्योपवनस्यान्तः कान्तश्रीर्हरिवाहनः ।
समस्त्यायातपादातहयप्रायपरिच्छदः ॥ ९६७ ॥

पथोऽस्यातिक्रमः पद्भ्यां बाहुभ्यामम्बु[2]धेरिव ।
सुदु[3]ष्क्रमः फलं तस्या दत्स्व भ्रातुर्विलोकनात् ॥ ९६८ ॥

इत्युक्तः सिंहलाधीशसूनु[4]रुत्थाय तत्सखः ।
मूलायतनजगतीप्रतिमाः प्रणमन् क्रमात् ॥ ९६९ ॥

निर्ययौ चैत्यवप्रस्य प्रतोल्योत्तरदिक्स्थ[5]या ।
अनुत्तरतरतरदुत्कण्ठातरलाशयः ॥ ९७० ॥

सशब्दं चरतः प्रेक्ष्य तार्क्ष्यान् दध्यावयं ध्रुवम् ।
हेषामागच्छतामेषामश्रौषं वल्लिवेश्मनि ॥ ९७१ ॥

आ[6]लोकेनेव लोकेन राज्ञां सेवितमग्रतः ।
अन्यतो मेरुवद्भास्वद्[7]गर्वैर्बन्दिकदम्बकैः ॥ ९७२ ॥

अनल्पकदलीपत्रमात्रकल्पिततल्पया ।
वयस्योत्सङ्गविन्यस्तनिःसहार्धशरीरया ॥ ९७३ ॥

अनुकु[8]र्वाणया कामं परिम्लानमृणालि[9]नीम् ।
रूपशोभापराभूतपुरुहूतनतभ्रुवा ॥ ९७४ ॥

अनिमेषदृगम्भोजभोज्यलावण्यपूरया ।
प्रारब्धमधुरालापमेकया राजकन्यया ॥ ९७५ ॥

---

1. NPK °श्च्या°. 2. NK °संबुधे°. 3. NPBK सुदुःक्रमः. 4. NK °स्तनु°. 5. B °स्था°; K °स्छ°, 6. K अलोके°. 7. K °भावद्गर्वै°. 8. B °कूर्वाण°. 9. N मृणान. NK मृणालिनी.

सारवार[1]वधूवीज्यमानचामरमारुतैः ।
चलवस्त्राञ्चलमसौ ददर्श हरिवाहनम् ॥ ९७६ ॥ पञ्चभिः कुलकम् ॥

गन्धर्वेण पुरोऽभ्येत्य स विज्ञप्तः प्रभो प्रभो ।
आया[2]तः समरकेतुर्युवराजः प्रवर्ध्यसे ॥ ९७७ ॥

कुत्र कुत्रेति साक्षेपं व्याहरन् हरिवाहनः ।
तस्याभिमुखमुत्तस्थौ विधोरिव महोदधिः ॥ ९७८ ॥

अतिप्रयत्नसंरुद्धबाष्पपूरः सुदूरतः ।
प्रणना[3]म तं समरकेतुर्भून्यस्तमस्तकः ॥ ९७९ ॥

उत्था[4]प्य गाढमाश्लिष्योपविशन्तममुं क्षितौ ।
प्रसभं स्वासनस्यार्धे नरेन्दु[5]र्विन्यवेशयत् ॥ ९८० ॥

दृशा तदाऽङ्गे गोक्षीरशुद्धया निस्तरङ्गया ।
मार्गाक्रमणसङ्क्रान्तं काठिन्यं[6] कुण्ठयन्निव ॥ ९८१ ॥

अन्तःसन्ततसन्तापशमनप्रमनस्कया ।
वाचा तं कौशलं पृष्ट्वा नरेन्दुः क[7]न्यकां जगौ ॥ ९८२ ॥ युग्मम् ॥

अयं देवि स सन्मित्रं चन्द्रकेतुसुताग्रिमः ।
रिपुभूपप्रतापार्कराहुबाहुपराक्रमः ॥ ९८३ ॥

मदेकजीवितधनतयैवेष सुदुर्गमम् ।
मार्गं महान्तं समरकेतुः स्वयमिहागमत्[8] ॥ ९८४ ॥

अनुकूलविधेराप्तं त्वन्मुखालोकजं सुखम् ।
क्षणमन्तरितं देवि यदीयोत्कण्ठया मया ॥ ९८५ ॥

स्वस्रा[9] मलयसुन्दर्या योऽयं देवि त्वदीयया ।
स्वयमेव वृतो[10] भर्ता सुभगैकशिरोमणिः ॥ ९८६ ॥

उत्था[11]य युवराजोऽथ प्रथितादरसुन्दरः ।
प्रणनाम सुधीधामदेव्याः पद्मोपमौ क्रमौ ॥ ९८७ ॥

साऽपि स्नेहतरङ्गिण्या दृशा सर्वङ्कमच्छि[12]दा ।
स्नपयन्तीव निःशङ्कं तमरतोकमलोकत ॥ ९८८ ॥

---

1. B °चार°. 2. NK आयांतः. 3. K °ताम. 4. NPK °त्छा°. 5. B °न्द्र°. 6. N °त्यं. 7. NPK. कान्य°. 8. °महामत. 9. B स्वया. 10. P भृतो; NK भ्यता. 11. NP °त्छा°; K °च्छा°. 12. P °छिदा.

वेत्रिण्यथावदत् कन्यां श्रुत्वा ते मरणोद्यमम् ।
श्रीपत्रलेखया देव्या कञ्चुकी प्रेषितोऽभ्य[1]गात् ॥ ९८९ ॥

स द्वारि वारितोऽस्तीति श्रुतवत्यपि सोत्तरम् ।
नादान्नरेन्दुमालोक्य स्मित्वा मौनेन तस्थु[2]षी ॥ ९९० ॥

उत्फु[3]ल्लाननपद्मायां पद्मिन्यां स्नेहवानपि ।
भानुः सकलकार्याणां समयं न विलङ्घते ॥ ९९१ ॥

इति गीतं निशम्याख्यत् कन्यायै हरिवाहनः ।
गायन्नेष विराधा[4]ख्यो विद्याधरविदूषकः ॥ ९९२ ॥

राजधानीप्रवेशाय लग्नमासन्नमब्रवीत् ।
तन्मा गा दिश त्वमपि पत्रलेखाश्रयं श्रय ॥ ९९३ ॥

एवमस्त्विति तद्वाचमाचम्य खचराग्रणीः ।
प्रगुणीकृतमारोहद् इभं समरकेतुयुक् ॥ ९९४ ॥

निषा[5]दिसादिपत्ती[6]नां वारेण परिवारितः ।
सहसा नभसाऽचालीद् उत्तरां स गुणोत्तरः ॥ ९९५ ॥

अगाद् अगाधामटवीं गाहमानो मनोगतिः ।
वैताढ्यदक्षिणाश्रेण्यां पुरं गगनवल्लभम् ॥ ९९६ ॥

प्रत्यापणगृहोत्क्षिप्तपताकापटलाकुलम् ।
किल स्वामिधनोन्नत्या पोद्गतानन्दकन्दलम् ॥ ९९७ ॥

सिद्धविद्योऽभ्यगाद् ईश इति लोकैर्दिदृक्षुभिः ।
आगत्यागत्य सम्पूर्यमाणराजचतुष्पथम् ॥ ९९८ ॥

पारिजातदलव्रातकृतचन्दनमालिकम् ।
किल कस्तूरिकापङ्कविनिर्मितललाटिकम् ॥ ९९९ ॥

मङ्गलातोद्यनिनदैः प्रविशद्भिर्जनश्रुतौ ।
तुल्यलब्धलग्न इव खेचरेन्द्रोऽविशत् पुर[7]म् ॥ १००० ॥ कलापकम् ॥

मङ्गलैः सममध्यास्य निजावासं विशांपतिः ।
विससर्ज सहायातं गृहाय क्षितिभृग्ग[8]णम् ॥ १००१ ॥

---

1. NK °न्यगात्. 2. NP °स्थु°. 3. NPB °त्पुल्ल°. 4. NK °वा°. 5. NPBK निखादि°.
6. NP °पत्नीनां; K °पलीनां. 7. K पुरां. 8. SK °तुग्गणं.

कारितस्नानसमरकेतुना हेतुना मुदाम् ।
समं समञ्चितरसां भेजे रसवतीं ततः ॥ १००२ ॥

आस्थे सहजसौरभ्यलुभ्यद्दिभ्य[1]मधुव्रते ।
ता[2]म्बूलं दधतुरिमौ नीतिर्लक्ष्मीव्रतामियम् ॥ १००३ ॥

राजकार्यसखं शेषं दिवसस्यातिवाह्य सः ।
स्वस्यापहारात् समरकेतोः शु[3]श्राव स[4]ङ्कथाम् ॥ १००४ ॥

संसारवदसम्भाव्यपारदर्शनमीदृशम् ।
इयन्तं कथमध्वानं ह्यपि त्वमवापयः ॥ १००५ ॥

एकशृङ्गगिरावावां कथमेकक्षणागतौ ।
मिलितौ युगसमिला[5]दृष्टान्तमनुपातिनौ ॥ १००६ ॥

भूमीन्दौ विस्मयानन्दसुन्दरं निगदत्यदः ।
अपाठीत् पाठिनां प्रष्ठः[6] प्रातर्मङ्गलपाठकः ॥ १००७ ॥

कक्षीकृताऽपि नक्षत्रैर्निशा नश्यति भास्वति ।
भवतीव कृतोद्योगे योगज्ञरिपुमण्डली ॥ १००८ ॥

भ्रष्टस्पर्ध इवास्येन त्वदीयेन समं विधुः ।
देव देशान्तरं याति लज्जमान इवाधुना ॥ १००९ ॥

शरैरिव[7] करैर्भानोर्भिद्यमानं तमोवलम् ।
अपहाय नभोभूमिं प्रयात्यचलकन्दरान् ॥ १०१० ॥

समुद्यत्कमलामोदप्रमोदितजगज्जनम् ।
भवद्राज्यमिवोदेति देव मार्तण्डमण्डलम् ॥ १०११ ॥

कृत[8]प्रातःक्रियायाथ भूभुजे मित्रसंयुजे ।
व्याजहार प्रतीहारो वैताढ्यस्याढ्यतामिति ॥ १०१२ ॥

गिरेरस्यार्णवः प्राच्यः पश्चिमश्च प्रतिक्षणम् ।
सम्पा[9]दयति शुभ्रत्वं[10] फेनपूरैः स्वरोधसि ॥ १०१३ ॥

शिखरौद्धत्यसंरुद्धखरांशुरथपद्धतिः ।
माणिक्यालोकसंलुप्तनिशादिन[11]विवेचनम् ॥ १०१४ ॥

---

1. K °दिव्य°. 2. NK सतांबुलं. 3. PB सुश्राव. 4. NK सकथां. 5. = शमिला = शम्या = a wooden pin, or peg, wedge, &c. 6. NP प्रष्ठः. 7. K °स्वि. 8. NPBK कृतः°. 9. NPK संवादयति. 10. K °स्व. 11. NK °दिन°.

चन्द्राननवारिषेणवर्धमानर्षभार्हताम् ।
बिम्बै[1]रलङ्कृतं कामधेनुभिः सुकृतश्रियाम् ॥ १०१५ ॥

जात्यमाणिक्यमुकुटमस्य शैलस्य शाश्व[2]तम् ।
सिद्धायतनमतनुसम्पदामिदमा[3]स्पदम् ॥ १०१६ ॥ विशेषकम् ॥

एतानि कायमानानि दीप्राणि मणिदीप्तिभिः ।
विस्मारयन्ति त्रिदशसुदृशां त्रिदशालयम् ॥ १०१७ ॥

सर्वर्तुषु वनेष्वेषु श्रान्तविश्रान्तसुभ्रुवाम् ।
कर्णामृतानि गायन्ति किन्नराः किन्नरीसखाः ॥ १०१८ ॥

चन्द्रकेतुसुतोऽब्रूत हर्षद्रुमसुमं वचः ।
कलधौतकलस्यास्य वर्ण्यं मेरोश्च नास्ति किम् ॥ १०१९ ॥

वर्ण्यो देव त्वमेवैको य एकः स्वल्पवासरैः ।
असम्भाव्यां व्यधाः स्पष्टां श्रियं न्यासीकृतामिव ॥ १०२० ॥

तद् आदिश त्वया देशे क्व वियुक्तं कुदन्तिना ।
लेखः स्था[4]नात् कुतः केन शिबिरे प्रेषितो द्रुतम् ॥ १०२१ ॥

आकाशगामिनीमुख्या कथं विद्याः समासदः ।
सुखं दुःखं च किं कुत्र स भवाननुभूतवान् ॥ १०२२ ॥

वने केन प्रसङ्गेन प्राप्तश्चैत्ररथोपमे ।
वियोगिवेषा कन्या का यत्पुरो मां न्यवेदयः[5] ॥ १०२३ ॥

सिंहलेन्द्रात्मजेनैवं व्याहृतो हरिवाहनः ।
वचः प्रोचेऽनवच्छिन्नरोमाञ्चनिबन्धनम् ॥ १०२४ ॥

सहते स्म स हस्ती न ममाददतमङ्कुशम् ।
विधुतं विधिना कार्यमिवोपायसमागमम् ॥ १०२५ ॥

पृष्ठ[6]प्रधावितान् लोकानस्तोकानवमन्य सः ।
प्राविशत् कन्दराम् अद्रेर्द्रुतपानाय पूरवत् ॥ १०२६ ॥

एवं व्यावर्तयामीत इत इत्याशया मया ।
कुस्वामिसेवकेनेव नान्यत्रालम्बि दुर्धिया ॥ १०२७ ॥

1. NP बिबै°. 2. NPK °स्व°. 3. NP °मिवमा°; K °मिवसा°. 4. NPK स्छा°.
5. NK drops the visarga. 6. NPBK °ष्ट°.

पृष्ठ[1]प्रधावितं लोकं निर्गमं कन्दरस्य च ।
अपश्यद् धूमवद् व्योमन्यूर्ध्वं प्रचलति स्म सः ॥ १०२८ ॥
मेरावैरावणस्येव स्पर्धमानो निजौजसा ।
श्रयति स्मोत्तरामाशां स्वराज्ये मां निराशयन् ॥ १०२९ ॥
भानोरासन्नभावान्मे घर्मवारि निरन्तरम् ।
उत्पन्नभक्षीवाचामद् वायुरुत्पन्नमात्रकम् ॥ १०३० ॥
कुत्रचिच्छत्रयन् मेघान् कदापि पदपीठयन् ।
दन्ताव[2]लो जलोत्सेकसेकशीताङ्गकोऽव्रजत् ॥ १०३१ ॥
आस्कन्दति तदा व्योम नीचमुच्चं च वारणे ।
अदर्शं[3] नगरादीनां तारकाणां च गौरवम् ॥ १०३२ ॥
ललामकल्पानारामान् शिलाकल्पान् शिलोच्च[4]यान् ।
रेखा इव नदीरम्बुबिन्दू[5]निव सरां[6]सि च च ॥ १०३३ ॥
चित्रभित्तिगतानीव स देशस्थितवन्त्यहम् ।
सर्ववस्तूनि संपश्यन् दूरदेशात्[7] तथा रयात् ॥ १०३४ ॥
आयातमेकशृङ्गस्य गिरेरुपरि वारणम् ।
व्या[8]वर्तयितुकामः स्रा[9]क् कृपाणीं[10] पाणिनाऽऽददे ॥ १०३५ ॥
कृपाणीकिरणालोकचकितः सहसा करी ।
अदृष्टपारसरसि मुमोच स्वमशङ्कितः ॥ १०३६ ॥
तेनाघातेन परितो जलैरुच्छलितै[11]रलम् ।
तदा स्वं स्फटिकावास इव साक्षाद् व्यलोकयम् ॥ १०३७ ॥
अप्रतर्कितनिर्घातवित्रस्तानां पतत्रिणाम् ।
श्वा[12]पदानां च संरावैः शैलोऽप्यासीत्[13] किलाकुलः ॥ १०३८ ॥
अजाताङ्गोपघातोऽहं तीर्त्वा तोयं गतश्रमः ।
स्निग्धतीरतरुच्छा[14]यामायातः स्मृतवान् इति ॥ १०३९ ॥
मम पूर्वविरुद्धेन देवेन दनुजेन वा ।
व्य[15]सनाध्यासनायैवमध्यष्ठा[16]यि ध्रुवं करी ॥ १०४० ॥

---

1. NPBK °ष्ट°. 2. NPBK °बलो. 3. B °श. 4. N °स्कयान्; B °व्वयान्; K °कयान्. 5. B °म्बुद्रिद्भ°. 6. B सरासि. 7. NBK °देशान्. 8. K न्वा°. 9. NPBK श्राक्. 10. K °णी. 11. B. °छिलतै°. 12. NPBK स्वा°. 13. NK °सीक्षिला°. 14. NP °छाया°. 15. NPK व्य°. 16. NPBK °ष्ठा°.

वेगेनालक्षितक्षोणिभागेऽयत्ना विहायसा ।
गतिरेवं पशोरस्य भवति स्यान्यथा कथम् ॥ १०४१ ॥

प्राणप्रियमिदं पट्टहस्तिरत्नं हहा मम ।
देहभारेण त्रुडितं मग्नं च तलकर्दमे ॥ १०४२ ॥

पतदेवाथवा वृन्दैर्नक्रचक्रादियादसाम् ।
तत्सगोत्रैरिव द्रव्यं विभज्य समभुज्य[1]त ॥ १०४३ ॥

क तद् राज्यमतिप्राज्यं सम्पदेकनिकेतनम् ।
क्वेदं वनमतिक्रूरप्राणिपूरपरिप्लुतम् ॥ १०४४ ॥

वेणुवीणाविनोदेषु सहृदः सुहृदः क्व ते ।
इदानीं क्वाहमाजन्मदुः[2]स्थपान्थपथातिथिः ॥ १०४५ ॥

प्रत्यक्षमीक्ष[3]माणोऽपि जन एवं विडम्बना[4]म् ।
भववासाद् उद्विजते न मद्यादिव मद्यपः ॥ १०४६ ॥

एवं विभावयन् भूमौ मनुष्यपदपद्धतीः ।
बहुष्वध्वसु गच्छन्ती दर्शं दर्शं[5] समाश्वसम् ॥ १०४७ ॥

मृदुलेन निपातेन स्त्रीपदानीति निश्चयात् ।
छत्रा[6]दिचिह्नां तामेकामन्वगां पदपद्धतिम् ॥ १०४८ ॥

विधूतविबुधवधूसर्वगर्वसमुन्नतिम् ।
पुरोगतपुरोगाङ्गीं[7] कन्यामेकामलोकयम् ॥ १०४९ ॥

यन्मुखोपमयेवेन्दुर्वि[8]योगी तापमाप तम् ।
वियोगवेदनाभिज्ञास्तेन पश्यन्ति तन्मयम् ॥ १०५० ॥

यस्या मुखेन पद्मश्रीर्विजितेवोर्जितत्विषा ।
कक्षीकृतोनपक्षेव पाणिपादे सदाऽलगत् ॥ १०५१ ॥

दरिद्रत्यु[9]पमानानि प्रदत्तान्यद्भुतान्यपि ।
यदीयाङ्गावयवानां विभुत्वे नभसो यथा ॥ १०५२ ॥

सिंहीव वलितग्रीवं वीक्ष[10]माणा मुहुर्मुहुः ।
किञ्चिद् गत्वाऽशोकलतागृहे प्रविशति स्म सा ॥ १०५३ ॥

---

1. B समुभुत्यत. 2. NK °दुस्थ°. 3. PNBK °मीक्ष्य°. 4. K °ना. 5. B दर्शी. 6. B त्थात्रा°; P drops छ°. 7. NK °गागी. 8. NK °त्तियोगी. 9. NPBK °द्दु° 10. NPBK °क्ष्य°.

गत्वाऽहमपि तद्[1]द्वारं रुन्धन् स्थित्वाऽनिमेषदृक् ।
साकूत[2]मीक्ष[3]माणस्तामवदं नलिनाननाम् ॥ १०५४ ॥

कस्याङ्गजा गजगतिः पद्मनेत्रा वनेऽत्र किम् ।
सुभ्रु भ्रमसि सामान्यस्त्रीवासामान्यलक्षणा ॥ १०५५ ॥

मयेदमुदिता किञ्चिन्नैवोत्तरमदत्त सा ।
भीतेव वेपमानाङ्गी गाढमौनमुपाददे ॥ १०५६ ॥

तस्याः शङ्कामपाकर्तुं प्रकृताकारगोपनः[4] ।
अवदं भीरु मा भैषीर्मत्तः सर्वत्र निःस्पृहात् ॥ १०५७ ॥

अयोध्याधिपतेर्मेघवाहनस्याहमङ्गजः ।
लौहित्यस्थितकटकाद् इहागां हस्तिना हृतः ॥ १०५८ ॥

तदाख्याहि किमाख्योऽयं शिखरी केन वर्त्मना ।
श्रयामि शिबिरं स्वस्य[5] प्रवासेन निपीडितम् ॥ १०५९ ॥

इत्युक्तवन्तमपि मामसम्भाव्योत्तरेण सा ।
आघ्नत्यंसेन याति स्म चित्ते चाहमचिन्तयम् ॥ १०६० ॥

फलानामिव लोकानामपि पर्वतभूभुवाम् ।
मूर्तेरसदृशं किञ्चित् काठिन्यं[6] स्पष्टकष्टदम् ॥ १०६१ ॥

गिराऽपि मामनाश्वास्य चातकं वाः[7]कणैरिव ।
सा शरन्मेघमालेव गता निष्फ[8]लदर्शना ॥ १०६२ ॥

प्रत्यावृत्तः सरस्तीरमगामगतले क्वचित् ।
विश्रान्तः संस्तमिस्रा[9]यामस्मार्षं[10] हर्षवान् हृदि ॥ १०६३ ॥

चक्रसेनसुतैवेयं सरःपरिसरस्थिता ।
गन्धर्वकार्पितपटा संवादिसकलस्थितिः ॥ १०६४ ॥

न त्वस्ति चामरच्छ[11]त्रसखीमुख्यपरिच्छदः ।
स चा[12]नैकान्तिको मद्वत् क्षणेनापि व्यपैति यत् ॥ १०६५ ॥

इति निश्चित्य तां द्रष्टुं भ्रमंस्तत्र वने मुहुः ।
न प्रापं कल्पलतिकामिव निष्पु[13]ण्यकः पुमान् ॥ १०६६ ॥

---

1. NPBK तद्वारं. 2. B साकूपत°. 3. NPBK °मीक्ष्य°. 4. NPK °गोपना. 5. NPBK स्वस्प. 6. NPB °न्वं. 7. NK चाःकणै°. 8. NPBK निःफल°. 9. NPK °मिश्रा°. 10. NPK °स्मार्हं. 11. NP °छत्र° 12. NK वा°. 13. PNBK निःपुण्यकः.

अकस्मात् सङ्गतामेतां गृहीत्वाऽहं कथं करे ।
नादां[1] राज्यवियोगादिदुःखौघानां[2] जलाञ्जलिः ॥ १०६७ ॥

सज्जलज्जा न साऽदत्त मम प्रतिवचस्तदा ।
कुल्यानां स्थायिनी लज्जा यात्यां या[3]ति परि[4]च्छदः ॥ १०६८ ॥

तस्याः सलज्जताऽऽनायि धिक् काठिन्यपदे मया ।
अङ्गेनालवणतया सिता मधुरतो यथा ॥ १०६९ ॥

इति चिन्ताभरः प्राच्यं मम दुःखं व्यशेषयत् ।
सुदुःसहं दरिद्रत्वमिवेष्टविरहो[5] भवन् ॥ १०७० ॥

अरत्या च तदाक्रान्तः कान्तापेतरथाङ्गवत् ।
भ्रमन्नगाम् उदीचीनं सुदीनः सरसस्तटम् ॥ १०७१ ॥

सद्यःस्नातमनुष्यस्य ततो निर्यत्पदावलिम् ।
जलार्द्रत्वादनिर्धा[6]र्य नार्या वा पुरुषस्य वा ॥ १०७२ ॥

अनुव्रजन्नायतनं सुदर्शनमहं गतः ।
नमश्चकार नाभेयममेयश्रीनिबन्धनम् ॥ १०७३ ॥ युग्मम् ॥

तत्र चाष्टादशसमादेश्यां[7] वल्कलवाससः ।
रूपसम्पत्पराभूतभूतलामरसुभ्रुवम् ॥ १०७४ ॥

कृतपूजाप्रणामां श्रीनाभेयस्य पदाम्बुजे ।
भृङ्गीकृतदृग्युगलां बद्धपद्मासनां पुरः ॥ १०७५ ॥

मन्त्रध्यान[8]समारम्भसंरम्भपरिरम्भिणीम् ।
निश्चलाङ्गेन पाञ्चालीमिवालोकयमङ्गनाम् ॥ १०७६ ॥ विशेषकम् ॥

पूर्णमन्त्रजपोत्थाय सा मां सुचिरदृष्टवत् ।
चक्रेऽनल्पसुधाकल्पस्वागतालपनातिथिम् ॥ १०७७ ॥

तदाऽऽयातानुचर्या साऽनुयाता पुष्पहस्तया ।
पूजयामास जगतीप्रासादानां जिनाकृतीः ॥ १०७८ ॥

मामाकार्य सहानैषीन्मठे तत्र त्रिभूमिके ।
गन्धर्वः सङ्गतो यत्र मया सङ्गीतिकृत्तव ॥ १०७९ ॥

---

1. B नादा. 2. B °नाजलाज° 3. B drops या°. 4. B पर°. 5. K °विरहोऽभ°, 6. PNBK निर्द्धार्य. 7. PNBK °श्यां. 8. B °ध्याससमा°.

पृष्टस्तयाऽपहारान्तं स्ववृत्तान्तमचीकथम् ।
फलैर्भुजिष्य[1]याऽऽनीतैर्भोजितोऽस्मि द्रुभूरुहाम् ॥ १०८० ॥

अवदं यद्यपि स्थातुं यूनोर्नैकत्र युज्यते ।
तथापि तव वात्सल्यादुत्सुकः प्रष्टुमुत्सहे ॥ १०८१ ॥

का त्वयाऽलङ्कृता जातिर्नाम्ना कान्यक्षराणि ते ।
अङ्गे योग्ये दुकूलस्य वल्कं केनान्वमन्यत ॥ १०८२ ॥

वसस्यमानुषेऽरण्ये फलमूलाशना कथम् ।
धत्से विषयवैमुख्यमीदृग्रूपवयाः कथम् ॥ १०८३ ॥

अश्रुश्रेणिभिरन्तःस्थदुःखानां वर्णिकामिव ।
तन्वती यत्र संरुद्ध[2]मन्यु[3]र्मन्दमुवाच सा ॥ १०८४ ॥

कन्दमूलफलाहारकडारगलवर्त्मनः ।
भूमीशयनसंघृष्टपृष्ठ[4]स्यारण्यवासिनः ॥ १०८५ ॥

जनस्य वैभवाभोगप्रकाशनमिति ह्रिये ।
त्वदाग्रहं निग्रहीतुं त्वसहा वच्मि तच्छृ[5]णु ॥ १०८६ ॥

समस्त्यगस्त्यपूतायां दिशि द्रविडमण्डलम् ।
रमणीयतया भूमिभामिन्याः कर्णकुण्डलम् ॥ १०८७ ॥

समर्थत्वं पुमर्थानामात्मीयात्मीयगोचरम् ।
पश्यन्तो यत्र जानन्ति तज्ज्ञास्तन्मयतां जने ॥ १०८८ ॥

निःसपत्नैर्भृता रत्नैः[6] सचेतनविचेतनैः ।
काञ्ची समस्ति काञ्चीव वसुधाया महापुरी ॥ १०८९ ॥

तत्र दक्षिणभूपालमौलौ कुसुमशेखरः ।
अस्ति विश्वम्भराभर्ता नाम्ना कुसुमशेखरः ॥ १०९० ॥

विपक्षक्षोणिपतयः स्कन्धावारकुटुम्बि[7]नः ।
यस्यानक्षरमाख्यान्ति चण्डदोर्दण्डविक्रमम् ॥ १०९१ ॥

पावकस्य भुवस्तस्य धूमवल्लिरिवात्मजा ।
जाताऽहं बन्धुजातानामश्रुश्रेणिनिबन्धनम् ॥ १०९२ ॥

---

1. NPBK °ष्य°. 2. NPK °रुद्ध°. 3. B °मन्य°. 4. NPBK °पृष्ट°. 5. NP तच्छृणु
6. PNK °त्नै; B °त्नेः. 7. B °कुटुबि°.

तस्यावरोधमूर्ध[1]न्या धन्याऽऽराध्यगुणाङ्गणम् ।
देवी समस्ति गन्धर्वदत्तेति जननी मम ॥ १०९३ ॥

सदानुमेयमेवाभूद् विलासेन कपोलयोः ।
स्मितं यस्याः पुण्यमिव सम्पदा कुन्दसुन्दरम् ॥ १०९४ ॥

सुतायां मयि जातायां [2]वसुरातनिमित्तवित् ।
उवाच वचनं तातमशा[3]तप्रतिघातकम् ॥ १०९५ ॥

अस्या[4] भविष्यति वरः समरक्षमविक्रमः ।
सार्वभौमपरिन्यस्तनिजराज्यमहाभरः ॥ १०९६ ॥

अपुत्रत्वेन तातस्य वार्त्तया ख्यातया तया ।
पुत्रोत्पत्त्याविवाकार्षीद् उत्सवं पुरि पूर्जनः ॥ १०९७ ॥

दारिद्र्यमर्थिसार्थानां स्वधनैर्निधनं नयन् ।
चकार नृपतिर्नाम्ना स मां मलयसुन्दरीम् ॥ १०९८ ॥

कलाकलापमुचितं काले कलितवत्यहम् ।
रेखां योषा[5]स्वशेषा[6]सु पराऽऽपं नाट्यकर्मणि ॥ १०९९ ॥

प्रदोषे चन्द्रशालायां निद्राणाऽहं कदाचन ।
अजागरं मृदङ्गादिवादित्रध्वनिभिर्जवात् ॥ ११०० ॥

जनस्थानादिकं सर्वं समीक्ष्यानुपलक्षितम् ।
भयविस्मयवसतिरपृच्छं[7] कामपि स्त्रियम् ॥ ११०१ ॥

किमिदं स्थानकं ध्वान्तं सन्तानध्वंसनान्तकः ।
भुवनान्तर्भ्रमद्भानुर्यस्येव प्रतिहस्तकः ॥ ११०२ ॥

रूपेण प्रतिरूपेणालङ्कारैः किरणोज्ज्वलैः ।
परिस्फुरन्त्यमी लोकाः प्रत्यादेशा दिवौकसा[8]म् ॥ ११०३ ॥

साऽवोचत् पञ्चशैलोऽयं द्वीपश्रीपदमादिमम् ।
वर्धमानजिनस्यैतच्चैत्यं तन्मुकुटोपमम् ॥ ११०४ ॥

जन्मनः फलमादित्सुर्जलं दित्सुर्भवस्य च ।
अयं जिनेन्द्रयात्रायां[9] खेचरेन्द्रजनोऽभ्यगात् ॥ ११०५ ॥

---

1. NPBK °द्धन्या. 2. B drops व. 3. NPBK °सात°. 4. NPBK °स्या°.
5. NPBK योखा°. 6. NPBK °शेखा°. 7. B °च्छ. 8. B °सां. 9. PNBK न्या.

निवारितमनोदाहं तदाऽहं जिनपुंगवम् ।
अनमं नवमन्दारपारिजातंश्च[1] गर्वितम् ११०६ ॥

दर्शनेन प्रदीपेन किमु तिष्ठन् प्रकाशितः ।
हृदयेऽथादर्शसमे[2] तदानीं प्रतिबिम्बितः ॥ ११०७ ॥

यदि वा जिन एवाहमहमेवाथवा जिनः ।
इति[3] नानन्दनिर्मग्नहृदा निर्धारितं[4] मया ॥ ११०८ ॥

पृष्टस्तप[5]नवेगोऽभिदधे खेचरचक्रिणा ।
मदाद्यानीतकन्यानां नामानि जनकैः सह ॥ ११०९ ॥

आदेशात् खेचरेशस्य भूषिताश्चित्रलेखया ।
कर्तुं सङ्गीतकं कन्याः प्रावर्त्तन्त जिनाग्रतः ॥ १११० ॥

देवताधिष्ठितेवाहं नृत्यामि स्म तथा यथा ।
प्रेक्षकेषु स नो कश्चिदासीत् स्तौति स्म यो न माम् ॥ ११११ ॥

खेचरेन्द्रस्तु नृत्येन रञ्जितो विनिवेश्य माम् ।
आत्मनोऽर्धासनेऽवोचद् उद्यदानन्दकन्दलः ॥ १११२ ॥

मनोमातङ्गचारीभिः चारीभिः सुरभिकृतम् ।
मनीषिविस्मयाधारैरङ्गहारैरुरीकृतम् ॥ १११३ ॥

अमन्दानन्दसरणैः करणैः कृतविभ्रमम् ।
नाट्यवेदमवेदस्त्विवयाः प्राप कुतोऽद्भुताम् ॥ १११४ ॥

लज्जामानामजल्पन्तीं जल्पति स्म स मां पुनः ।
का त्रपा पितृकल्पस्य वत्से मम पुरस्तव ॥ १११५ ॥

न्यगदं न्यङ्मुखी तात न कुतोऽप्येकतोऽविदम् ।
नाट्यवेदं तद्विशेषान् कानप्यापं कुतोऽप्यहम् ॥ १११६ ॥

रम्या[6] ये तु विशेषेण मातुस्तानात्तवत्यहम् ।
तयाऽपि लेभिरे विद्याधरेभ्यो भुवि दुर्लभाः ॥ १११७ ॥

माता किमभिधाना ते कीदृग्वर्णा कियद्वया ।
किं सरूपाऽऽत्मजा कस्येत्युक्ता तेनाभ्यधां पुनः ॥ १११८ ॥

---

1. PB तंश्च; N °त°; K श्च. 2. B °साम; NK °थादर्शसामा. 3. B इ°. 4. B °त. 5. पवन° in the original TM. 6. °म्पा.

माता गन्धर्वदत्ता मे जाता जाम्बुनदद्युतिः ।
मदादि[1]मापत्यतया[2] वयस्तस्या विविच्यताम् ॥ १११९ ॥

न नरेषु न नारीषु तस्याः पश्यामि तुल्यताम् ।
परं देवस्य रूपेण तामभिन्नामवैम्यहम् ॥ ११२० ॥

एवं वाचा प्रमोदाब्धिः खेचरेन्दोः प्रसृत्वरः ।
तपोधनसुतेत्युक्त्याऽरोधि मर्यादयेव तु ॥ ११२१ ॥

सुतावियोगजाद् दुःखाद् भृशमाकृष्य वत्सया ।
तापसाङ्गजताख्यानात् पुनस्तस्यातिथिः कृतः ॥ ११२२ ॥

इदं वदन्तं खचराधीशाधीसख ऊचीवान् ।
मा खेदिष्ठा विभो वेत्ति सम्यग् वत्सा न शैशवा[3]त् ॥ ११२३ ॥

सुतासङ्क्रामितैर्नाट्यप्रयोगैराह्वया तथा ।
सदृशेन च रूपेण त्वत्सुतां निश्चिनोमि ताम् ॥ ११२४ ॥

प्रयोगान् रुचिरान् कांश्चित् खेचरेभ्योऽम्बिकाऽऽप मे ।
इति वेत्सि कथमिति प्रोक्ता तेनाभ्यधा[4] पुनः ॥ ११२५ ॥

महायशा इति ज्ञानी मुनिः काञ्च्यां कदाप्यगात् ।
नमस्कर्तुं च तं पौराः समीयुः सपरिच्छदाः ॥ ११२६ ॥

अनुज्ञाप्य नृपं माता गता नन्तुं मया सह ।
मुनिं प्रपच्छ संप्राप्तप्रस्तावा स्तोकवाग् अदः ॥ ११२७ ॥

विभो विद्याधरकुले सञ्जाताऽपि महीयसि ।
शिशुरेवास्मि स्वजनैर्वियुक्ता [5]डमरे पुरः ॥ ११२८ ॥

निरागसोऽपि सारा मे पितृभ्यां कारिताऽपि न ।
ततस्तत्सङ्गमसुखान्य[6]वाप्स्यामि कदाप्यहम् ॥ ११२९ ॥

वाचमाचष्ट स मुनिः खेदं मा धा विवेकिनि ।
अर्था इव मिलिष्यन्ति तवेष्टाः सुकृतोदयात् ॥ ११३० ॥

कदेति पृष्टो[7] मात्राऽसौ यन्मां वीक्ष्याब्रवीन्मुनिः ।
तन्नाबोधि तदोद्भूतचित्तव्यग्रतया मया ॥ ११३१ ॥

---

1. B °दाहि°. 2. B drops °या. 3. B °नात्. 4. B °धा. 5. NK °र्वियुक्तडेमरे.
6. B °न्प°. 7. B °ष्टौ, P °ष्ठो.

[1]उद्धृतास्मि [2]महादुःखादनुद्वाहीव पङ्कतः ।
इदं वदन्ती सदनं ययौ माता मया सह ॥ ११३२ ॥

कदा तत्त्वविदाऽऽख्या[3]यि त्वन्मातुर्बन्धुसङ्गमः ।
मुहुर्मुहुरि[4]दं पृच्छत्यपि खेचरचक्रिणि ॥ ११३३ ॥

मयि किञ्चिदनाख्यान्त्यामाख्यन्मन्त्री धियांनिधिः ।
विवाहेऽहनि वत्सायाः बन्धुमेलं जगौ मुनिः ॥ ११३४ ॥

एवं सम्भाव्यत इति मयाऽपि गदितेऽगदत् ।
खेचरेशश्चित्रलेखा व्यक्तमेतत् करिष्यति ॥ ११३५ ॥

अहं मलयसुन्दर्याः कर्तास्म्युद्वाहमङ्गलम् ।
इति मन्त्रयमाणेऽस्मिन् प्रातः शङ्खरवोऽभवत् ॥ ११३६ ॥

आलोकयितुमायातान् यात्रां विद्याधराधिपान् ।
व्यसृजन् मधुरालापः खेचरक्ष्मापपुङ्गवः ॥ ११३७ ॥

पुत्र्या मलयसुन्दर्या मदालोकनजं फलम् ।
विधेयमेतामन्याश्च कन्याः स्थाने विमोचयेः ॥ ११३८ ॥

एवमा[5]दिश्य तपनवेगं तपनतुल्यरुक् ।
विमानस्थस्त्रिकूटाद्रिं प्रत्यगात् खेचरेश्वरः ॥ ११३९ ॥

तेन न्य[6]स्तान्यकन्यानां स्वामित्वे छत्रचामरैः ।
राजमाना प्रदेशानां दर्शनायोपचक्रमे ॥ ११४० ॥

अपश्यं[7] गर्भसदनं सदनन्तमणीमयम् ।
भानुबिम्बादिवोत्कीर्णं बिम्बं तत्र जिनेशितुः ॥ ११४१ ॥

जिनेन्द्रवदनं दृष्टिराकृष्टाऽपि मुहुर्मम ।
व्रजति स्म मनोवृत्तिरिवाभिमतमानुषम् ॥ ११४२ ॥

पितुर्गृहादिवान्यत्र सुदृष्टिर्मे जिनाननात् ।
पदार्थेन प्रियेणापि कृष्यमाणाऽऽप साश्रु तम् ॥ ११४३ ॥

तस्य[8] स्वेन कृतस्येवायतनस्यातिहार्दतः ।
क्रोधं कर्तर्यनिष्टानामिष्टानां तु मुदं व्यधात् ॥ ११४४ ॥

---

1. B ठद्ध°. 2. B drops म°. 3. B °ख्यः°. 4. B °रदं. 5. B °मो°. 6. NPK °न्य
7. NPBK °श्यं 8. NPBK °स्य.

[1]अचेतनेव तिष्ठन्ती तत्र चैत्ये पदे पदे ।
बलादाकृष्य निन्येऽनुचरीभिः[2] स्थानकान्तरे ॥ ११४५ ॥

चिरादवाप्तमासन्नसम्बन्धमिव बान्धवम् ।
तत्रालिलिङ्ग मद्दृष्टिः पारिजातं तरुं तरुम् ॥ ११४६ ॥

वप्रघातोल्लसद्ध्वानैराह्वयन्तमिवोर्मिभिः ।
पयोधिं द्रष्टुमचलं राजकन्यापरिच्छ[3]दा ॥ ११४७ ॥

सोपानवर्त्मना वप्रदक्षिणाभित्तिमूर्धनि ।
आरोहं नूपुरध्वानमुखरीकृतदिङ्मुखा ॥ ११४८ ॥

लीलयैव पराभूतमनोभवमुपागतम् ।
भवं किलाभिभवितुं प्रशान्तायतनाश्रयात् ॥ ११४९ ॥

अलङ्कारप्रभोद्भूतसुरास्त्रा[4]लङ्कृताम्बरम् ।
प्रेक्षितुं पक्षिणः क्षोणिभृतः शक्रमिवागतम् ॥ ११५० ॥

वीजितं चामरैश्चारुधृतच्छ[5]त्रं तरीस्थितम् ।
अष्टादशाब्दं भूपालकुमारं दृष्टवत्यहम् ॥ ११५१ ॥

हृदि संदृ[6]ष्टमात्रोऽपि प्राविशत् सहसैव मे ।
समभ्य[7]स्तपरपुरप्रवेशन इवाशु सः ॥ ११५२ ॥

सोऽपि नूपुरझात्कारानुसारप्रेरितेक्षणः ।
समीक्षते स्म मां कन्यावृन्दारकश्रियम्[8] ॥ ११५३ ॥

मदाननसुधालोकविलोककृतजागरम् ।
न रागसागरं रोद्धुमलमीशाम्बभूव सः ॥ ११५४ ॥

मम तस्य च कन्दर्पविकाराणां बुधोऽप्यभूत् ।
पौर्वापर्यं विभुर्बोद्धुं न बीजाङ्कुरयोरिव ॥ ११५५ ॥

विकारान् मान्मथान् रोद्धुं ह्रियस्तेषां च तां मुहुः ।
बभूव संरम्भितया मिथो चलविलोचनम् ॥ ११५६ ॥

[9]भालदृष्टिकपोलौष्ठ[10]वक्षोज[11]जघनेषु मे ।
आवासनाय मनसस्तदृग् भूमिमिवेक्षत ॥ ११५७ ॥

---

1. NK आचत°; B आचति°. 2. B °चरीभिः. 3. NP °रिछदा. 4. = इन्द्रधनुः I.
5. NPK °छ°. 6. B °दृष्ट°. 7. B स्पमभ्य°. 8. PN व्यं:. 9. N लोल°. 10. NPBK °लौष्ट°.
11. B drops °ज°.

पुरः सहचरीश्रेणेरनुरागं निगूहितुम् ।
मिथ्या[1] यामी[2]ति जल्पन्तीं मां तस्यानुचरोऽवदत् ॥ ११५८ ॥

अयं श्रीसिंहलेन्द्रस्य चन्द्रकेतोः सुतोत्तमः ।
असमीपमहाद्वीपपतीन् जीत्वाऽऽययाविह ॥ ११५९ ॥

दैवादासादिते चैत्ये त्वच्चित्त इव निर्मले ।
अस्य प्रवेशने द्वारं वक्तुमादिश कञ्चन ॥ ११६० ॥

[3]नृवरानुचरस्यास्य मत्स्वरूपं निवेदय ।
वसन्तसेना गणिका मयेदमुदिताऽवदत् ॥ ११६१ ॥

स्पृहयालुरयं लोको भद्रभद्राय ते प्रभोः[4] ।
परं परेण पुण्येन विकलः किं करोत्विह ॥ ११६२ ॥

[5]काञ्चीपुरन्दरस्यासौ सुता मलयसुन्दरी ।
गुणप्रगुणताप्राप्तच्छत्र[6]चामरवैभवा ॥ ११६३ ॥

इयं कन्या[7]जनश्चायं ख्यातः क्षितिपवंशभूः ।
अद्यैवानायि केनापि यात्रार्थं सुकृतार्थिना ॥ ११६४ ॥

विश्वविश्वातिशायीदं चैत्यं त्वन्नाथरूपवत् ।
अदृष्टपूर्वं संदृष्टमनया भाग्यभङ्गिभिः ॥ ११६५ ॥

एतदीयान् अवै[8]त्येषा विशेषान् सुमुखी कथम् ।
कथं वा भवदीशस्य प्रवेशाय प्रदेशिका ॥ ११६६ ॥

स्थापयिष्ये किमत्रैव नायिष्ये वाऽपरत्र किम् ।
स्वौको वाऽऽसादयिष्ये किमिति चिन्ता दुनोत्यमूम् ॥ ११६७ ॥

मौनिन्यामित्युदित्वाऽस्यां पिक्यामिव घनागमे ।
नीलकण्ठ इवाकुण्ठगिराऽवष्ट स नाविकः ॥ ११६८ ॥

कुमार देवतागार[9]दर्शनेन धृतिं कुरु ।
एतद्रूपानुमेयस्य तस्थौ देवस्य दर्शनम् ॥ ११६९ ॥

मनुष्याणामसम्भाव्यदर्शना दिव्यभूमयः ।
दृष्टाः कल्पलताश्लिष्टपारिजाततरूत्तराः ॥ ११७० ॥

---

1. NPBK °थ्या. 2. NK °माति. 3. NPK नृ°. 4. NPK प्रभो. 5. NK कंचीं°. 6. NP °छत्र°. 7. NPBK °न्या. 8. NK °चैत्ये°. 9. B कुमारादावगता°; NK °गौर°.

कार्यसिद्धौ निराशानामवस्थानेन नोऽत्र किम् ।
भोक्तुं प्रतिनिषिद्धानां भुञ्जानानामिवान्तिके ॥ ११७१ ॥

त्वददर्शनदुःखार्त्ता नृपसामन्तमन्त्रिणः ।
यावद् धावन्ति नाशासु सैन्यं तावदलङ्कुरु[1] ॥ ११७२ ॥

स कुमारस्तु मय्येव निवेशितविलोचनः ।
मदालोकनविच्छेदकातरस्त[2]मवोचत ।। ११७३ ॥

सखे तारक तारेण देहं दाहज्वरेण मे ।
विधुरीभूतमाहूतजृम्भारम्भ[3]शिरोर्त्तिना ॥ ११७४ ॥

पारिजाततरुव्रातसारे परिसरेऽत्र मे ।
क्षणमस्ति मनः स्थातुं प्रमाणं तु भवानिह ॥ ११७५ ॥

उवाच तारकः स्तब्धतारकः कष्टचिन्तया ।
न स्थातुं क्षणमप्यत्र युज्यते ज्वरकारिणि ॥ ११७६ ॥

इह ज्वरस्य विज्ञातनिदानस्यापि न क्षमः ।
प्रतिकर्तुं भविष्यामि स्थानान्तरगतः पुनः ॥ ११७७ ॥

एवं गदित्वा व्यावर्त्य स नावं नाविकोऽचलत् ।
विलक्षे[4] प्रेक्षमाणे मां कुमारे मौनिनि ह्रिया ॥ ११७८ ॥

सर्वस्वेन सहात्मानं दित्सुस्तस्य तदाऽवदम् ।
वसन्तसेनामेनं त्वं व्यावर्त्तयितुमीशिषे ॥ ११७९ ॥

सा स्माहाप्रतिपाल्यैवायत[5]नद्वारवेदिनम् ।
जनं जिनमनत्वा च कथं नाविक गच्छसि ॥ ११८० ॥

प्रत्यापत्याऽऽत्मनः पत्युस्तनुं नेतुं प्रशस्तताम् ।
दुर्वारव्यसनाम्भोधौ नावं देवीं प्रसादय ॥ ११८१ ॥

कुलदेव्या इवैतस्याः कार्यमेव मया वचः ।
इति जल्पन् परावृत्य नावं मां च जगाद सः ॥ ११८२ ॥

गतिर्नान्या[6] समस्त्यस्य विमुच्य भवतीमिति ।
सुश्रोणि क्षोणिरमणकुमारे करुणां कुरु ॥ ११८३ ॥

---

1. B °कुठ. 2. B °स्नम°. 3. B °त्तंभारंभि°. 4. NPBK °लक्ष्ये. 5. NPBK °वर्तन°.
6. P °न्या.

त्वदधीनधनतनुर्जीवितव्यपरिच्छे[1]दः ।
विश्वातिशायिनाऽनेन [2]चक्रे मकरकेतुना ॥ ११८४ ॥

अगण्यपुण्यलावण्यकमलाविमलात्मनः ।
वक्ष[3]स्थलङ्कृतानेन वक्ष्यस्यनुपमां श्रियम् ॥ ११८५ ॥

यूनाऽनेन वियुञ्जाना महीयसि महीभृति ।
जीर्यद्दन्ते गता क्वापि लप्स्यसे वचनीयताम् ॥ ११८६ ॥

प्रौढकाष्ठा[4]धिरूढानां गुणानां प्रगुणाश्रये[5] ।
अस्मिन्नवनते देवि प्रसीद प्रियदर्शने ॥ ११८७ ॥

विमुञ्च चापलं देवि परमोत्कलिकाकृतम् ।
आधेहि स्थिरतामात्ममहत्त्वमहितामिह ॥ ११८८ ॥

इत्युदित्वा स मां नावमुद्दीश्य प्राणमत् स्वयम् ।
नमयामास तं राजकुमारं च सविस्मयम् ॥ ११८९ ॥

अचिन्तयं सुकृ[6]त्येव कुमारो यत्परिच्छे[7]दः ।
भर्तुर्वेत्तीङ्गिताकारं कृत्यं च कुरुते स्वयम् ॥ ११९० ॥

गाढानुरागमीशं स्वं मां प्रति प्रेक्ष्य धीवरः ।
प्रवेशोपायं मच्चित्तेऽपृच्छ[8]च्चैत्यमिषादसौ ॥ ११९१ ॥

आसाम्मत्येन नाथस्य व्यावर्त्य सहसा तरीम् ।
गमनं वारयन्तीं मां निश्चिकायैतदर्थिनम् ॥ ११९२ ॥

मुग्धोऽस्त[9]वीत् तरीमेवं विप्रतारितकन्यकः ।
स धीवरोऽकरोद्[10] गुप्तं मां प्रत्येवानुकूलनम् ॥ ११९३ ॥

चिन्तयन्त्या ममात्मानं नेतुमेतदधीनताम् ।
विदधन् मदधीनं स्वं कुमारो माऽधमर्णयत् ॥ ११९४ ॥

महात्मने तदेतस्मै दत्त्वाऽऽत्मानं मुदाऽधुना ।
क्रियावाचाभ्योऽभ्यधिकेत्युत्तमर्णा भवाम्यहम् ॥ ११९५ ॥

गुरूणामनियोगेन कुर्वत्या मेऽथवेदृश[11]म् ।
अकुलीनेत्ययमपि ध्यायन् भावी[12]श्लथादरः ॥ ११९६ ॥

---

1. NP °छदः. 2. B °नेचनक्रे. 3. NPBK वक्ष्यस्य°. 4. NP °काष्ठा°. 5. B प्रगुणाश्रतां प्रगुणाश्रमेये. 6. B सुक्ष°. 7. NP °छदः. 8. NP °छ°. 9. B drops °स्त°. 10. B drops °करो°. 11. B °दृषं. 12. NK °भावा·

कन्यकानुचिताचार[1]चारिणीमवलोक्य माम् ।
सकलोऽपि परीहासपरो भावी परो जनः ॥ ११९७ ॥

एवमेतदुरीकारानुरीकारगुणागुणान् ।
परामृशन्तीं सन्देहदोला[2]न्दोलितमानसम् ॥ ११९८ ॥

देवलेनान्वि[3]तः पुष्पकरण्डोद्दण्डपाणिना ।
आगत्य तपनवेगो जगौ राजपुमानिदम् ॥ ११९९ ॥

गृहाण देवपूजावशिष्टमिष्टफलप्रदम् ।
हरिचन्दनहारीदं माल्यं मलयसुन्दरि ॥ १२०० ॥

आदत्स्व नायकं नृत्यक्षणच्युतममुं [4]मुहुः ।
ख्यातं देवलमवदं तारकन्यस्ततारका ॥ १२०१ ॥

नायकोऽयं मया वव्रे[5] किं मुहुर्जल्पितैरिह ।
परं पाणौ करिष्यामि काञ्च्यां प्राप्ताऽधुनाऽस्तु तत् ॥ १२०२ ॥

करण्डात् पाणिनाऽऽदाय पुष्पमालामिलाभुजः ।
सूनोः कण्ठे न्यधां[6] नीरनिधिपूजापदेशतः ॥ १२०३ ॥

अहं सहान्यकन्याभिरादाय हरिचन्दनम् ।
पूजामिवाक्षरश्रेणिरलके तिलकं व्यधाम् ॥ १२०४ ॥

स कण्ठे लग्नया साक्षान्मयेव वरमालया ।
कुमारोऽहंपूर्विकया रोमाञ्चैः पर्यपूर्यत ॥ १२०५ ॥

नास्या[7] दास्यामि कस्यापि मालाया लवमप्यहम् ।
अन्यां तारक याचेति स नर्मानुचरं जगौ ॥ १२०६ ॥

स मे सम्मुखमालोक्य स्माह निर्मदसम्मदः ।
हृता कुमार सा कैश्चिद् भवत्प्राणप्रिया प्रिया ॥ १२०७ ॥

सङ्गमय्य त्वयाऽत्रैनां यास्यामीति मतिर्मम ।
व्यफलत् स्वप्नसंदृष्टवस्तूनीव निवेशिता ॥ १२०८ ॥

किमेषोऽब्रूत निर्मादोऽपश्यन् मां सत्यमेव वा ।
इति चक्षुः कुमारास्याद् व्यावृत्य स्वान्ति[8]केऽक्षिपम् ॥ १२०९ ॥

---

1. B drops °चार°. 2. drops °दोलां°. 3. NPK °त्वि°. 4. B drops मु°. 5. NPK वव्रे. 6. NPBK °धा. 7. NPBK °स्या. 8. B स्वाति°.

वप्राग्रं राजक[1]न्याभिरिन्दुनेव नभस्तलम् ।
शून्यं कैरविणीवाहं वीक्ष्य मोहं परं गता ॥ १२१० ॥

मूर्च्छान्ते[2] द्राक् कुमारेण वियोक्ष्यामीति चिन्तया ।
स्वापहारस्य वात्या[3]ऽऽपं तापं मृत्युमिवापरम् ॥ १२११ ॥

स कुमारोऽपि वप्राग्रं प्रेक्ष्य प्रोवाच तारकम् ।
मा खिद्यस्व सखे दोषस्तावकोऽस्ति न कश्चन ॥ १२१२ ॥

कलाद इव माणिक्यकाञ्चने कन्यकामणिम् ।
मयि योजयितुं कः स्यादपरस्त्वमिवेश्वरः ॥ १२१३ ॥

त्वयाऽकारि ममायत्ता कन्या[4] मलयसुन्दरी ।
विभोर्दर्शयता भक्तिमह्ना भानोरिवाब्जिनी ॥ १२१४ ॥

भवान् नौसैन्यमादाय दृढवर्मा च सैन्यपः ।
यातां ताता[5]न्तिके यात्राजितमर्पयतां धनम् ॥ १२१५ ॥

तातं विज्ञप्य निर्व्यूढवि[6]क्रमाणां रणाङ्गणे ।
देश[7]ग्रासादि योधा[8]नां दापयेथां यथोचितम् ॥ १२१६ ॥

अहं तु तत्करन्यस्तमालालानितकन्धरः ।
नैव व्यावर्तितुं शक्नोम्येनामेणदृशं विना ॥ १२१७ ॥

किं वा मयाऽऽगतेनापि निष्फ[9]लाक्षेण यस्य मे ।
अकृतस्य पुरः कैश्चिदपजह्रे मनःप्रिया ॥ १२१८ ॥

इत्युक्त्वा मा कुमारेति नाविकेषु गदत्स्वपि ।
उत्पत्य[10] पाथसांपत्यौ[11] पपाताचिन्तिता[12]यतिः ॥ १२१९ ॥

नाविका युगपत्पे[13]तुस्तदाऽऽक्रष्टुं तमीच्छवः ।
अन्वर्कमिव[14] भूवयोऽनुगोपमिव धेनवः ॥ १२२० ॥

गतिर्ममैष एवेति ध्यायन्तीव प्रमूर्धनः ।
निमील्य नयने झम्पामदामम्भोनिधावहम् ॥ १२२१ ॥

---

1. B drops °क°. 2. B °च्छाते. 3. NPBK वात्पापं. 4. B drops the text from कन्या etc., of vs. 1214 upto °तान्ति° of vs. 1215. 5. NPK तावा°. 6. B °च्चि°. 7. B दश°. 8. B °ध्यांनां. 9. NPBK निःफला°. 10. NK °न्य. 11. NK °न्यौ. 12. NK °नार्व. 13. PB °त्येतु. 14. P त्वर्क ; B °त्वर्षर्कमवि°.

समुन्मीलितचक्षुश्च क्षणान्नैक्षे तमर्णवम् ।
न पश्चशैलचूलाग्र[1]मणिमायतनं तथा ॥ १२२२ ॥

नावं सनाविकां नापि स्वमद्राक्षं तु केवलम् ।
स्वसौधचन्द्रशालायां तत्रैवापहृता यतः ॥ १२२३ ॥

किमदशममुं स्वप्न साक्षादनुभवं किमु ।
सुखानामसुखानां चाद्वैतं प्रक्रममीदृशम् ॥ १२२४ ॥

निश्चेतुमिति[2] संस्पृष्टललाटायाः करस्थितम् ।
हरिचन्दनदम्भेन सुखं दुखं च मेऽभवत् ॥ १२२५ ॥

अभूत् सुखमपि प्राच्यं दुःखं मेऽपश्चिमासुखात् ।
कर्पूरमिव दुर्गन्धिवपुषः सम्प्रयोगतः ॥ १२२६ ॥

विस्मयानन्दनिर्वेदान् स्थित्युत्पत्तिव्ययानिव ।
क्रमेणानुभवन्त्यागां मुक्तशय्याऽऽसनं शनैः ॥ १२२७ ॥

सध्रीचीप्रतिबन्धाब्धि[3]कुञ्जरी बन्धुसुन्दरी ।
आगात्[4] तदा मदङ्गानि प्रेक्ष्य साक्षेपमब्रवीत् ॥ १२२८ ॥

विश्वसारैरलङ्कारैर्दुकूलमृदुताकुलैः ।
सुमैर्देवद्रुमैरङ्गरागैरामद्रुदोहदैः ॥ १२२९ ॥

नवैवाङ्गे तव श्रीर्मे सकषायैः सुलोचनैः ।
कुरुषे रात्रिजागर्याभिशङ्कां भर्तृदारिके ॥ १२३० ॥

निमेषात् परतोऽद्राक्षं भवतीं[5] नागताप्यहम् ।
मां दुनोति तदेत[6]त्ते चरितं वयसीदृशे ॥ १२३१ ॥

तद् व्यलीकमलच्छेदजलकल्पमकल्पयम् ।
सर्वं शार्वरवृत्तान्तमथ क्लान्तमना ह्रिया ॥ १२३२ ॥

गतायां विस्मितास्या[7]यां तस्यां व्यमृ[8]शमीदृशम् ।
अन्तर्धानाय तिलकोऽभूत्नूनं हारिचन्दनः ॥ १२३३ ॥

न मां प्रथममैक्षिष्ट तेनार्या बन्धुसुन्दरी ।
ददर्शैकनिमेषात्तु प्रविलुप्तविशेषकम् ॥ १२३४ ॥

1. N °लाग्न°. 2. B. °मित. 3. B °धरब्धि°. 4. NPBK अगात्. 5. NK °ती. 6. K °देदत्ते. 7. PNK °तास्फयां. 8. B व्यसृश°.

खेच[1]रेण तदा देवशेषा चन्दनव[2]न्दनम् ।
कारिताः कन्यका जानेऽन्योन्यस्या[3]दृश्यता कृते ॥ १२३५ ॥

नाहं कन्या यथाऽपश्यं सहसा मां सतीं तथा ।
वेद्म्यपश्यन् कुमारोऽब्धौ पपात विरहासहः ॥ १२३६ ॥

ममादर्शनमात्रेण स प्राणान् सुकृती जहौ ।
मृत्यौ साक्षात्कृतेऽप्यस्य नाहमद्यापि पापिनी ॥ १२३७ ॥

मया नायमपि प्राप्यः शृङ्गारः प्रौढपाप[4]या ।
कुमारेणापि विज्ञातं जातं यन्मरणं मम ॥ १२३८ ॥

एवं मां[5] मृत्युमनसं बुद्ध्वा सा बन्धुसुन्दरी ।
बोधयामास वचनैः कृतयुक्तिविवेचनैः ॥ १२३९ ॥

पतिताऽपि यथाऽम्भोधौ त्वं केनापि सुकर्मणा ।
आकृष्टाऽसि निजं स्थानमानीताऽसि च हेलया ॥ १२४० ॥

स किं स्वकिङ्करीभूतप्रभूतद्वीपभूभुजः ।
कुमारस्यास्य वेलायां न भविष्यति सोद्यमः ॥ १२४१ ॥

तद्बोधवचसा शश्व[6]द् दत्तहस्तावलम्बना ।
वासरान् सागरानिव कतिचिद् व्यत्यवाहयम् ॥ १२४२ ॥

दण्डेशः कोशले[7]शस्यान्येद्युर्वज्रायुधाभिधः ।
दक्षिणां वशयन्नाशां जनकं मेऽभ्यषेणयत् ॥ १२४३ ॥

प्रत्याशं तस्य सैन्यानि देशस्यान्तर्दधाविरे ।
पन्नगस्य विषाणीव दष्टाङ्गावयवान् प्रति ॥ १२४४ ॥

मत्तातस्तस्थिवान्[8] सर्वं सम्मी[9]लितपरिच्छदः[10] ।
काञ्चीदुर्गमधिष्ठाय जीवो नाभिसरोजवत् ॥ १२४५ ॥

तदा दुर्गाग्रभागस्था भूमिष्ठाश्च सहस्रशः ।
युध्यन्ते स्म भटा बाणपाषाणक्षेपिणोऽन्वहम ॥ १२४६ ॥

पश्य[11]न्त्यप्यहमावेशादशेषं तन्मयं जगत् ।
नैवाश्व[12]सं विनैकं तं तृषार्त्तेव कृते जलात् ॥ १२४७ ॥

---

1. B स्वेच° 2. NK. °चन्द°. 3. NPBK °स्पा°. 4. NPK °याययाा. 5. B. म[illegible]
6. NPK शश्वद्. 7. B °लेश°. 8. = My father stood up to everything. 9. N संमा[illegible]
10. NPK °छदः. 11. P °श्यं°. 12. NPBK °स्वसं.

तत्प्राप्त्युपक्रमो दूरेऽभूत् तापस्य चिकित्सया ।
दुर्बलाधमर्णस्येव क्षणोच्छेदः कलान्तरैः ॥ १२४८ ॥

निद्रायामल्पकालं तद्दर्शनप्रत्ययादहम् ।
तद्दीर्घदर्शनश्रद्धा दीर्घनिद्रास्पृहाऽभवम् ॥ १२४९ ॥

तापं विरहजं बन्धुसुन्दरी गुप्तमेव मे ।
प्रत्यकार्षीत् घातमिव सञ्जातं चौर्यचर्यया ॥ १२५० ॥

अन्य[1]दाऽनुचरी कात्यायनिकाऽब्रूत मामिति ।
एवं गन्धर्वदत्ता त्वां भाष[2]ते भर्तृदारिके ॥ १२५१ ॥

अथानङ्गत्रयोदश्यामुत्सवे कारिते मया ।
वत्सेऽनङ्गस्यायतनेऽर्चायै गच्छेरलङ्कृता ॥ १२५२ ॥

दत्ता वज्रायुधस्यासि पित्रा सन्धिविधित्सया ।
अद्य त्वां द्रष्टुमेष्यन्ति तदीयपुरुषा इति ॥ १२५३ ॥

जातेऽत्र वचने कर्णातिथौ तप्तत्रपूपमे ।
दुर्निरोधतरक्रोधरुद्ध[3]चित्ता व्यचिन्तयम्[4] ॥ १२५४ ॥

किं मारयाम्यमूमात्ममनोरथवि[5]नाशिनीम् ।
किमस्या मारणेनात्र पापमात्रविधायिना ॥ १२५५ ॥

दुरात्मानमिहात्मानमेव हन्मि कुकर्मणाम् ।
प्रतिकूलार्थमूलानां कर्तृत्वेनापराधिनम् ॥ १२५६ ॥

इत्यादिचिन्ताविधुरां सा दृष्ट्वा मामनुत्तराम् ।
प्रत्यावृत्य ययौ नीलनीरजोपमितास्यरुक् ॥ १२५७ ॥

बन्धुसुन्दर्यविज्ञाततत्त्वा[6]ऽऽगत्य जगाद माम् ।
सन्तापमात्रफलया किं त्वं क्लिश्नासि चिन्तया ॥ १२५८ ॥

स्वार्थप्रार्थनयाऽपि त्वं स्मरमर्हितुमर्हसि ।
देव्यादेशं पुरस्कृत्य कुरु शीघ्रं तदर्हणम् ॥ १२५९ ॥

अस्मिन्नाकस्मिकोत्पात उपेतेऽप्यधुनाऽन्तिकम् ।
नैव व्यभिचरिष्यन्ति निर्वाहे सुकृतानि ते ॥ १२६० ॥

---

1. P °न्यदा°. 2. B भाषिते. 3. NP °रुद्ध°. 4. NPBK °यत्. 5. NPBK °क्ना°.
6. NPBK °तत्त्वा°.

तयैवं बोधिता राजभवनोपवनोदरे ।
गताऽहं कृतशृङ्गाराऽऽगारं शृङ्गारजन्मनः ॥ १२६१ ॥

मलयानिलकल्लोललोलशोणध्वजच्छ[1]लात् ।
अतर्जयज्जनं नूनं यदनादेशकारिणम् ॥ १२६२ ॥

यद् विद्रुमारुणं रेजे रागवन्ति जगन्त्यपि ।
चिकीर्षोरिव पुष्पेषो मिलितो दलिकोत्करः ॥ १२६३ ॥

अन्येषां द्युसदां वोढुमेकोऽप्याज्ञां प्रगल्भते ।
गरीयसी स्मराज्ञा ते युगलैरेव योह्यते ॥ १२६४ ॥

शक्रचक्रिभिराराद्धं शासनं ते विराध्यताम् ।
काम पाषण्डिनां जातं फलं भिक्षाविडम्बना ॥ १२६५ ॥

मनांसि यमिनां वज्रकठोराणि सुमेषुभिः ।
अनङ्ग भिन्दन्नन्येषां रेखां[2] भिनत्से भुजाभृताम् ॥ १२६६ ॥

सारं स्मर भवद्रूपमिति ते कियती स्तुतिः ।
सारं पश्यन्ति संसारमपि सर्वं त्वयाऽङ्गिनः ॥ १२६७ ॥

स्थानस्थानागतैरेवं युग्मैः शृङ्गारहारिभिः ।
स्तूयमानं पूज्यमानं सेव्यमानं च सर्वतः ॥ १२६८ ॥

सखीजनसमानीतपूजोपकरणैः स्मरम् ।
स्मरन्ती राजपुत्रं तं प्रापयेति समार्चयम् ॥ १२६९ ॥

तत्राङ्गराग[3]ताम्बूलवसनाभरणादिना ।
सत्कृत्यात्मपरीवारं गत्वा तातं ततोऽनमम् ॥ १२७० ॥

मातुरातुरचित्ताहमानम्य चरणद्वयम् ।
इन्दुलेखेव विच्छा[4]या दिनशेषमलङ्घयम् ॥ १२७१ ॥

व्यसर्जयं निजं धाम गत्वा सन्ध्याक्षणे सखीः ।
सहागाच्चित्रशालायां मय्येका बन्धुसुन्दरी ॥ १२७२ ॥

श्रान्ताऽस्म्यद्य परिभ्रान्त्या निद्रास्यामि त्वमप्यतः ।
व्रजेति प्रेषयं श[5]य्यामागतां[6] बन्धुसुन्दरीम्[7] ॥ १२७३ ॥

1 NP °छलात्. 2. NPBK रेषां. 3. B drops °राग°. 4. NP विछाया. 5. K सय्यां. 6. NPK °मागता. 7. NPK °सुन्दरी.

अकालप्रेषणात् सा तु हृदि सङ्कल्प्य कारणम् ।
गत्वा मदन्तिकाद् गुप्ता चित्रशालाबहिःस्थिता ॥ १२७४ ॥

तस्यां तु गतमात्रायामुत्थाय[1] शयनादहम् ।
पटेनाच्छा[2]दयं रत्नप्रभोद्भासितमङ्गकम्[3] ॥ १२७५ ॥

यत्ना[4]न्नूपुरमौखर्यं रुन्धाना यामिकाक्षणी[5] ।
मुञ्चन्ती निरगां पक्षद्वारा राजकुलादहम् ॥ १२७६ ॥

जनं दूरेण मुञ्चन्ती रुन्धन्ती श्वास[6]मुद्गतम् ।
कुसुमाकरमुद्यानं संलग्नेनाध्वनाऽविशम् ॥ १२७७ ॥

अन्तस्तापा तुरङ्गीव त्यजन्तीन्दु[7]करानपि ।
स्थिता छायासु वस्तूनां गता मीनध्वजालयम् ॥ १२७८ ॥

रत्या प्रीत्या च संसेव्यमानाय कुसुमेषवे ।
स्थित्वा केनाप्यविज्ञाता व्यमुचं कुसुमाञ्जलिम् ॥ १२७९ ॥

तेनैव वर्त्मना तस्मान्निर्गत्यायतनादहम् ।
रक्ताशोकं समारोहमुच्चैः स्थण्डिलमण्डलम् ॥ १२८० ॥

द्विधाऽप्यहं कुमारं तं प्रति स्वान्त[8]मिवात्मनः ।
विधाय निबिडत्वेन परिधानोत्तरीयके ॥ १२८१ ॥

रत्नप्रभापिधानार्थपटेन गलशाखयोः ।
पाशं सपदि विन्यासं परलोकाध्वसार्थकम् ॥ १२८२ ॥

अगदं जगदम्भोजस्तरः संसारपारगः ।
वीतरागो जयत्येकः क्लेशैर्यो न कटाक्षितः ॥ १२८३ ॥

मादृशां चञ्चलदृशां रागसागरयादसाम् ।
दशान्तराण्यनेकानि सम्भविष्यन्ति कानि न ॥ १२८४ ॥

वरमालां कुमारस्य तस्य न्यस्यापरं वरम् ।
मनोवचनकायैश्चेदकार्षं न कदाचन ॥ १२८५ ॥

चारित्रेण तदा तेन भूयादन्यभवेऽपि मे ।
स कुमारो वरत्वेन देवत्वेनेव तीर्थकृत् ॥ १२८६ ॥

---

1. B °मुपत्थाय. 2. NP छादयं. 3. B °मंगलकं. 4. NK यत्रा°. 5. NK °क्षणीं.
6. NPBK स्वास°. 7. NBK °जंतीदु°. 8. B °स्वात°.

अमुचं स्वमथोत्प्लुत्य यथा शाखाऽपि सा यथा ।
चकम्पे शङ्कमानेव सहसा भङ्गमात्मनः ॥ १२८७ ॥

सहसोड्डीय वृक्षं तमनुभ्रान्ताः पतत्रिणः ।
साहसं किमिहाकारीत्याचुक्रुशुरिवारवैः ॥ १२८८ ॥

किमिदं किमिदं भर्तृदारिकेऽकारि वैरिणि ।
इदं वदन्ती शतशो व्यलपद् बन्धुसुन्दरी ॥ १२८९ ॥

तद्विलापविलोपाय मामाधूतकराम्बुजम् ।
सचेतनतया योग्यां जीवनाय विबुध्य सा ॥ १२९० ॥

उत्प्लुत्य[1] शाखामाकर्षदुच्चकैर्मां चकार च ।
पाशदार्ढ्यनिषेधाय नाकार्षीत् सा किमाकुला ॥ १२९१ ॥

अविस्फुरत्प्रतीकारपाशं छेत्तुं कमप्यहम् ।
आनयामीति साऽचालीन्नाबुधं यद् व्यधात्तु सा ॥ १२९२ ॥

क्षणेन क्षीणमूर्च्छाऽहमश्रौषं बन्धुसुन्दरी[2]म् ।
[3]जनेरुद्बन्धनप्रान्तं[4] मद्वृत्तान्तं निवेदिनीम् ॥ १२९३ ॥

अपहारवरमाल्या न्यासाधिपतनादि मे ।
रहस्यमिदमाप्तस्य कस्यार्या निगदत्यसौ ॥ १२९४ ॥

इत्युन्मीलितनयना नयनामृतदर्शनम् ।
अदर्शमिन्दुकिरणैः कुमारं स्वस्य वल्लभम् ॥ १२९५ ॥

प्रत्यङ्गावयवामुक्तमुक्ताभरणरश्मिभिः ।
संवर्मिताङ्गं सन्तापं विलुम्पन्तं विलेपनैः ॥ १२९६ ॥

क्षिप्ता प्रियाकरेणेयमित्यासाधारणश्रिया ।
शुष्कया [5]मत्करन्यस्तमालयाऽऽश्लिष्टकन्धरम् ॥ १२९७ ॥

वरमालाक्षणक्षिप्तश्रीखण्डतिलकां पटीम् ।
अस्मद्धस्ताहराणीव दधतं स्वसमर्पणे ॥ १२९८ ॥

पाणिना पिष्टश्रीखण्डपल्लवस्यन्दबिन्दुना ।
पुनः पुनः स्पृशन्तं मत्कण्ठपाशनिपीडितम् ॥ १२९९ ॥

---

1. B °त्पुत्य. 2. NK °री. 3. = Right from (my) birth upto the tightening of the noose. 4. NPK °प्रात°. 5. NPBK सत्कर°.

प्राणनिर्वासनादेशात् पाशात् सम्भावितापदः ।
सहसैव बहिर्भूतं स्वकीयहृदयादिव ॥ १३०० ॥

वीतरागेति नाम्नैवोच्चारितेन विनिद्रितैः ।
प्राकृतैः सुकृतैराविष्कृ[1]तं कृतकृपैरिव ॥ १३०१ ॥

तस्योत्सङ्गपरिष्वङ्गसरङ्गानङ्गसम्मदम् ।
पुनर्मूर्च्छितचैतन्यां स्माह मां बन्धुसुन्दरी ॥ १३०२ ॥

सदाकारसमाचारख्यापितक्षितिपान्व[2]यम् ।
न पश्यसि[3] महात्मानं किममुं भर्तृदारिके ॥ १३०३ ॥

मूर्त्यन्तरमनङ्गस्य न स्याद् यद्येष सद्मनि ।
आकारितो वा नागच्छेच्छि[4]न्द्याद्वोत्प्लुत्य नांशुकम् ॥ १३०४ ॥

अपेतपाशामादाय [5]हृदा कुमुद[6]दीर्घिकाम् ।
आनीयोपचरेन्न त्वामुपायघटनापटुः ॥ १३०५ ॥

सत्यामपि मयि तदा नैव स्यात्तव जीवितम् ।
कुल[7]स्य कुमुदबन्धुसम्बा[8]धाचाकलङ्कता ॥ १३०६ ॥

तदमुं प्रणम[9] प्राणप्रदमत्युपकारिणम् ।
इत्युक्त्वाऽनमयत् सा मे मौलिमीषद् युवाऽपि सः ॥ १३०७ ॥

कुमारो व्याकरोदब्धिपतनोद्बन्धनादिषु ।
अस्या हेतुमनर्थेषु ब्रूषे मामुपकारिणम् ॥ १३०८ ॥

प्रियालापप्रियतया[10] प्रियं मां बन्धुसुन्दरि ।
स्वोपकारेण मां पूर्णं राजपुत्र्याः करोष्यमुम् ॥ १३०९ ॥

उपकर्त्री त्वमेवास्या ययेय[11]न्ति दिनान्यसौ ।
जीवितं धारिता विप्रयोगज्वरचिकित्सया ॥ १३१० ॥

मत्वा मुमू[12]र्षुमद्यैनामिङ्गितैरिङ्गितज्ञया ।
अन्वायान्त्याऽऽशु किं नास्या मम चोपकृतं त्वया ॥ १३११ ॥

कृतार्थोऽयमनर्थाय स्वमाहास्याः कथं न्विति ।
जिज्ञासुं ज्ञातवृत्तान्तां व्यथां कर्णान्तमेत्य ताम् ॥ १३१२ ॥

---

1. NPK °राविः कृतं; B °कृतां. 2. N °त्व°. 3. NPK °से. 4. NP °च्छेच्छिं°. 5. B हृदा. 6. B कुमुदा°. 7. B कुल्यं. 8. B °सबांधाश्चा°. 9. NPK प्रणत. 10. B °तथा. 11. = यया + इयन्ति. 12. NK मुमुर्षुं°.

असौ तमेव निश्चित्य कुमारं स्माह सस्मिता ।
ख्याता कुटिलता स्त्रीणां पुंसां प्राञ्जलता वृथा ॥ १३१३ ॥

सुगुप्तोऽपि मयाऽऽख्यायि वृत्तान्तः पूर्वमेव च ।
न पश्चादपि युष्माभिर्गम्भीरैरञ्जसा पुनः ॥ १३१४ ॥

याचिष्यामि कुमार त्वां तत् किञ्चित् पा[1]रितोषिकम् ।
स स्माह शीघ्रं याचस्व बन्धुसुन्दरि वाञ्छितम् ॥ १३१५ ॥

परं पुरैव सर्वं स्वं जीवितेन समं मया ।
सख्यास्तेऽदायि तेनास्मि किञ्चिद्दातुमनीश्वरः ॥ १३१६ ॥

नोत्तरं युक्तमित्युक्तस्तया स प्रेक्ष्य मन्मुखम् ।
बन्धुसुन्दरि प्रार्थस्व स्वैरमित्य[2]ब्रवीत् पुनः ॥ १३१७ ॥

कुमार पुनरीदृक्षदुःखानां विषयो यथा ।
न स्यादियं तथा कुर्या इति साऽयाचदुच्चकैः ॥ १३१८ ॥

निजप्राणपरित्राणपर एवाहमीदृशम् ।
करिष्ये प्रतिकूलं चेत् तदैवमिति सोऽभ्यधात् ॥ १३१९ ॥

आर्यपुत्रः कथं केन नीरुधेरुद्धृ[3]तस्तदा ।
कथमत्रागतश्चेति मयोक्तः प्रोक्तवानिदम् ॥ १३२० ॥

दृक्पथानतिथौ देवि भवत्यामहमागतम् ।
दुःखानां सागरं सोढुमक्षमः सागरेऽपतम् ॥ १३२१ ॥

जन्तुघातापवित्रैः किमन्यतीर्थैः समं त्वया ।
कर्तुमारम्भ्यद[4]स्तीर्थं सङ्कल्पेनापि सत्फलम् ॥ १३२२ ॥

इति व्याहरता केनाप्यदृष्टेन क्षणादहम् ।
नौस्थः स्वशिबिरस्यान्तरानीतः प्रीतनाविकैः ॥ १३२३ ॥

मदनालोकनक्षामं राजलोकमहं स माम् ।
बभाषे[5] कुशलालाप[6]कलापकलया गिरा ॥ १३२४ ॥

रत्नकूटस्य कटके कटकेन समन्वितम् ।
दत्तावासं तस्थिवांसं प्रभूतानि दिनानि माम् ॥ १३२५ ॥

---

1. NPK परि°. 2. NPK °मिक्ष°. 3. NPK °स्त्वद्धृत°. 4. = कर्तुम् + आरम्भि + अदः. 5. P °भार्षे; NBK °भाषो. 6. B °लाजाप°.

भवद्वियोगरोगार्त्तं बहुधोपचरन्नरम् ।
विज्ञवृन्दारकोऽन्येद्युस्तारको गिरमुज्जगौ ॥ १३२६ ॥

मृणालचन्दनैस्तापव्यापदं विनिवारयन् ।
कियत्कालमसञ्जायमानोपायः शमा[1]प्स्यसि ॥ १३२७ ॥

काञ्चीगताऽहमादास्ये प्रपन्नमपि नायकम् ।
एवं मलयसुन्दर्या स्वास्यादिष्टा[2] पुरी यते ॥ १३२८ ॥

आत्मसात्क[3]रणे तस्यास्तस्य स्वेन परेण वा ।
भावी कश्चिदुपायोऽपि वृथाऽवस्थानमत्र तु ॥ १३२९ ॥

तस्मिन्नेवं वदत्येव वेत्रिनेतृनिवेदितः ।
राजदौवा[4]रिको राजा[5]देशं दत्ते स्म पैतृकम् ॥ १३३० ॥

व्य[6]भावयं च तस्यार्थं यथा कुसुमशेखरः ।
राजा वज्रायुधारब्धविग्रहप्र[7]बलग्रहः ॥ १३३१ ॥

ययाचे वत्स मां मैत्र्यं प्रतिपन्नं मया च तत् ।
प्रतिग्रहाय तत् तस्य काञ्चीं त्वं त्वरितं व्रजेः ॥ १३३२ ॥

तवोदितस्य संवादी तातादेशोऽप्युपस्थितः ।
इति तारकमुल्लास्य सबलोऽहमिहागमम् ॥ १३३३ ॥

कृताभिगमनो राज्ञा दत्तमावसथं स्थितः ।
उपायान्न व्यधां कांस्कान् त्वत्प्रवृत्तिसमीहया ॥ १३३४ ॥

प्रातर्यातः समीक्ष्याद्य सश्रृङ्गाशनगारिणः ।
महः पुर्यां कोऽयमिति मयोक्तस्तारकोऽब्रवीत् ॥ १३३५ ॥

कुसुमाकरमुद्यानं राज्ञाऽत्राका[8]रि नूतनम् ।
अनङ्गायतनं तत्र देव्या गन्धर्वदत्तया ॥ १३३६ ॥

अद्यानङ्गत्रयोदश्यां मिलन्निखिलनागरः ।
तत्र प्रवर्तमानोऽस्ति कुमारा[9]यं महोत्सवः ॥ १३३७ ॥

अहं देशस्थितिं द्रष्टुं यामीत्यामुखयन् वचः ।
आलोकये क्व[10]चित् त्वां[11] चेदिति मत्वा[12]ऽन्तरे [13]दधत् ॥ १३३८ ॥

---

1. = शम् + आ°. 2. = स्व + आस्य + आदिष्टा (= स्वस्य मुखेन कथिता). 3. NK °रकु°. 4. B °जादोवा°. 5. B सजा°. 6. B व्यच°. 7. B drops °प्र°. 8. = अत्र + अकारि. 9. NPBK कुमारों°; = हे कुमार! अयम्. 10. NK स्क°. 11. NPB स्कां. 12. K °न्वां. 13. NP दे°

करेणुमहमारुह्य विधृतातपवारणः ।
कतिचिद्युवभिर्युक्तः कामायतनमागमम् ॥ १३३९ ॥ युग्मम् ॥

दृष्ट्वाऽनेकनमन्नारीनायकं पुष्पसायकम् ।
तस्याहं न्य[1]षदं द्वारि मत्तालम्बावलम्बनः ॥ १३४० ॥

भवदायत्तचित्तं मामीर्ष्ययेव तदा रतिः ।
न द्वारसेवकमपि दृशाऽपि समभावयत् ॥ १३४१ ॥

लीलालास्येष्वनुल्लासः काकलीष्वकुतूहली ।
वाद्येष्वविद्यमानान्तःकरणानन्दकन्दलः ॥ १३४२ ॥

भवद्भ्रमेण संयोगं वियोगं च जने जने ।
नयन्न[2]यनमाह्लादविषादमयतामहम् ॥ १३४३ ॥

व्य[3]तीत्य दिनमेकेन स्थेयं रात्राविति व्रतम् ।
वहन् विसृष्टानुचरस्तस्थिवान् सेवितुं स्मरम् ॥ १३४४ ॥ युग्मम् ॥

अनुजीविजनानीतराजीवपरिकल्पितम् ।
तल्पमास्थाय सङ्कल्पयोनिमाराधयन्नहम् ॥ १३४५ ॥

अस्ति कोऽपि पुमान् योऽद्य कन्यारत्नस्य जीवितम् ।
ददद्दाति निःशेषराजलोकस्य साहसी ॥ १३४६ ॥ युग्मम् ॥

इति वाचं सरुदितामसकृद् गदितामहम् ।
श्रुत्वा स्त्री कापि दुः[4]स्थेति ध्यायन्न[5]हमधाविषम् ॥ १३४७ ॥

का त्वं किं कन्यकार[6]त्नं पतितं कुत्र सङ्कटे ।
इति पृच्छ[7]न्तं रुदती स्माह मां बन्धुसुन्दरी ॥ १३४८ ॥

देवागच्छ[8] द्रुतं गच्छ[9] कुरु पाणौ कृपाणिकाम् ।
पश्चाद् विज्ञपयिष्यामि सर्वं सम्पूर्णवाञ्छिता ॥ १३४९ ॥

तथा त्वां बन्धुसुन्दर्या दर्शयन्त्या महापदि ।
जीवातुं मम पद्माक्षि किन्नोपकृतमेतया ॥ १३५० ॥

बन्धुसुन्द[10]र्यथावादीद् राजा कुसुमशेख[11]रः ।
विग्रहव्यथितो वज्रायुधायैनां प्रपन्नवान् ॥ १३५१ ॥

---

1. NPBK न्य°. 2. NPBK नयत्रय°. 3. NPBK ब्य°. 4. NPBK दुस्थे°. 5. NK °यन्नह°. 6. B °रात्नं. 7. NP पृछं. 8. NP °गछ. 9. NP गछ. 10. B °सुंदर्यां. 11. NPBK °शेषरः.

प्रातर्वरीतुमेष्यन्ति तदीयपुरुषा इति ।
चक्रे[1] प्राणप्रहाणाय कर्म तत्तद्वियाऽनया ॥ १३५२ ॥

सुगुप्तमधुनैवाप्तैरेतां प्रहिणु सिंहलान् ।
जीवन्तीं स्मितराजीववदनां यदि वाञ्छसि ॥ १३५३ ॥

कुमारोऽब्रूत राज्ञोऽस्य त्रातुं तातेन साम्प्रतम् ।
प्रेषितस्यास्य[2] सर्वस्वं कन्यारत्नं हरे कथम् ॥ १३५४ ॥

राजा दास्यत्यमुं मह्यमित्युक्त्वा[3] मौनवान् स माम् ।
विमुच्य चित्रशालायां ससखीकां ययौ स्वयम् ॥ १३५५ ॥

मां शायितवती चित्रशालायां बन्धुसुन्दरी ।
देव्या गन्धर्वदत्तायाः समीपमगमत् तदा ॥ १३५६ ॥

अपहारात् समारभ्य तत्कालागमनावधि ।
जगाद मम वृत्तान्तं देव्याः सकलमेव सः ॥ १३५७ ॥

विज्ञप्तो नृपतिर्देव्या वेपमानमना जगौ ।
चन्द्रकेतुसुतोऽस्माकमुपचक्रेऽखिलं कुलम् ॥ १३५८ ॥

विरोधिरुद्ध[4]जनतावाचा विधुरचेतसा ।
असाम्मत्येऽपि ते देवि प्रपन्नाऽसौ मयाऽरये ॥ १३५९ ॥

भविताऽस्य धवो राज्यधुर्यः खेचरचक्रिणः ।
इति ज्योतिषिवाचाऽस्य संरब्धस्यापि नो ददे ॥ १३६० ॥

दातुं तु प्रतिपद्यैतामददानः स्ववाच्यता[5]म् ।
हर्तुं गुप्तः क्वचिद् वत्सां प्रैक्ष्य वक्षाम्यदः शृणु ॥ १३६१ ॥

वत्सा जागरया रात्रा[6]वद्य जातविशू[7]चिका ।
विपन्नेत्यल्पसंरम्भो भावी रिपुरपि स्वयम् ॥ १३६२ ॥

ततोऽन्यकन्यादानेन देशलेशार्पणेन वा ।
असौ मम सुप्रशमः सम्भवद्विग्रहक्लमः ॥ १३६३ ॥

देव्या[8]ऽभ्यधायि तर्ह्येतु शान्तवै[9]राश्रमे सुता ।
समं यत्रार्यपुत्रेण समभून् मम[10] दर्शनम् ॥ १३६४ ॥

---

1. B चाक्र°. 2. NPBK °स्यस्तस्य. 3. NPBK °क्त्वा. 4. NPBK °रुद्द°. 5. B स्वव्य-व्यता. 6. B रावत्राव. 7. NPBK °सूचिका. 8. NPBK देव्य°. 9. B °चौरा°. 10. NK मव.

अतिमातृपितृकेऽत्र तापसीतापसव्रजे ।
युष्मद्वियोगजं दुःखं न वत्सां व्यथयिष्यति ॥ १३६५ ॥

एवमस्त्विति निश्चि[1]त्याकारयामास मां पिता ।
स्वमृत्युक्रियया शङ्कमानाऽभ्यागामधोमुखी ॥ १३६६ ॥

प्रत्यर्थिनः प्रदानेन मदीयेनाश्रुमिश्रदृक् ।
आश्लिष्य न्यस्य चोत्सङ्गे जनको निजगाद माम् ॥ १३६७ ॥

परचक्राभिभूतात्मलोकालोकनहेतुकम् ।
वत्से मम क्षमस्वैकमपराधममुं पितुः ॥ १३६८ ॥

नास्य दास्यामि शत्रोस्त्वां प्राणान्तिकविपद्य[2]पि ।
प्रवासकष्टं कतिचित् साहयिष्या[3]म्यहानि तु ॥ १३६९ ॥

एवं निगदता पित्राऽपनीतच्छ[4]त्रचामरा ।
तत्कालकलिताध्वन्यवेषोचितविभूषणा ॥ १३७० ॥

पाल्या जीवितवदसाविति शिक्षाधृतोन्नतेः ।
अहं तरङ्गलेखाया मातुः[5] सख्याः[6] समर्पिता ॥ १३७१ ॥ युग्मम् ॥

आपृष्टोऽपि मया नेष्ट इति चिन्तानलाकुला ।
अमात्रस्नेहया मात्रा तत्कालकृतमङ्गला ॥ १३७२ ॥

सिन्दूरारुणकुम्भाग्रजाग्रज्जातिसुमस्रजम् ।
तरङ्गलेखया सार्धं सिन्धुरीमधिरोपिता ॥ १३७३ ॥

आ[7]न्तर्वंशि[8]कवृन्देन परितः परिवारिता ।
पक्षद्वारेण सञ्चेरे प्रणम्य पितरावहम् ॥ १३७४ ॥ विशेषकम् ॥

राज्ञा युक्ता जगत्तापप्रशमक्षमतेजसा ।
विभावरी पुरीवासीत् क्रमादेव दवीयसी ॥ १३७५ ॥

अखण्डैरचिरेणैव प्रयाणैरहमाश्रमम् ।
आपूरयं यतमतिस्तपोभिरिव निर्वृतिम् ॥ १३७६ ॥

मुक्त्वा मामाश्रमे तत्र व्यावर्त्तत परिच्छ[9]दः ।
अण्डं[10] झटिति काकोलकुलाय इव कोकिला ॥ १३७७ ॥

---

1. B निश्च°. 2. B °द्यति. 3. B °ष्टीम्य°. 4. P °तछत्र°. 5. N मातुः. 6. NK सख्या.
7. NPK अंत°. 8. B °वंशिक. 9. NP °छदः. 10. B अजं.

चलामवस्थितामूर्ध्वां निषण्णा[1] चानुयायिनी[2] ।
सदा तरङ्गलेखा मां न छायावद्[3] अदूरयत् ॥ १३७८ ॥
सा मां धृतैकमङ्गल्य[4]वलयां वल्कवाससम् ।
चक्रे द्यां सद्वितीयेन्दुं सन्ध्येवारुणवारिदम् ॥ १३७९ ॥
अक्षूणदक्षिणतया ताते त्रातरि वाऽञ्जसा ।
नित्यं वात्सल्यम[5]तनोदलं कुलपतिर्मयि ॥ १३८० ॥
चिरं परिचयान्मातुस्तापस्यश्चाञ्जसं स्थिरम् ।
प्रयुञ्जाना न वात्सल्यं किमेकं कुर्वते मयि ॥ १३८१ ॥
वन्या[6]भिर्मुनिकन्याभिरविशेषितवेषभृत् ।
कदाचिदश्चल्यतिथीनहं कुलपतेर्गिरा ॥ १३८२ ॥
क्षुधातापभरक्लान्तानुपकर्तुमना जनान् ।
बालवृक्षालवालेषु क्षिपन्त्यम्बु कदाचन ॥ १३८३ ॥
स्वकेनानुभवेनेव दुःखं मातुर्वियोगिनाम् ।
जानती मृगशावानां कदाचित् कुर्वती हितम् ॥ १३८४ ॥
आख्यानकगणं साक्षाच्चिन्तासन्तापचन्दनम् ।
कदापि तापसीवर्गान्न[7]श्यन्ती निचितं हृदि ॥ १३८५ ॥
देवार्चनाय पुष्पाणि पाणिप्रणय[8]शायिषु ।
फलानि चातिथेयानि कदाचिदविचिन्वती ॥ १३८६ ॥
शाम्यद्बन्धुवियोगार्तिर्गमयन्त्यन्यदा दिनम् ।
कथ्यमानं द्विजेनादोऽश्रौषं कुलपतेः पुरः ॥ १३८७ ॥
स कुमारस्त[9]दैवात्मसैन्यं संनह्य संगरम् ।
चकार वैरिणाऽपारबलेन सह साहसी ॥ १३८८ ॥
कृतेनानायुधेनापि तेन वज्रायुधेन सः[10] ।
दीर्घ[11]निद्रां परं प्रापि सहयुद्धनृपैः सह ॥ १३८९ ॥
तयाऽहं विषमय्येव वार्तया प्राप्तकर्णया ।
मू[12]र्च्छन्मू[13]र्च्छाऽपतं गत्वोटजस्यान्तः परासुवत् ॥ १३९० ॥

---

1. P निषण्ता. 2 B °वामियिनी. 3. B drops °द° in °द् अ°. 4. B °मंगल°; K मंगला°. 5. B wrongly numbers this verse as १३७५, drops मत° and instead repeats °वलयां.... द्वितीयें° of vs. 1379. 6. NPK °न्या°. 7. NPK °श्वास्यंता. 8 B °प्राणय°. 9. B °त्वा°. 10. NPK स. 11. B. दार्थं°. 12 NP. मूर्छं°. 13. NP. °मूर्छा°.

सर्वेषामपि दुःखानामन्तर्धानधुरीणया ।
क्षणेन प्रियसख्येव वियुज्ये मू[1]र्च्छयाऽप्यहम् ॥ १३९१ ॥

कुमारेन्दुवियोगार्त्ता रजनीव व्यधामहम् ।
विलापांस्तद्गुणोपेतान् ध्वान्तानिव सतारकान् ॥ १३९२ ॥

विनाऽम्भःपतिपातेन नायं तापः [2]शमिष्यति ।
ततस्तरङ्गलेखा[3]क्षि वञ्चयित्वाऽचलं शनैः ॥ १३९३ ॥

गमनायाससोल्लासश्वासपूरगतागतैः ।
सशब्दैर्लोहकारस्य भस्त्रिकामनुकुर्वती ॥ १३९४ ॥

हृदयान्तरसंमान्तमिव वात्सल्यसंचयम् ।
दधन्ती मत्तृषां हर्तुमम्बुकम्रं कमण्डलुम ॥ १३९५ ॥

उदस्तदक्षिणकरां करालवदनद्युतिम् ।
तरङ्गलेखामायान्तीमात्मनोऽनुपदं द्रुतम् ॥ १३९६ ॥

शी[4]घ्रपातपदक्षुण्णशुक्तिशब्दैस्तटेऽम्बुधेः ।
शङ्कमानाऽऽगतं कञ्चिद् व्यावृत्तास्या व्यवलोकयम् ॥ १३९७ ॥ कालापकम ॥

व्यचिन्तयं मया पुण्ये पापया पयसांनिधौ ।
न प्रापि प्रात एतस्यामायातायामिहाधुना ॥ १३९८ ॥

जन्तुसङ्घातघातोत्थैर्मलिनं पातकैरिव ।
बहि[5]ष्कृतमम्बुधिना दुरात्मानमिवात्मजम् ॥ १३९९ ॥

मूर्च्छितानां विपन्नामनेकेषां पतत्रिणाम्[6] ।
दर्शनेन विनिश्चित्य तत्र किम्पाकपादपम् ॥ १४०० ॥

उपजीवितवत्यस्मि तस्य पाककलं फलम् ।
परलोकप्रयाणाय सहायमविलम्बितम् ॥ १४०१ ॥

मुखे दर्शितमाधुर्यं तद्वैषयिकसौख्यवत् ।
दर्शयामास वैरस्यमन्ते निबिडपीडया ॥ १४०२ ॥

दशा किञ्चिदपश्यन्तीमासीनां क्वापि पादपे ।
तरङ्गलेखा मां स्माह क्रोधनिर्वेदनिष्ठुर[7]म् ॥ १४०३ ॥

---

1. NP मूर्छ°. 2. NPK समि°. 3. NPK °स्क°. 4. B drops this whole verse No. 1397 and verse No. 1398 upto व्यचिन्तयं°. 5. NPBK बहिःकृत°. 6. B पतत्रणि. 7. NPK °डुरं.

बन्धुः कोऽपि किमस्तीह स्नि[1]ग्धसम्बन्धबन्धुरः ।
वेलावने यदेताऽसि तस्करश्वा[2]पदास्पदे ॥ १४०४ ॥

मनोवाक्कायनिष्पा[3]पतापसीष्वपि तापकृत् ।
शिक्षिता शिक्षिता[4]चारं केन चाप[5]लमीदृशम् ॥ १४०५ ॥

कुकर्मपरिपाकेन केन त्वत्सन्निधावहम ।
तावतोऽपि परीवाराद् देवेन विनियोजिता[6] ॥ १४०६ ॥

कराव[7]ष्टब्धमौलिः किं मौनेनैवं विलम्बसे ।
वज्राश्रमाय यामोऽत्र स्थानमापन्निबन्धनम ॥ १४०७ ॥

इत्युक्त्वाऽहं करे धृत्वा शनैरूर्ध्वीकृता तया ।
गच्छन्ती प्रस्खलत्पादमपतं[8] सहसाऽवनौ ॥ १४०८ ॥

शङ्कमाना स्वदुर्वाक्यैः सा मां बुद्ध्वा तथा स्थिताम ।
दुरापवचनालापं सपश्चात्तापमब्रवीत् ॥ १४०९ ॥

इयं मज्जीवितमिव पालनीयाऽतियत्नतः ।
वारं वारमिदं देवस्त्वत्समक्षं जगाद माम् ॥ १४१० ॥

अपायमूलमीदृक्षं चापलं विनिषेधितम् ।
मयेदमुदितं पुत्रि न वदिष्याम्यतः परम् ॥ १४११ ॥

मातस्त्व[9]योदितमपि न श्रोष्यामितमामिति ।
कृतप्रतिप्रतिज्ञेव सञ्जाताऽहमचेतना ॥ १४१२ ॥

मृत्युप्रत्यात्तवर्म्मेव सञ्जातपुलकच्छलात् ।
समुन्मिषितनेत्राऽहं वदामि स्म क्षणादिदम ॥ १४१३ ॥

त्वं मां तरङ्गलेखे[10] मा कमण्डलुजलैः सिच ।
अहमस्मितमां मातः सञ्जाततनुपाटवा ॥ १४१४ ॥

समुन्मिषितदृक् चारुदिव्यदारुमयालये ।
मृणालकल्पितानल्पशिल्पतल्पतलस्थितम् ॥ १४१५ ॥

तन्तुद्वारविशद्वारिकणार्द्रेण म्रदीयसा ।
चीनांशुकेन सर्वाङ्गमावृतं स्वमलोकयम् ॥ १४१६ ॥ युग्मम् ॥

---

1. N स्त्रि. 2. NPK °स्वा°; B °स्का°. 3. NPBK निःपाप°. 4. NK drop शिक्षिता° 5. NPK चाफल°. 6. NPK ताः. 7. K °चष्ट°. 8. B °पतरं. 9. B °स्त्वाया°. 10. NPK °लेषे; B लेषेप.

भयविस्मययोः स्थानमथ सोपानवर्त्मना ।
भुव्यारुह्य द्वितीयायां यावद् वीक्ष्ये गवाक्षगा ॥ १४१७ ॥

तद्वेश्मादृष्टपारस्य तावन्ना[1]वमिवाम्बुधेः[2] ।
मध्येऽदर्शमहं साश्रु नाश्रमाब्धि[3]वनादिकम् ॥ १४१८ ॥

व्यमृशं वेदनीयं मे किमप्यद्याप्युदित्वरम् ।
नारकस्येव यन्मृत्योर्हेतवः से[4]तवः स्थिताः ॥ १४१९ ॥

अनिर्वेदप्रवृ[5]त्त्याऽऽशु सिध्यत्वेव चिकीर्षितम् ।
नालिकेरं दलन् घातैर्बालोऽप्यालोक्यते मितैः ॥ १४२० ॥

यावत् क्षुद्रस्य कस्यापि ग्रहेऽहं निपतामि न ।
तावत् पुण्यसरस्यत्र मरणं शरणं श्रये ॥ १४२१ ॥

इत्यावरीतुमङ्गानि गात्रिकाबन्धनेच्छ[6]या ।
विस्तारितपटाऽद्रा[7]क्षं लेखं बद्धं पटाञ्चले ॥ १४२२ ॥

अन्तरन्तरतिव्यक्तलक्ष्य[8]माणाक्षरावलिम् ।
आवाचयं तमुद्ग्रथ्य जलार्द्रम[9]पि कौतुकात् ॥ १४२३ ॥

स्वस्तिश्रीचन्द्रकेतुक्ष्मापालपादाब्जषट्पदः ।
काञ्चीशवंशमाणिक्यमणिं मलयसुन्दरीम् ॥ १४२४ ॥

सस्नेहसबहुमानमानसप्रसरद्रसम् ।
स्वकौशलकथादानाद् आनन्द्य निगदत्यदः[10] ॥ १४२५ ॥

मद्भाग्यविभवः सुभ्रु तिथौ तत्रेन्दुरुद्ययौ ।
तत् तेन साक्षिणा स्थित्वा दर्शिताऽसि तदा मम ॥ १४२६ ॥

केन त्वमुद्धृ[11]तोऽम्भोधेरार्यपुत्रेत्यवाचि यत् ।
सम्बोधनं तत् त्वयैव वाच्यमन्यभवेऽपि मे ॥ १४२७ ॥

सङ्ग्रामललितैर्बन्दिगीर्गदितैर्मुदितो नृपः ।
त्वां मे दास्यत्यहं चोपयस्येऽग्रयविधिना प्रिये ॥ १४२८ ॥

इत्याकूतं हतविधिर्मया युधि जितेऽप्यरौ ।
पूरयामास नाद्यापि न जाने किं प्रतीक्ष्यते ॥ १४२९ ॥

---

1. B drops °वन्ना°. 2. B °वांबुधः. 3. B °माब्ध°. 4. N °व से°; K °वा स°.
5. NPK °त्वा°. 6. NP °छया. 7. B drops °द्रा°. 8. NPBK °लक्ष°. 9. B °मथपि.
10. PB repeat °त्यदः. 11. NPK °मुद्धृतो°.

चन्द्रानने न निद्राया भविष्याम्यनृणः क्वचित् ।
या प्राप्ताऽल्पावकाशाऽपि त्वां सङ्गमयति द्रुतम् ॥ १४३० ॥

देव्या बन्धुस्त्वमेवासि विधुरे बन्धुसुन्दरि ।
यतेथास्तनुरक्षायामिति त्वामर्थये मुहुः ॥ १४३१ ॥

ह्यस्तनं तिथि[1]निर्देशं चालोक्य मरणे मतिम् ।
व्यमुञ्चं जीव[2]तामेव सङ्गतिः सम्भवेदिति ॥ १४३२ ॥

समीरप्रेरणात् तीरमागतात् सरसोऽम्भ[3]सः ।
उत्तीर्य वेश्मनस्तस्मान्न्यषदं शाखिनस्तले ॥ १४३३ ॥

मुक्ता परिग्रहेणाहं किं करोमि श्रयामि किम् ।
क्व तिष्ठामि क्व यामीति चिन्तां चक्रे परिग्रहम् ॥ १४३४ ॥

घृतौ[4]जादेव पूजासु काऽपि पुष्पाणि चिन्वती ।
सुवेषा योषिदेका[5] मामूचे मलयसुन्दरी ॥ १४३५ ॥

केनाटव्यां त्वमानीता निर्व्याजद्विषता वद ।
केन हित्वा दुकूलानि वल्कलानि कृतानि ते ॥ १४३६ ॥

किं मां प्रत्यभिजानासि दासितोत्पललोचने ।
इति प्रोक्तवती सा मां समाश्लिश्लेष सादरम् ॥ १४३७ ॥

अथा[6]नेकप्रतीहारीवृन्दकन्दलितोदया ।
नयन्त्याभरणाङ्गानां मिथो भूषणभूष्यताम् ॥ १४३८ ॥

महिषी चक्रसेनस्य दक्षिणश्रेणिचक्रिणः ।
पत्रलेखाऽऽगमत् तत्र रूपरेखाकलामरी ॥ १४३९ ॥

दिव्य[7]दारुमयं देवि प्रासादं पश्य कस्यचित् ।
एवं सन्दर्श्यमानेऽस्मिन् वेत्रिणीभिः समन्ततः ॥ १४४० ॥

कोशाध्यक्षा वदत्यु[8]क्ता बलीदेव्यनुमानये ।
तद्विमानमिदं दिव्यं हरिचन्दनदारुणः ॥ १४४१ ॥

विहर्तुं व्योम्नि घर्मर्तौ यदर्थं तातसन्निधौ ।
गन्धर्वकं सुवेलाद्रौ द्रुतं प्रहित[9]वत्यसि ॥ १४४२ ॥

---

1. B तंथ°. 2 NPBK जीविता°. 3. B °सोभसः. 4. B धृतो°. 5. B. °देकी 6. B मथानो°. 7. K दिव्याः. 8. B °न्तु°. 9. B प्रिहित°.

देव्या ह्यस्तन एवाह्नि दुकूलयुगलं तदा ।
यददायि प्रसादेन गन्धर्वाय तदस्त्यदः ॥ १४४३ ॥

मुक्तावलिदुकूले चेत् ते वराकः[1] स तर्हि मे ।
विपन्न इति शोचित्वा देवी प्राप मदन्तिकम् ॥ १४४४ ॥

ऊचे च[2] चित्रलेखेऽसौ का क्व वा संस्तुता तव ।
इत्युक्तिमुक्तिकाशुक्तिः सा वक्ति स्माश्रुमिश्रदृक् ॥ १४४५ ॥

तव गन्धर्वदत्तेति स्वसा देवि[3] लघीयसी ।
दशवत्सरदेश्याऽपि निर्देश्याऽऽदौ कलाभृताम् ॥ १४४६ ॥

द्रष्टुं नाट्यरहस्यं तु तस्या मातामहोऽन्यदा ।
सुवेलशैलाद् वैताढ्ये वैजयन्त्या निनाय ताम् ॥ १४४७ ॥

जितशत्रु[4]रिति द्वेषिसामन्तस्तत्र कर्हिचित् ।
निशिदत्तजनाक्रन्दमवस्कन्दमपातयत् ॥ १४४८ ॥

इषुक्षतशरीरेषु प्रवीरेषु विरोधिभिः ।
परकीयेष्वि[5]वात्मीयेष्वपि मुष्ण[6]त्सु पूर्जनम् ॥ १४४९ ॥

यामि[7]केषु यमागारद्वारशृङ्गारकारिषु ।
अवरोधेऽप्यसम्प्राप्तसंरोधेषु विरोधिषु ॥ १४५० ॥

स्कन्धे निधाय गन्धर्वदत्तामारब्धरोदनाम् ।
अन्तर्वंशिकसमरकेलिनामोत्पपात खे ॥ १४५१ ॥

चलन् सुवेलमुद्दिश्य घातार्तो गन्तुमक्षमः ।
स्थितः प्रशान्तवैराख्याश्रमे याम्याब्धिसन्निधौ ॥ १४५२ ॥

अर्प[8]यित्वा कुलपते[9]स्तत्र शान्तातपस्य ताम् ।
सोऽन्तर्वंशिकवंशाग्रध्वजो वव्राज पञ्चताम् ॥ १४५३ ॥

स्वापत्यमिव सा तेन लाल्यमानाऽतियत्न[10]तः ।
शिश्राय यौवनं रूपविद्रूपत्वनिबन्धनम् ॥ १४५४ ॥

अक्षूणदक्षिणक्षोणिप्रणयिप्रणताह्वये ।
तत्रागताय कुसुमशेखराय स तां ददौ ॥ १४५५ ॥

---

1. B °का. 2. NK व. 3. B देव. 4. NK °शत्रु°. 5. K. °ष्वि°. 6. PB °ष्म°.
7. B यामकेषु. 8. B अर्प्य°. 9. B °तेपतेख°. 10. P यत्नत:.

तल्लाभेन निजं जन्म सफलं सकलं विदन् ।
उपमेये स गन्धर्वविवाहेन तदैव ताम् ॥ १४५६ ॥

स तां पट्टमहादेवीं छत्रचामरलाञ्छनाम् ।
चकाराकरजे रत्ने[1] माहात्म्यमविनश्वरम् ॥ १४५७ ॥

व्यश्लिष्यन् न क्षणमपि स्वकान्तहृदयादियम् ।
सुलग्ने स्थापिता देवप्रतिमेव निजा[2]लयात् ॥ १४५८ ॥

तत्कुक्षिसरसी राजहंसी मलयसुन्दरी ।
अभूदेषा कलालब्धेरेखा[3] लेखा[4]ङ्गनास्वपि ॥ १४५९ ॥

पञ्चशैलमहाद्वीपद्वीपवीरजिनालये ।
यात्रायां खेचरादित्यान्नृत्यादियमरञ्जयत् ॥ १४६० ॥

दृष्ट्वाऽसौ तत्र विज्ञातवृत्तान्ता च तदादितः ।
इति श्रुतिसमुन्मीलत्प्रेमा देव्यालिलिङ्ग माम् ॥ १४६१ ॥

सा मां [5]समं समादाय जिनायतनमागता ।
समायातं शिवमित्र भुवि प्रशमिताशिवम् ॥ १४६२ ॥

अवधानेन सा तेन जिनमानर्च नाभिजम् ।
पाणिप्रणयि येनाशु पदं भवति निर्वृतेः ॥ १४६३ ॥

सा मामभिष्टुतजिनां निनीषुर्निजमन्दिरम् ।
भृशमभ्यर्थयामास सुधासङ्काशसूक्तिभिः ॥ १४६४ ॥

मुनिकन्यासमाचारा समाराद्धु[6]मना जिनम् ।
वनं भवनमास्थास्यामीति देवीं न्यवारयम् ॥ १४६५ ॥

साऽतिस्निग्धा निवासाय दत्वा मठममुं[7] मम ।
वेश्यां चतुरिकामङ्ग[8]शुश्रूषार्थममुञ्चत ॥ १४६६ ॥

आरुह्य सपरीवारा विमानं हारिचन्दनम् ।
देवी जगाम धामं स्वं सुधाधामसमानना ॥ १४६७ ॥

अहं लेखाक्षरोत्पन्नतज्जीवितविनिश्चयात् ।
समासादितदार्ढ्या च मृत्युबुद्धिमकुण्ठयम् ॥ १४६८ ॥

---

1. P रत्ने. 2. B जिनिजा°. 3. NPK रेषा°. 4. B °खागना. 5. B सामं 6. NPK °राद्धु°. 7. B °मह्. 8. B drops °ग°, reading °मंशु°.

अदृष्टपारकासारस्नानम्लानवपुर्मला ।
भृङ्गीसङ्गीतगन्धानि समादाय सुमान्यहम् ॥ १४६९ ॥

[1]प्रददानाऽन्तरायाणामानन्दाश्रुच्छ[2]लाज्जलम् ।
दिने दिने जिनेशस्य करोमि[3] परिपूजनम् ॥ १४७० ॥

जिनास्पदास्यनिर्दिष्टदृष्टिप्रियसमागमम् ।
मन्त्रं ध्यायामि वृद्धा[4]भिस्तापसी[5]भिरुदीरितम् ॥ १४७१ ॥

दृष्टनष्टमभूदिष्टदर्शनं तपसां फलम् ।
दुस्तप्तानामिति तपः कुर्वे गुर्वेत्र शक्तितः ॥ १४७२ ॥

जिनवन्दारुवात्सल्यावशिष्टैर्भूरुहां[6] फलैः ।
आहारं वपुराधारमात्रमासूत्रयाम्यहम् ॥ १४७३ ॥

गुणरत्नख[7]निं सेवमाना नाभिभुवं विभुम् ।
दुष्प्रा[8]पमपि सन्तोषरत्नं सम्प्राप्तवत्यहम् ॥ १४७४ ॥

सन्तोषयोगतः प्राप्तसर्वसम्पदि[9]वाधुना ।
जाता सङ्गतनिःशेषस्वजनेव सुखिन्यहम् ॥ १४७५ ॥

इत्युदित्वा व्यरंसीत् सा द्रविडेश्वरनन्दि[10]नी ।
पियूषरसमुद्गीर्य यथा चन्द्रमणिः प्रगे ॥ १४७६ ॥

तद्दुःखानां प्रतीकाराक्षमः श्याममुखोऽभवम् ।
प्रदोष इव विश्वानामसमर्थः प्रकाशने ॥ १४७७ ॥

अचिन्तयं च धिग्दैवं महावंशभुवामपि ।
दुःखानि मरणान्तानि दत्ते प्राकृतरेखया ॥ १४७८ ॥

अवदं त्वदत्र[11]तस्याहं जाने मलयसुन्दरि ।
स्वरूपं त्वमिवाशेषविशेषविषयीकृतम् ॥ १४७९ ॥

प्रतिरूपमहं तस्य स च मे युग्मजातवत् ।
भाजनं सुखदुःखानां भोक्तव्यानां परस्परम् ॥ १४८० ॥

अहं तदन्ति[12]कादत्र सम्प्रत्येव समागतः ।
ततस्तदसुखं कार्षीर्मा त्वं मलयसुन्दरि ॥ १४८१ ॥

---

1. K व्रद°. 2. NP °छला°. 3. B. करोम. 4. NP वृद्धा°. 5. B °शीभि°. 6. NPK °हाफ°. 7. NPBK °षनि. 8. NPBK दुःप्राप°. 9. B °संपद्वा°. 10. B °नहीदि°. 11. NPK °वृत°. 12. B °दपिति°.

पुष्करेण[1] करेणोस्तु वेगान्नावमिवागतम् ।
विजानामि न पन्थानमान्तरालमियत्तया ॥ १४८२ ॥

अन्योन्यं युवयो रागवतोरपि दवीयसोः ।
व्यमुहं सङ्गमाशायां निशायां चक्र[2]योरिव ॥ १४८३ ॥

साऽवदत् त्वन्मुखप्राप्ततदीयक्षेमवार्तया ।
उज्जीविताऽस्मि जीमूतपयोभिरिव द[3]र्दुरी ॥ १४८४ ॥

जीवत्वब्दसहस्राणि भुङ्क्त्वा सर्वसुखानि सः ।
दूरेऽपि क्षेमवानस्तु धन्याऽहमियताऽपि हि ॥ १४८५ ॥

अहं वनफलाहारा वल्कवस्त्रा वनस्थितिः ।
आराध्यन्ती जिनं जन्म नेष्ये चिन्ताऽऽत्मनो न मे ॥ १४८६ ॥

इदं दुनोत्यमन्दत्वत्प्रसादसदनं जनः ।
कथं भावी भवद्विप्रयुक्तः शिबिरगोचरः ॥ १४८७ ॥

तवापहारं करिणा पित्रोः श्रुतवतोरपि ।
प्राणापहारकृत् कृच्छ्रं[4] सम्भवि स्नेहगेहयोः ॥ १४८८ ॥

पततो विरहाम्भोधावुद्ध[5]र्तुं स्वस्य सज्ज[6]नान् ।
न ददासि कथं लेखं हस्तालम्ब इवास्तु तत् ॥ १४८९ ॥

परं नभश्चरः कश्चिदधुनाऽस्ति न पक्ष्यपि ।
इत्यस्यामुक्तमात्रायामेकः कीरः पुरोऽभवत् ॥ १४९० ॥

आदिशेति वदन्तं तमवदं गैरिकाक्षरैः ।
तालीदले सहल्लेखं[7] लेखं[8] लिखितवानहम् ॥ १४९१ ॥

कश्चिद् दिव्यः प्रकृत्या त्वमाकृत्यैव विहङ्गमः ।
उपकर्तुं क्षणे योऽद्ध[9] इव स्वयमिहागतः ॥ १४९२ ॥

हित्वा प्रत्यायनालापकलापमुभयोरपि ।
यद्गौरवतिरोधायि किन्त्वेकं कार्यमुच्यसे ॥ १४९३ ॥

कामरूपेषु लौहित्यतटस्थशिबिरे मम ।
लेखं कमलगुप्ताय पृतनापतयेऽर्पय ॥ १४९४ ॥

---

1. NK drop °रेणक°. 2. B चक्रे°. 3. B दुर्दुरी. 4. NP कृच्छं. 5. NPK °वुद्धर्तुं. 6. B सजना°. 7 PB °ल्लेखं. 8. NK drop °लेखं 9. NBK °द्ध°.

स ओमित्यूचिवान् चञ्चुपुटके लिखितं[1] दधत् ।
उत्पपात त्रिकूटाद्रिमुकुटं ककुभं[2] प्रति ॥ १४९५ ॥

किमयं संस्तुतः पूर्वमेवं मलयसुन्दरी ।
मयोक्ताऽऽह न संस्तौमि मर्त्यैरपि कथं खगैः ॥ १४९६ ॥

एवं वदन्त्यामेवास्यामस्तपर्वतमस्तके ।
बभूव रोचनारुच्यरक्षामणिरहर्मणिः ॥ १४९७ ॥

दिन[3]श्रीः सह तेजोभिर्द्वीपं गन्तुमनाः परम् ।
सौभाग्यतिलकमिवालिके बिम्बमधाद् रवेः ॥ १४९८ ॥

दिनश्रीदिनयोरासीद् दम्पत्योरवियुक्तयोः ।
लोकान्तरगतिरपि नैव शोच्या तथाविदाम् ॥ १४९९ ॥

तमसिन्धावपारेऽत्र नेत्रस्थितिनिबन्धनम् ।
दीपा द्वीपा इव क्ष्मायां बभु[4]र्न्नभसि तारकाः ॥ १५०० ॥

विधाय विधिना सान्ध्यविधिं मलयसुन्दरी ।
अहं च मठमूर्धन्यं शिश्रिये मणिकुट्टिमम् ॥ १५०१ ॥

ऊचे चतुरिका देवि त्वां चा[5]रायणकञ्चुकी ।
नाङ्गे तिलकमञ्जर्याः स्वास्थ्यमित्याह्वयत्ययम् ॥ १५०२ ॥

पृष्टा मलयसुन्दर्या शरीरास्वास्थ्यकारणम् ।
ऊचे चतुरिका सुभ्रु लेशोद्देशे न[6] वेद्म्यदः[7] ॥ १५०३ ॥

परे द्यवि व्यतीतेऽसावारुह्य वर[8]हस्तिनीम् ।
वृताऽनेकवयस्याभिः कौतुकादगमद् वने ॥ १५०४ ॥

आलुब्धासु समस्तासु स[9]खीषु वनशाखिषु[10] ।
यियासुः[11] कौतुकात् पद्भ्यां करेणोरुत्ततार सा ॥ १५०५ ॥

पुष्पाण्यवचिचायासावाकर्षन्ती मधुव्रतान् ।
श्वासैः श्रमधृतोल्लासैः कराब्जे यात[12]भीरिव ॥ १५०६ ॥

अधः प्रवालमुपरि पुष्प[13]मासीत् पराक्रमः ।
तस्यां करेण चिन्वन्त्यां समालोकि व्यतिक्रमः[14] ॥ १५०७ ॥

---

1. B लिखिगैः तं. 2. B कुमकुभं. 3. P दिनः°. 4. NK °भुन्न°. 5. NPK वारां°. 6. B ने. 7. B °म्यदा. 8. B वार°. 9. K शखी°. 10. NPB °शाषिषु; K °शोशिषु. 11. NPBK जियासुः. 12. NPK पात°. 13. B पुष्पा°. 14. P °क्रमा; N °क्रमाः.

अन्योन्यपुष्पलोभेन कृष्यमाणा पुनः पुनः ।
सहेलाऽऽगतवत्येलाकुञ्जं गुञ्जन्मधुव्रतम् ॥ १५०८ ॥

अथाञ्जनगिरेः शृङ्गं वज्राहतमिवाम्बरात् ।
अदृष्टपारे सरसि पपाताधोमुखः करी ॥ १५०९ ॥

तन्नि[1]र्घातेन भीताङ्गिगाढाक्रन्दोन्मदिष्णुना ।
तदा तिलकमञ्जर्याः सर्वा वित्रेसुरालयः[2] ॥ १५१० ॥

कश्चिन् मृग्य इवालीना लतावेश्मसु काश्चन ।
उद्धक्य इव संमीलन्नेत्रा[3] गिरिगुहान्तरे ॥ १५११ ॥

विभूषणविभाजालजङ्गमद्युतिमण्डला ।
अभवन्नन्धकारेऽपि निर्भया भर्तृदारिका ॥ १५१२ ॥

भ्राम्यन्त्येकाकिनी पुंसा दिव्यरूपेण केनचित् ।
दृश्येन भूत्वाऽदृश्येन भवतेयं कृतेदृशी ॥ १५१३ ॥

पश्यन्तीव स्वसर्वस्वं गतं[4] करतलादिव ।
आरुरोह सरःपाल्यां परिभ्रम्य तरौ तरौ ॥ १५१४ ॥

दिनान्ते चन्द्रलेखेव सखीभिः शुभदीप्तिभिः ।
परितः[5] परिवृत्याऽसौ निजसौधमनीयत ॥ १५१५ ॥

न पाञ्चालीषु नालीषु न नर्म्मसु न कर्म्मसु ।
न शीतेषु न गीतेषु तस्या रतिरजायत ॥ १५१६ ॥

अदृष्टपारं गन्तारमागन्तारं च तद्दिशः ।
सस्पृहं सा निशाम्यन्ती संलापयति केवलम् ॥ १५१७ ॥

इत्युक्ताऽब्रूत काञ्चीशसुताऽर्थेऽल्पल्पके सखि ।
गत्वा सम्प्रत्यकाले किमिति चा[6]रायणं वद ॥ १५१८ ॥

गत्वा तत्राधुना त्वं च चञ्च[7]त्पीयूषतुल्यवाक् ।
आश्वा[8]सय स्वसारं मद्वाचा तिलकमञ्जरीम् ॥ १५१९ ॥

मत्पित्रा पालितां[9]स्य भरतार्द्धधराभुजः ।
श्रीमेघवाहनस्यात्र[10] पुत्रः श्रीहरिवाहनः ॥ १५२० ॥

---

1. NPB तन्नि°. 2. B °लयाः. 3. P °न्नेता. 4. B गंत. 5. B drops परितः. 6. NPK वारा°. 7. B °त्पायूष°. 8. NPBK आस्वा°. 9. B °ताज्ञास्य. 10. B °स्यात्रा.

शस्त्रशास्त्रकलाभिज्ञः सर्वविज्ञशिखामणिः ।
अर्चयन्त्या जिनं मेऽद्य देवायतनमीयिवान् ॥१५२१ ॥

गाढाभ्यर्थनया तेन स्थापितेन मठे मया ।
समं संमतसंलापैर्नीतमद्य[1]तनं दिनम् ॥ १५२२ ॥

तेन त्वदन्तिकं नाहमागामागामिमङ्गले ।
तमेकाकिनम[2]तिथिं मुक्त्वा[3] याम्यधुना कथम् ॥ १५२३ ॥

अथोत्थाय मठप्राग्रभूमेर्मलयसुन्दरी ।
शिश्ये[4] भुवि द्वितीयायामहं [5]स्वस्रस्तरेऽभवम् ॥ १५२४ ॥

इमां चतुरिकाख्यातां चक्रसेनासुतादशाम् ।
स्वसन्तापप्रतीकारं कुर्वन्नेवमचिन्तयम् ॥ १५२५ ॥

या चित्रपटदृष्टाऽपि हृत्वा त्वामकरोन् मनः ।
आत्मानु[6]चरणाधीनजीवितं जीवितावधि ॥ १५२६ ॥

मुहुर्गन्धर्वकस्यापि मनश्चिरगतात्मनः ।
निद्राया इव पन्थानं यदर्थं च व्यलोकथाः ॥ १५२७ ॥

महतां रमणीयानां देशानां दर्शनैरपि ।
मनागपि मनस्तेन यद्दिदृक्षा तिरोदधे ॥ १५२८ ॥

अपहारमपीमेन बह्वज्ञासीर्यदाशया ।
अनुरूपं मनस्तस्य किञ्चिदेतद् विभाव्यते ॥ १५२९ ॥

पृष्टया न तथा दत्तं तदा किञ्चिद् यदुत्तरम् ।
तत् त्रपाया बहुत्वेन माहात्म्यमनुवर्तते ॥ १५३० ॥

अस्वास्थ्येन तदीयेन यदेवं मोदसे मनः ।
प्रादुःकरोषि दौर्जन्यं तदेवं नू[7]नमात्मनः ॥ १५३१ ॥

मनः प्रसन्नतामेहि धेहि धैर्यं तथाऽधुना ।
विदग्धानां न हास्यः स्यामद्यैतद्दर्शने यथा ॥ १५३२ ॥

इति चिन्तापरः सर्वां शर्वरीमत्यवाहयन् ।
तच्छेषे केनचित् पुंसा पठितं श्रुतवानहम् ॥ १५३३ ॥

---

1. B drops °द्यतनं दिनम्, and instead repeats the text from °खामणिः ...... upto °मीयिवान् of vs 1522 through scribal oversight. 2. B °मितिथिं. 3. NPBK मुक्ता. 4. B शिल्येश्ये. 5. NPB °श्रस्तरे°. 6. NP °तुचरणा°. 7. P नून°. 8. P तछेषे.

इन्दु[1]र्वैणिगिवाशासु विक्षिप्तं वसुसञ्चयम् ।
अयं सङ्कोचयत्याशु यियासुर्दूरवर्त्मनि ॥ १५३४ ॥

अपरां शिखरिशिखामारूढस्तारकेश्वरः ।
अयमाह्वयतीवोर्ध्वै[2]करस्ताराः क्वचिद्गमी ॥ १५३५ ॥

असौ श्यामा बिडालीन्दुबिम्बं म्रक्षणपिण्डवत् ।
यात्यादाय करैर्दण्डैस्ताड्यमानापि भास्वता ॥ १५३६ ॥

अन्धकारप्रकाशाभ्यां विमुक्तमधुना जगत् ।
आभाति पुण्यपापाभ्यामिवानन्दमयीभवत् ॥ १५३७ ॥

प्रियसङ्गः पुनर्भावीत्येवं निश्चितवत्यपि ।
कुमुद्वती वियोगेन भेजे विच्छायतां पराम् ॥ १५३८ ॥

दृगध्वानध्व[3]नीनेऽपि प्राप्त[4]मात्रे पियेऽब्जिनी ।
विकस्वरमुखाम्भोजा भजते श्रियमद्भुताम् ॥ १५३९ ॥

उत्थाय शयनाद् गत्वाऽदृष्टपारसरस्यथ ।
कृतप्रातःक्रियश्चैत्यमेत्य तीर्थेशमानमम् ॥ १५४० ॥

दोलामण्डपिकास्तम्भमवष्टभ्य कृतस्थितेः ।
पार्श्वे मलयसुन्दर्या न्यषदं जिनवेश्मनि ॥ १५४१ ॥

तत्र त्वरितमागत्य तदा चतुरिकाऽब्रवीत् ।
मत्कर्णे त्वद्गुणाकृष्टाऽऽयाता तिलकमञ्जरी ॥ १५४२ ॥

विमानद्युतिसन्तानसहस्रगुणितार्कभैः[5] ।
खेचरैर्व्योम्नि संरुद्धविरुद्धगतिभि[6]र्वृता ॥ १५४३ ॥

तदा छत्रेण सच्छा[7]या विनापि तपनातपम् ।
चमरैस्तन्यमानश्रीर्वीज्यमानैर्मुहुर्मुहुः ॥ १५४४ ॥

वेत्रिणीवर्गविहितालोकशब्दा पदे पदे ।
सहासवदनोल्लासनिवेशि[8]तसितद्युतिः ॥ १५४५ ॥

रूपसौभाग्यलावण्यलुप्तस्वःप्रमदामदा ।
तदाऽनुपदमेवाऽऽगात् तस्यास्तिलकमञ्जरी ॥ १५४६ ॥

---

1. B °र्वाणि. 2. NPK °वोर्द्ध°. 3. B °ध्वीनीने°. 4. B प्राप्ता°. 5. B °र्कभः. 6. B गतिभ°. 7. NP सच्छाया. 8. B निवेसित°.

पार्श्वे मलयसुन्दर्या निषसाद प्रसादभाक् ।
पुण्यक्रियायाः सविध इव सिद्धिः समीहिता ॥ १५४७ ॥

द्रविडेन्द्रसुताऽवादीद् अह्नैकेनापि कां दशा[1]म् ।
वत्से याताऽसि सन्तापग्लपितेव सरोजिनी ॥ १५४८ ॥

कथं ते सहसा बाधा जाता याता च तादृशी ।
श्लथीकृतान्यकार्याऽऽगाश्चैत्येऽद्य पात[2]रेव किम् ॥ १५४९ ॥

स्मित्वा मृगाङ्कलेखाऽऽख्यत् कुमारोऽयं सुधामयः ।
ख्यातं यं चतुरिकया श्रुत्वाऽऽसीद् देव्यवेदना ॥ १५५० ॥

पीयूषवृष्टिवद्दृष्टिं मय्यस्यन्तीं त्रपानताम्[3] ।
चक्रसेनसुतां वाचमूचे मलयसुन्दरी ॥ १५५१ ॥

भरतार्द्धैक[4]मघवन्मेघवाहननन्दनः ।
अयं कलाकलापैकसदनं हरिवाहनः ॥ १५५२ ॥

इति श्रुतव[5]ती रङ्गमूलं ताम्बूलमात्मनः ।
करेण मत्कराम्भोजे भृङ्गभङ्गी निनाय सा ॥ १५५३ ॥

मां काञ्चीशसुताऽवोचत् कुमार हरिणेक्षणा ।
पताकामाप विश्वेषु कलासु सकलास्वसौ ॥ १५५४ ॥

तदिमां नृत्तवादित्रगीतिरीतिस्वरादिषु ।
पृच्छ[6]न् विधेहि पीयूषरसपानं श्रुतेर्मम ॥ १५५५ ॥

अवदं धैर्यमालम्ब्य देवी तिलकमञ्जरी ।
जानाति मन्मनोमात्राममात्राप्तगुणाऽपि न ॥ १५५६ ॥

सामा[7]न्योऽपि जनो दत्ते नैवोत्तरमसंस्तुते ।
निसर्गेणैव निः[8]स्नेहो जनः किं पुनरीश्वरः ॥ १५५७ ॥

ततो यदा सुवेलाद्रिव्यावृत्ता गगनाध्वना ।
द्रष्टुं शक्रावतारादि देवी मत्पु[9]रमेष्यति ॥ १५५८ ॥

तदाऽर्थिताऽऽतिथेयायानुग्रहीष्यति मां यदि ।
देवीमदृष्टपूर्वोऽयमिति प्रोन्मीलदञ्जसा ॥ १५५९ ॥

---

1. NPK दशा. 2. B प्रातारव. 3. B °पानपानतां. 4. NP °र्द्धैक°. 5. B °वलीति. 6. NP पृछन्. 7. B समो°. 8. NPBK निस्नेहो. 9. B मनुत्पुर°.

तत्र प्रक्ष्या[1]मि नेदानीं विदेशं गन्तुमुत्सुकः ।
प्रष्टव्यमेतदेव क्व पुनर्दर्शनमावयोः ॥ १५६० ॥
इत्युक्त्वा [2]साऽतिगाम्भीर्यात् संस्मृत्यादत्तमुत्तरम् ।
स्वक्षूणं कूणिताक्षी मां पश्य[3]न्ती सहसोत्थिता ॥ १५६१ ॥
मठाग्रोर्वीमलङ्कर्त्रीं मद्दृष्टिस्पृष्टिगोचराम् ।
आरोहति स्म सा चन्द्रकान्तमण्डपिकां शनैः ॥ १५६२ ॥
अत्र दत्तपदोऽन्यत्र क्व यासीति वदन्त्यसौ ।
मामुद्दिश्य न्यधाद्[4] द्वारं पाचालीहृदि सादरम् ॥ १५६३ ॥
प्रौढेन्दुवदना बालामा[5]दाय परिवारतः ।
समालिलिङ्ग तस्यास्य चुम्बन्ती तरलेक्षणा ॥ १५६४ ॥
नरकिन्नरयुग्मानां मणिमूर्तिमतामपि ।
सनातनावियोगानां[6] दत्त्वा स्निग्धं भृशं दृशम् ॥ १५६५ ॥
प्रौढः कविरिवान्योक्त्या भावमाविर्विधाय सा[7] ।
पुनर्मलयसुन्दर्याः पार्श्वमाप मनस्विनी ॥ १५६६ ॥ युग्मम् ॥
निश्चलाऽपि तदाऽऽलीभिः प्रेर्यमाणाऽनिलैरिव ।
सा मुक्तना[8]गरा नौवत् स्थातुं गन्तुं च न क्षमा ॥ १५६७ ॥
युक्तं स्वामिनि गन्तुं न इत्युक्ता साऽऽलिभिर्मुहुः ।
व्यावृत्तवृन्तपद्माभं दधाना वदनं ययौ ॥ १५६८ ॥
मृगाङ्कलेखया सार्धं मन्दुरा वेत्रिणीवरा ।
व्यावृत्य मां च मलयसुन्दरी च मुदाऽवदत् ॥ १५६९ ॥
विज्ञापयति वां देवी मया तिलकमञ्जरी ।
गृहागत्याऽनु[9]गृह्याऽहं युवाभ्यामविकल्पितम् ॥ १५७० ॥
न विना यास्यति युवामालिभिः प्रेरिताऽप्यसौ ।
विस्फुरन्ती पताकेव[10] केवलं स्थास्यति प्रभो ॥ १५७१ ॥
इत्युक्त्वा पाणिनाऽऽदाय [11]पाणौ मलयसुन्दरीम् ।
समं तिलकमञ्जर्याऽऽरोपयन्मन्दुरावशाम् ॥ १५७२ ॥

---

1. Bप्रक्षामि. 2. B repeats सा°. 3. B °श्यांती. 4. NPBK न्यधाद्वारं. 5. B drops °मा°. 6. NPK °ना. 7. NPK सः. 8. B °तगेरा. 9. B drops °नु°. 10. B °लकेवलं. 11. B drops the text of this verse from °पाणौ... to the end, that of the next one from the beginning upto...... °विमानेऽन.

स्मयमानमुखाम्भोजा प्रमोदरसवाहिनी ।
मृगाङ्कलेखा विमानेऽनयन्मां पाणिवीचिभिः ॥ १५७३ ॥

क्षणेन दक्षिणश्रेणि[1]भूषणं रथनू[2]पुरम् ।
चक्रवालोत्तरपदं नगरं नभसाऽऽसदम् ॥ १५७४ ॥

पुरं पश्यन्नपारश्रीविशेषमनिमेषदृक् ।
तदाऽभवं विमानस्थः स्वर्गिभावमिवागतः ॥ १५७५ ॥

कन्यान्तःपुरसविधे[3] विधेरपि सुदुष्क[4]रे ।
सौधे मृगाङ्कलेखा मां मणिश्रेणिमयेऽमुचत् ॥ १५७६ ॥

वातायनगता सा मां प्रक्षालितपदा[5]ऽवदत् ।
दृष्टं कुमारसारश्रीमेदुरं भवता पुरम् ॥ १५७७ ॥

अवदं वाग्मिनि मया व्यालोकि सकलं पुरम् ।
महाशास्त्रमिव दृढबद्धपुस्तकदर्शनात् ॥ १५७८ ॥

[6]प्रदेशेषु [7]प्रदेशेषु वीक्षणं यद्यदृच्छ[8]या ।
अलक्ष्यैः सर्वलोकानां तन्मन्ये सर्वथेक्षण[9]म् ॥ १५७९ ॥

महाग्रहादिहानीता मया मलयसुन्दरी ।
इत्याख्यात् पत्रलेखाया मातुस्तिलकमञ्जरी ॥ १५८० ॥

विद्याबलेन बहुभिः कृतै रूपान्तरैरिव ।
देवी मां स्नपयामास विद्याधरवधू[10]जनैः ॥ १५८१ ॥

यशांसीवांशुकतया तदा परिणतानि माम् ।
धृतावदातभक्तीनि साऽलिभिः पर्यधापयत् ॥ १५८२ ॥

सुकृतश्रीरिवान्तः[11]स्था देवी व्यापिप्रति स्वयम् ।
रयाद् रसवतीमात्मानुचरीभिरकारयन् ॥ १५८३ ॥

बन्दिनीव मृदुशुके पञ्जरस्थे पठत्यथ ।
सा[12]रिकायां श्यालिकायामिव नर्मवचोभृति ॥ १५८४ ॥

मृगाङ्कलेखया भद्रासन आसीनया पुरः ।
प्रेर्यमाणाऽनुगवधू[13]क्रियमाणस्वकर्मणि ॥ १५८५ ॥

---

1. B drops °णि°. 2. B °भूपुरं. 3. B रविरिधे. 4. NPBK °दुःकरे. 5. B °दपदा°. 6. B प्रादे°. 7. B °प्रादे°. 8. NP °छया. 9. B °क्षरं. 10. B °वधूजेः. 11. NPBK °वांतस्था. 12. NPK °शारि°. 13. = maid-servant.

तालवृन्तानिलाचम्य मानधर्मपरिश्रमः ।
अकार्षं[1] भोजनं स्वर्णस्थाले काले सहानुगैः ॥ १५८६ ॥

रचिताच[2]मनं सिंहासनान्तरनिवेशिनम् ।
मामेत्य मन्दुराऽवोचत् वेत्रिण्यासूत्रिताञ्जलिः ॥ १५८७ ॥

चञ्चुचुम्बितविज्ञप्तिलेखः शुकजवी[3] जवी ।
समागतोऽस्ति लौहित्यनिकटात् कटकादिह ॥ १५८८ ॥

एकशृङ्गगिरेरेष प्रेषितः स्यादिहागतः ।
इत्यवेत्य मया मुञ्चेत्युक्ताऽमुञ्चदसौ शुकम् ॥ १५८९ ॥

जयशब्दं समुच्चार्य शुकस्तारस्वरेण मे ।
नम्रमूर्धा न्यधाल्ले[4]खमणि[5]मंह्रिसरोजयोः ॥ १५९० ॥

तदाऽभ्यागतदाक्षिण्यदक्षिणीकृतमानसः ।
अवोचं वाचमानन्दरसप्रसविनीं शुकम् ॥ १५९१ ॥

उपकारधियैव त्वामतिर्यग्योग्ययाऽनया ।
विहङ्गतां गतं हेतोर्विजानामि कुतश्चन ॥ १५९२ ॥

वस्त्रस्वर्णादिदानानां नोपयोगोऽधुना तव ।
अलङ्कृत्य ममोत्सङ्गं प्रीतिसङ्गं कृतार्थया ॥ १५९३ ॥

एवं वदन् कराब्जेन तमादाय विहङ्गमम् ।
न्यवेषयं निजोत्सङ्गे मनोरङ्गेण रङ्गितः[6] ॥ १५९४ ॥

तदा तिलकमञ्जर्याः सखी मामाह कुन्तला ।
अलक्ष्यस्य पुरं द्रष्टुमिच्छा[7] सख्या न्यबोधि ते ॥ १५९५ ॥

तदमुं प्रेषितं सख्या पटं प्रावृणु सादरम् ।
पश्यन्तोऽपि न पश्यन्ति यदावृतममर्त्यवत् ॥ १५९६ ॥

गतायाः क्रीडितुं पद्मह्रदे सख्याः[8] कदाचन ।
श्रीदेवी प्राभृतीकृत्य पटमेतमवोचत ॥ १५९७ ॥

विषशस्त्रशापगदास्तुदन्ति सविधेऽस्य न ।
रवेरिव तमस्तोमा निलोमार्था इवार्हतः ॥ १५९८ ॥

---

1. B अककार्षं. 2. B drops °च°. 3. = a young one of a parrot. 4. NPB °ल्लेष°. 5. NPBK °मलि°. 6. B रंगति. 7. NP °मिछा. 8. B सखा:.

इति श्रुत्वाऽहमादाय पटं प्रावृणवं च तम् ।
सहसा च मदुत्सङ्गान्निर्ययौ तरुणः पुमान् ॥ १५९९ ॥

विज्ञाय तं कुमारस्योत्सङ्गाद् गन्धर्वको द्रुतम् ।
निरगादिति तिलकमञ्जर्यां जगुरालयः ॥ १६०० ॥

गन्धर्वकः कथमभूदिति योऽशोचि सोऽस्त्यसौ ।
इति साश्चर्या मलयसुन्दर्या सह देव्यगात् ॥ १६०१ ॥

मद्दर्शितादरोदारतरसप्रसरत्रपा ।
विनीतचेटिकानीतविष्टरे निषसाद सा ॥ १६०२ ॥

चेटी सम्पादिताहारताम्बूलाभ[1]रणां शुकः ।
समं मलयसुन्दर्या देवीं गन्धर्वकोऽनमत् ॥ १६०३ ॥

अवदं पटरत्नेन त्वया दत्तेन देव्यहम् ।
अनुगृह्ये दर्शनतो मित्रं गन्धर्वकं मम ॥ १६०४ ॥

अयं पुरा कुमारेण किं दृष्ट इति पृच्छ[2]तीम् ।
देवीं काञ्चीन्द्रभूरूचे कुमारं पृच्छ[3] वेद्मि[4] न ॥ १६०५ ॥

ततोऽहमवदं देवि न केवलमयं मया ।
दृष्टा त्वमपि परमसुहृदोऽस्य प्रसादतः ॥ १६०६ ॥

इत्युदीर्य चित्रपटोदन्तं गन्धर्वकं जगौ ।
तदाऽगाश्चि[5]रमस्थाश्च[6] कथं चागा इहाधुना ॥ १६०७ ॥

इति पृष्टः सोऽनुभूतदुःखस्मरणसाश्रुदृक् ।
किं ब्रुवे[7] मन्दभाग्योऽहमिति निर्वेदवान् जगौ ॥ १६०८ ॥

तदानीमहमुत्पत्य मत्तकोकिलकाननात् ।
त्रिकूटमौलिमुकुटं खेचरेन्द्रपुरीमगाम् ॥ १६०९ ॥

देवं विचित्रवीर्यं च दृष्ट्वा रात्रावयाचिषि ।
पत्रलेखा समादिष्टं विमानं हारिचन्दनम् ॥ १६१० ॥

लेखं समरकेतोस्तं बद्ध्वा प्रावार[8]वाससि ।
प्रातर्गन्धर्वदत्ताया दर्शनश्रद्धयाऽचलम् ॥ १६११ ॥

---

1. B °रभर°. 2. NP पृच्छतीं. 3. NP पृछ. 4. B वेद्मनि. 5. N °गाश्चि°. 6. P °स्थाश्च. 7. B ब्रुमे. 8. B प्रावर्त.

उल्लङ्घिताब्धिः प्रशान्तवैराख्याश्रमसन्निधौ ।
श्रुत्वा रुदितमुदितकारुण्यः खाद् अवातरम् ॥ १६१२ ॥
तिमिर[1]द्रुतलासीनमतिदीनानन[2]च्छविम् ।
सिञ्चन्तीमश्रुधाराभिः श्वा[3]सदग्धमिवाधरम् ॥ १६१३ ॥
उद्बाष्पदृष्टिनोत्सृष्टप्राग्दृष्टौषधिकर्मणा ।
स्फुरत्तापतापसीनां निचयेनानुशोचिताम् ॥ १६१४ ॥
रुदतीं करुणारावैर्दैवोपालम्भगर्भितम् ।
वितारुण्यं स्त्रियं दृष्ट्वाऽपृच्छं रोदनकारणम् ॥ १६१५ ॥ विशेषकम् ॥
पादावादाय पाणिभ्यां सा मे क्षामेरितस्वरा ।
अवोचद् वत्स किं वच्मि मत्परित्राणमाचरेः ॥ १६१६ ॥
एकापत्यस्य कुसुमशेख[4]रस्येयमङ्गजा ।
कुक्षौ गन्धर्वदत्ताया जाता मलयसु[5]न्दरी ॥ १६१७ ॥
तेनारिविगृहीतेन मया सममसाविह ।
प्रहिताऽऽप्तजनस्यापि गुप्तमेवावनीभुजा ॥ १६१८ ॥
अप्रकाशितभूमीशकन्यकोचितचापला ।
आजन्ममुनिकन्येव स्थितेयन्ति दिनान्यसौ ॥ १६१९ ॥
स्मृतबन्धा[6] वशेवाद्य वैम[7]नस्यमुपेयुषी ।
दुष्टश्वा[8]पदमम्भोधिपारकान्तारमागम[9]त् ॥ १६२० ॥
पृष्ठ[10]तोऽहं समायाता पृच्छ[11]न्ती मामितस्ततः ।
चापलस्यापलापाय कु[12]त्सधीर्निरभर्त्सयम् ॥ १६२१ ॥
नौब्ज[13]न्निर्भर्त्सनाकष्टं सा पुष्टै[14]रपि सान्त्वनैः ।
दवदग्धधराकार्ष्ण्यमिव सिक्ताऽपि वारिभिः ॥ १६२२ ॥
भाग्योदयेन केनापि समयेऽत्र समागमः ।
इमामाश्वा[15]सयास्वस्थां पयोद इव मेदिनीम् ॥ १६२३ ॥
तथाभूतां च तां वीक्ष्य वीक्ष्यापन्नः प्रपन्नवान् ।
अहो कीदृक् कृतान्तस्य दुर्दान्तस्य विजृम्भितम् ॥ १६२४ ॥

---

1. = तिमिर + द्रु + तला°. 2. NPB °नानछविं. 3. NPBK स्वास°. 4. NPB °शेषर°. 5. B °स्युंदरी. 6. PB °वंध्या. 7. B वैमान°. 8. B °स्वापद°. 9. B °मागत्. 10. PB पृष्ट°. 11. NP पृछ°. 12. NPK तुत्स°. 13. NPB नोभ्म°. 14. B पुष्टो°. 15. PB °स्वास°.

प्रीणनायेष्टलेखेन यस्याः काङ्क्षीप्सिता मया ।
तामब्धितीरे कष्टाब्धिनक्रं वक्रो विधिर्व्यधात् ॥ १६२५ ॥

वपुर्मलयसुन्दर्या विभाव्येवं व्यभाषिषि ।
आर्ये विषेण निश्चेष्टा नासौ दुःखेन[1] वेदृम्यदः ॥ १६२६ ॥

सिद्धौषधिनिधावेकशृङ्गाद्रिवनगह्वरे ।
इमामाश्वासयाम्याशु रविरश्मिरिवाब्जिनी ॥ १६२७ ॥

आर्ययाऽहमनुज्ञाते न्यधां मलयसुन्दरीम् ।
विमाने नलिनीनालकल्पितानल्पतल्पके ॥ १६२८ ॥

अवदं चित्रमायं त्वमार्यामाश्वासयन्निह ।
तिष्ठेरिदानीमविषामिमां कृत्वाऽऽपताम्यहम् ॥ १६२९ ॥

गत्वा पश्चादयोध्यायां हरिवाहनरूपकम् ।
लिखित्वा सत्यवचना वाचां यावः स्वपत्तनम् ॥ १६३० ॥

अन्यथाचिन्तितार्थानामन्यथाकारदक्षया ।
कयाचिद् देवगत्या चेत् कालक्षेपो भवेन्मम ॥ १६३१ ॥

तत् केनचित् प्रपञ्चेन कुमारं हरिवाहनम् ।
रथनूपुरनगरं नयेरनुपलक्षितः ॥ १६३२ ॥

तत्र नीते कुमारे नौ कार्यसिद्धिर्गरीयसी ।
भवित्रीत्युक्त्वा[2]न् व्योम्नि विमानेनाचलं द्रुतम् ॥ १६३३ ॥

एकशृङ्गगिरेः[3] शृङ्गं विमानो गत एव सः ।
तस्थिवान् निश्चलीभूय कृतकृत्य इवाम्बरे ॥ १६३४ ॥

विमानस्खलने हेतुं पश्यन् श्या[4]मतमत्विषम् ।
एकं पुरुषमद्राक्षं वटशाखावलम्बिनम् ॥ १६३५ ॥

तस्यानुनयनायाहं कन्याकष्टं निवेद्य तम् ।
अवदं मुञ्च पुण्यात्मन् विमानं यातु मे द्रुत[5]म् ॥ १६३६ ॥

तस्मिन्नमुञ्चमाने तं विमानं पुरुषेऽवदम् ।
उद्भिन्नरोषशिखिनो धूमलेखासखं वचः ॥ १६३७ ॥

---

1. दुःखेण. 2. B. भवत्रीकृत्वा°. 3. B °गरिगिरेः. 4. NPBK °श्याम°. 5. B हृतं.

परमाधार्मिकः कोऽपि मलीमसवपुर्मनाः ।
भवांस्तेन स्त्रिया हत्याहेतुं कर्म करोत्यदः ॥ १६३८ ॥

स पुमानुपमातीतकोपेनापीतमार्दवाम् ।
वाचमाचष्ट विस्पष्टभृकुटिस्थपुटालिकः ॥ १६३९ ॥

अदृश्यां तिलकेनैतामपश्य[1]न् पतितोऽम्बुधौ ।
एतदिष्टो मया निन्ये स्वसैन्ये येन सत्वरम् ॥ १६४० ॥

इयं च कन्यकाऽम्भोधौ पतिता तमनु द्रुतम् ।
चक्रे येन निजावासं विलासरसलालसा ॥ १६४१ ॥

भुवनालङ्कृतेर्लक्ष्म्याः प्रतीहारपुरःसरम् ।
तं मां महोदरं ब्रूषे परमाधार्मिकं जडः ॥ १६४२ ॥

त्वं पुनः सिद्धगन्धर्ववन्दनीयजिनालयम् ।
विमानस्थो व्यति[2]क्रामन् ध्रुवं परमधार्मिकः ॥ १६४३ ॥

पक्षीभूतो यदि परं यासि व्योमाध्वनाऽधुना ।
शापप्रान्तश्च भावी ते मत्स्वामिन्याः प्रभावतः ॥ १६४४ ॥

इत्युक्त्वा तरसा क्षिप्य[3] तं विमानं विहायसि ।
अदृष्टपारे सरसि सहसैव मुमोच सः ॥ १६४५ ॥

निमज्ज्य तस्मिन्नुन्मग्नेऽपश्यं[4] स्वं शुकतां गतम् ।
विषदोषविनिर्मुक्तां तथा मलयसुन्दरीम् ॥ १६४६ ॥

मम दुःखेन मा दुःखं स्वजनानां भवत्विति ।
अनुक्तस्वस्वरूपोऽस्थां नमन्नार्चं सदा जिनम् ॥ १६४७ ॥

तदाऽऽदाय भवल्लेखमुपक[5]र्तुमना जनान् ।
गत्वा शिबिरं कमलगुप्तलेखाङ्क आगमम ॥ १६४८ ॥

इति गन्धर्वकेणोक्तेऽवदं देवि श्रियः पटात् ।
अस्याप शापः प्रशममद्रिताप इवाम्बुदात् ॥ १६४९ ॥

विमृश्याहं विशेषेण श्रावयन् द्रविडेन्द्रजाम् ।
किञ्चिन्न्यञ्चितमुल्लेखमवशेषमवाचयम् ॥ १६५० ॥

---

1. NPBK °पश्यन्°. 2. B वितिक्रामान्. 3. NPBK क्षिप्य°. 4. NPBK °पश्यं.
5. B °मुपकितु°.

स्वस्ति श्रीमदरण्यान्याः कोशलेन्द्रात्मजक्रमात् ।
सैन्यात् कमलगुप्तोऽयं नत्वा विज्ञपयत्यदः ॥ १६५१ ॥

पुण्यभाजा यदादिष्टमनादिष्टं च युक्तिमत् ।
तत्करिष्यामि किन्त्वेकं दुष्प्र[1]तीकारमस्ति मे ॥ १६५२ ॥

युवराट् समरकेतुर्निर्हेतुप्रतिबन्धवान् ।
ज्ञात्वा कुमारवृत्तान्तं यत्किञ्चन करिष्यति ॥ १६५३ ॥

तदा मदास्यकालुष्यमालोक्य चकिता हृदि ।
विज्ञाय मदभिप्रायमूचे मलयसुन्दरी ॥ १६५४ ॥

खेचरेशसुतेऽनेन लेखेन विमनस्कताम् ।
नीतः कामं कुमारोऽयं यियासुः शिबिरं निजम् ॥ १६५५ ॥

परं दाक्षिण्यशीलत्वान्न त्वामाप्रष्टुमीश्वरः ।
तदेनमनुमन्यस्व गन्तुमेष्यत्यसौ द्रुतम् ॥ १६५६ ॥

अनेन विमनस्केन[2] स्थितेनापि न ते फलम् ।
त्वत्स्वाजन्यमिहास्याभूत् प्रतिभूर्द्रुतमागतौ ॥ १६५७ ॥

एवं मलयसुन्दर्या निर्देशमतिलङ्घितुम् ।
कातरा तरलाक्षी मामनुमेने कथञ्चन ॥ १६५८ ॥

कुमारमानयेः शीघ्रमिति तद्वचनाञ्चि[3]तः ।
चित्रमायस्तदादेशान्मां विमाने न्यवीविशत् ॥ १६५९ ॥

स्थानाद् यस्मादिमेनाहं हृतस्तत्रागमं क्षणात् ।
इति विश्रान्तये किञ्चिद् विमानं धृतवानहम् ॥ १६६० ॥

वन्य[4]द्विपावृतं वैरियमदण्डाभिधं द्विपम् ।
तत्रालोक्या[5]वदं चित्रमायं चित्रं सखे श्रुणु ॥ १६६१ ॥

खे जातयानशक्तिर्योऽपजह्रे मां मतङ्गजः ।
सरःपातेन सञ्जातमृत्युरित्यनुशोचितः ॥ १६६२ ॥

स मेऽत्र नेत्रविषये कलभीकेलिलालितः ।
हर्षपूर्णमनःस्थाले नालिकेरत्वमश्नुते ॥ १६६३ ॥

---

1. NPBK दुःपती°. 2. B drops °न स्थि°. 3. B °नांचितिः. 4. P वन्प°. 5. NPBK °क्यवदं.

चित्रमायो हसन्नाह त्वद्व[1]र्तोऽन्यो भविष्यति ।
न मनुष्यगजस्य स्यात् शक्तिराकाशगामिनी ॥ १६६४ ॥

अयं त्वद्गज एवेति तद्वाचाऽपि विनिश्चितम् ।
न्यासन्यस्तमिवादाय तं सायं[2]समयेऽगमम् ॥ १६६५ ॥

पताकाभुजमुद्यम्य प्रवृत्त इव संमदात् ।
स्कन्धावार इवापारधने स्वसदनेऽगमम् ॥ १६६६ ॥

नवेन्दुमिव मां[3] द्रष्टुमुत्कण्ठोत्कण्ठया जनः ।
अगादेकपदेऽनेकविधमङ्गलमञ्जुलम् ॥ १६६७ ॥

[4]तं विसृज्याशु शय्यास्थं निद्रा भेजे चिरेण माम् ।
खेचरेन्द्रपुरीपुत्रीरूपगौरवचिन्तया ॥ १६६८ ॥

प्रातः सभामुपासीनान् अदीनानन्दमभ्य[5]धाम् ।
युवराट् समरकेतुः कथमेत्यधुनाऽपि न ॥ १६६९ ॥

निःश्वा[6]सचुम्बितादर्शतुलाधृतमुखेन्दुषु ।
सदस्येषु सदो नेत्रीकृतो वेत्रीदमूचिवान् ॥ १६७० ॥

ज्ञात्वा कुमार कौबेरीं भवन्तं युवराड् गतम् ।
तस्या एव निशीथिन्या निशीथे छन्नमन्वगात् ॥ १६७१ ॥

प्राग्ज्योतिषेश्वरभ्राता चात्र मित्रधरश्वरैः ।
अचीकथदवस्थाप्यमानोऽपि युवराड् मया ॥ १६७२ ॥

अद्वितीयो न त[7]न्वैवातनुप्रेमभरेण च ।
कुमारमन्वगाद् भाग्यवन्तमर्थ इवेप्सितः ॥ १६७३ ॥

तच्छ्रु[8]त्वाऽहमरण्यानीं भ्रमंस्त्वामीक्षितुं मुहुः ।
क्वाप्यनासादयंश्चित्रमायेनेदमभाषिषि ॥ १६७४ ॥

प्रैषीत् त्वया समं सा मां त्वामानेतुमतिद्रुतम् ।
अनयंस्त्वां तथा चक्रसेनसूर्द्रेष्यति ध्रुवम् ॥ १६७५ ॥

तत् कुमार द्रुतं यावो युवराजमहं क्वचित् ।
पुनरालोकयिष्यामीत्यूचिवांसं तमब्रुवम् ॥ १६७६ ॥

---

1. NPBK त्वद्दर्तां°. 2. NPBK सायस°. 3. B सांमां. 4. B वितं. 5. B repeats °भ्य:°. 6. NPBK निश्वा°. 7. NPBK तत्वै°. 8. B तद्ब्रु°.

सखे सुखयितुं देवी मे हि नाहं तु तद्विना ।
आस्यं मलयसुन्दर्याः स्वं दर्शयितुमीश्वरः ॥ १६७७ ॥

वदेर्मलयसुन्दर्या वृत्तान्तं वाचिकं च मे ।
कुर्याः कल्याणि नोऽङ्गस्य निराबाधतया तपः ॥ १६७८ ॥

स्वार्थस्य निष्ठतामेकामाकलय्य यथा न मे ।
प्रकुप्यतितमां देवी तथा नि[1]त्यं प्रसादयेः ॥ १६७९ ॥

न कुमारः किमायातीत्यनिवृत्तिनिवृत्तये ।
द्रुतं गच्छ तयोः पार्श्वमिति पाणौ विधृत्य तम् ॥ १६८० ॥

सुदुर्मनायमानं तं गन्तुं प्रेमनियन्त्रितम् ।
प्रत्याय्य युक्तिभिश्चित्रमायं प्रहितवान् बलात् ॥ १६८१ ॥

प्रविवेश पुमानीदृगरण्येऽत्रेति नृश्रु[2]तेः ।
तत्रावासितसैन्यान् नॄ[3]न् प्रेषयं तं गवेषितुम् ॥ १६८२ ॥

न तमापुः पुमांसस्ते भ्रमन्तोऽपि यतस्ततः ।
कान्तारे तत्र संसारे यथाऽभव्याः सुदर्शनम् ॥ १६८३ ॥

भीष्मग्रीष्मार्दित इव वनभूमावितस्ततः ।
शिबिराद् बहिरभ्राम्यमग्राम्यैः कैश्चिदावृतः ॥ १६८४ ॥

पुरः पुरमिवाकस्मादाविर्भूय पदाब्जयोः ।
गन्धर्वकं नतिपरं कण्ठपीठे मुदाऽऽश्लिषम् ॥ १६८५ ॥

लतावितानसच्छा[4]यशिलासीनं तमभ्यधाम् ।
इहागते मयि तदा किं चक्रे चक्रसेनजा ॥ १६८६ ॥

स व्याकरोद् कुमारेन्दुवियुक्तां भर्तृदारिकाम् ।
रजनीमिव विच्छा[5]यामूचे मलयसुन्दरी ॥ १६८७ ॥

अशर्मघातकृद्धर्मसिद्धिहेतुनिकेतने ।
एकशृङ्गगिरौ गन्तुमनुमन्यस्व मां स्वसः ॥ १६८८ ॥

मुखं मलयसुन्दर्या विच्छा[6]यन्त्यात्मदर्शवत् ।
निः[7]श्वासैरायतोल्लासैरूचे तिलकमञ्जरी ॥ १६८९ ॥

---

1. NPBK निन्यं. 2. B नृणुते. 3. NPBK नृन्. 4. NP °सछाय°. 5. NP विछाया°. 6. NP विछाय°. 7. NPBK निश्वासै°.

किमिह स्नातुमम्भांसि क्रीडासिन्धुषु सन्ति न ।
पारणायां प्रवीणानि नोद्यानेषु फलानि वा ॥ १६९० ॥

चित्तचापलरोधीनि देवतायतनानि न[1] ।
मन्त्रजापविधिर्येषु स्याद् भवत्या निरत्ययः ॥ १६९१ ॥

येन[2] वन्यफलास्वादसङ्क्रान्ता स्नेहतेव माम् ।
एवंविधां विमुच्यार्या तत्र गोत्रे यियासति ॥ १६९२ ॥

इति निर्बन्धवाग्वृष्टिपुष्टां प्रेमतरङ्गिणीम् ।
असमर्थाऽतिक्रमितुं तस्थौ मलयसुन्दरी ॥ १६९३ ॥

कुमारं मद्गिरा प्रैषीदेषैषा मद्गिरा स्थिता ।
इत्यन्योन्यानुवृत्त्यैव प्रवर्तेते क्रियासु ते ॥ १६९४ ॥

मुञ्च प्रमादितां बाले कला काले स्वसात् कुरु ।
आयातेन कुमारेण पृष्टा दत्से किमुत्तरम् ॥ १६९५ ॥

एवं मलयसुन्दर्या देवी रहसि शिक्षिता[3] ।
व्यधाद् वीणागुणनिकां निकाममवधानिनी ॥ १६९६ ॥

एतदेतत् कुमारोऽत्र[4] प्रदेशे व्यधितेति सा ।
तस्थौ कदापि पश्यन्ती हर्षह्रदनिमग्नदृक् ॥ १६९७ ॥

मद्रूपचित्रमालोक्य कुमारोऽब्रूत किं तदा ।
कदाचिदिति मां जल्पन्त्यनल्पामगमन्मुदम् ॥ १६९८ ॥

कदाचिच्चन्द्रशालास्था नगरालोकनच्छलात् ।
त्वदागमस्य पन्थानं सा पश्यन्त्यनयद् दिनम् ॥ १६९९ ॥

आयातश्चित्रमायोऽद्य तवादेशादनागमे ।
हेतुं मलयसुन्दर्या पृष्टः कथितवानिति ॥ १७०० ॥

वैरिद्विपघटासिंहसिंह[5]लेश्वरनन्दनः ।
श्रीमान् समरकेतुर्यद्भुजासेतुर्मृधाम्बुधौ ॥ १७०१ ॥

प्रविवेश कुमारस्यान्वेषणाय महाटवी ।
शौर्यनिर्जित[6]कीनाशश्वापदोल्लासकारणम् ॥ १७०२ ॥

---

1. B त. 2. B drops °न. 3. B शक्षिता. 4. B °त्रेचप्र. 5. B drops °सिंह°. 6. B °नर्जित°.

कुमारः परमात्मानमिवाम्लानमुदःपदम् ।
निवर्त्स्यति न योगीव तमनालोक्य कर्हिचित् ॥ १७०३ ॥

तदाकर्ण्य वदन्ती हा सुभग स्वमिवासुखे ।
न्यधाः कुमारमित्यूहे मोहं मलयसुन्दरी ॥ १७०४ ॥

चन्दनस्यन्दशिशिरैः करैः कैरविणीमिव ।
तामाश्वा[1]स्येन्दुलेखेव बभाषे खेचरेन्द्रभूः ॥ १७०५ ॥

स्वसः समाश्वा[2]सयितुं किल त्वां सविधे व्यधाम् ।
त्वमेवाश्वा[3]सनीया भूः कथं[4] शम धुने[5]ऽधुना ॥ १७०६ ॥

सिंहलेन्द्रभूरार्यायाः पुरा परिचितः स किम् ।
यद् दुःखमति[6]दुःखाकृत् कृते दक्षगुणस्मृतेः ॥ १७०७ ॥

कुमारेन्दोरिवार्यायाः किमसावेककारणम् ।
ईदृशस्य महारण्यप्रयासस्य समं ततः ॥ १७०८ ॥

न वेद्मी[7]त्युक्तिप्रत्युक्तप्रश्नाऽऽह द्रवेडेन्द्रभूः ।
कियत्कालमरण्यानीं हा[8] कुमार क्रमिष्यति ॥ १७०९ ॥

गूढप्ररूढहासाऽऽह खेचरेन्दुसुता स्वसः ।
मा खेदीरेकशङ्काद्रावानेष्ये हरिवाहनम् ॥ १७१० ॥

इह स्थितः सुखेनैव निजाज्ञाकरखेचरः ।
सर्वत्र मित्रमालोक्य समानेष्यति सन्निधौ ॥ १७११ ॥

तन्मे विमानमादाय विद्याधरसहस्रयुक् ।
त्वं गन्धर्वक गच्छेति देवी मामादिशद् द्रुतम् ॥ १७१२ ॥

तच्चित्रमायनिर्दिश्यमानाध्वाऽहमिहागमम् ।
विमानं मामनु प्राप्तमारोह त्वमिह प्रभो ॥ १७१३ ॥

तन्मुखेनागतं देव्या निर्देशमनुपालयन् ।
आरुह्य सपरीवारो विमानं वियताऽचलम् ॥ १७१४ ॥

शैलं[9] क्रमात्तमासाद्या[10]दृष्टपारस्य रोधसि ।
प्रदत्तावासः खचरांस्त्वामन्वेष्टुमतत्वरम् ॥ १७१५ ॥

---

1. PNBK °मास्वास्ये°. 2. PNBK °मास्वास°. 3. PNBK °स्वास°. 4. PN कमं. 5. P. धुनो°. 6. NK °मतिः°. 7. B वोम्नी°. 8. NK हां; P हाः. 9. B सैलं. 10. PNBK °साद्य°.

देवीप्राभृतसन्तुष्टस्त्वदनागमदुखितः[1] ।
मधुलिप्तासिधाराग्रलेढे[2]वास्थां चिरं गिरौ ॥ १७१६ ॥

हारं चन्द्रातपं बालारुणाख्यं चा[3]ङ्गुलीयकम् ।
पुरो धृत्वाऽवदच्छ[4]ङ्खपाणिः कोशाधिपोऽन्यदा ॥ १७१७ ॥

देव द्व[5]यमिदं देवः प्राहिणोत् कोशलेश्वरः ।
दुरितानां निरोधाय स्कन्धावारगतस्य ते ॥ १७१८ ॥

आभ्यां भूरिप्रभावाभ्यां भवदङ्गमलङ्कृतम् ।
आभातु पुष्पदन्ताभ्यामिव विश्वमुदंशुमत् ॥ १७१९ ॥

हारेऽत्र चिराद् दृष्टे सुहृ[6]दीव ममाक्षिणी ।
सहसैव कृताश्लेषे दुर्विश्लेषे बभूवतुः ॥ १७२० ॥

मम दृष्टिश्चकोरीव प्राप्तं चन्द्रातपं चिरात् ।
नाहमक्षुधिता मोक्तुं न च भुक्तरसालसा ॥ १७२१ ॥

आदाय हारमवदमस्य गन्धकार्हति ।
देव्या एव ध्रुवं कण्ठः स्वर्णं जात्य[7]मणेरिव ॥ १७२२ ॥

ततस्तिलकमञ्जर्या हारं बालारुणं त्विमम् ।
दातुं मलयसुन्दर्याः प्रोक्तो गन्धर्वकोऽव्रजत् ॥ १७२३ ॥

प्रातर्गन्धर्वकाध्वानं पश्यन्नन्येद्युरम्बरे ।
आगच्छन्तीं चतुरिकामदर्शमुदितत्वराम् ॥ १७२४ ॥

सा मे प्रणम्य तिलकमञ्जर्या लिखि[8]ताक्षरम् ।
अर्पयामास लिखितमुन्मुद्र्याहमवाचयम् ॥ १७२५ ॥

स्वस्त्येकशृङ्गशैलाग्रे चरणान् हारिवाहनान् ।
विज्ञापयति दुर्वारदुःखा तिलकमञ्जरी ॥ १७२६ ॥

मया कुमारहारोऽयं[9] गलेऽधारीति रोषतः ।
किल त्वत्सङ्गमेच्छा मां निरुरोध बलादपि ॥ १७२७ ॥

तथापि त्वदधीनासुरिहस्था तीर्थगाऽपि वा ।
जीवन्त्यहं त्वया नैव विस्मार्या हृदयादिति ॥ १७२८ ॥

1. B °दुःस्थितः; PNK °दुःखितं. 2. PNBK °लेटे°. 3. N वांगु°. 4. PN °दछंख°. 5. B द्वियं°. 6. B सुरदी°. 7. B जायस्य°. 8. B तिलखि°. 9. B°द्धं.

तद्वा[1]चनेन सञ्जातवज्रपात इवातुरः ।
विमू्र्च्छि[2]त इवाबोधं नान्तरं सुखदुःखयोः ॥ १७२९ ॥

ऋते देवीं च मित्रं च जीवितं मे निरर्थकम् ।
विना क्रियां च ज्ञानं च व्रतादानमिवाङ्गिनः ॥ १७३० ॥

इति ध्यायंश्चतुरिकां विसृज्यालक्षितो जनैः ।
शरीरतः शरीरीव[3] शिबिरान्नि[4]रगामहम् ॥ १७३१ ॥

अव्रजं विजयार्धाद्रिपादं दुःश्वा[5]पदास्पदम् ।
कर्तुकामः कामितार्थकृति तीर्थभुवि क्वचित् ॥ १७३२ ॥

तत्र लावण्यलहरीपरीतवदनाम्बुजाम् ।
प्रेमैकसिन्धुं धावित्वा लगतां[6] पादयोः प्रियाम् ॥ १७३३ ॥

विगणय्य मुहुर्यान्तमेकं नृपकुमारकम् ।
दृष्ट्वोद्धुतकृपालुस्तस्वकदुःखस्तमब्रुवम ॥ १७३४ ॥ युग्मकम् ॥

कथमेकाकिनीं बालां स्नेहशीलां[7] वनान्तरे ।
त्यक्त्वा भद्र व्रजस्येवमिति पृष्टो जगाद सः ॥ १७३५ ॥

शिशोरेवाहरद् वैरी राज्यं मे भोज्यवद् विकः ।
प्रहीतुमसमर्थोऽहमार्य[8] जीवन् करोमि किम् ॥ १७३६ ॥

इति संहारनाम्न्य[9]त्र प्रपाते पित्सुमुत्सुका ।
पूर्वं पिपतिषुर्युष्मद्वधूरेवं रुणद्धि[10] माम् ॥ १७३७ ॥

अवदं स्ववधं कार्षीर्मा स्त्रीवधनिबन्धनम् ।
राज्यं गृहाण मे भद्र तुभ्यं[11] यच्छामि[12] सत्वरम् ॥ १७३८ ॥

स स्माह तव तद् राज्यमस्त्वार्य सुचिरं स्थिरम् ।
मम प्राक्पुरुषायातं विद्याजातं[13] प्रसाधय ॥ १७३९ ॥

एतत्सा[14]हायकेनाहं पश्चाद्दाहं ददद् द्विषाम् ।
अलङ्कुर्वे निजं राज्यं त्वत्प्रसादतरोः फलम् ॥ १७४० ॥

ओमित्युक्तवते मह्यं स विद्याः सविधीर्जगौ ।
गुहागृहं च तस्याद्रेरर्केन्दुद्यु[15]त्यगोचरम् ॥ १७४१ ॥

---

1. NPK °वावने°. 2. NP °मूर्छित. 3. B drops °री°. 4. NP °न्नर°. 5. NPBK दुस्वा°. 6. B लगतीयपाद°. 7. NPBK °शालां. 8. B °हर्यामा. 9. B °म्नत्र. 10. NPK °णद्धि. 11. B त्वंभ्यं. 12. NP °छामि. 13. NPBK °नातं. 14. B पतश्चाद्दा°. 15. NPK °त्यल°.

प्राविशं सिद्धये तस्मिन् सोऽभूद् उत्तरसाधकः ।
पूर्वप्रतिष्ठि[1]ता विद्यादेवताः पर्यपूजयम् ॥ १७४२ ॥

इन्द्रियाणि तदा तस्थुः सत्त्व[2]मात्रेण मत्पुरे ।
अव्यापृतानि कार्येषु पदभ्रष्टनियोगिवत् ॥ १७४३ ॥

बद्धपद्मासनः पाणौ दक्षिणे जपमालिकाम् ।
कलयन् कर्तुमारेमे मन्त्रजापमपापधीः ॥ १७४४ ॥

केलिप्रियतया[3] तेनुरुपसर्गान् निशाचराः ।
जपस्याफलताहेतून् प्रतिवातान् कृषेरिव ॥ १७४५ ॥

के[4]चित् खेचररूपेण देवताराधने रताः ।
कामधेनुं विकाराणां तेनुः सङ्गीतमन्वहम् ॥ १७४६ ॥

त्वामाह्वयति वात्सल्यकोशः कोशलपार्थिवः ।
जल्पन्त इति केऽप्याप्तरूपेण लिखितं ददुः ॥ १७४७ ॥

उपघातान् जपविधेर्निर्घातान् केऽपि चक्रि[5]रे ।
वीराणामपि चित्रेषु प्रतिभीवासलग्नका[6]न् ॥ १७४८ ॥

सन्नधाः केऽपि युद्धाय करास्फोटपराः पुरः ।
सिंहनादान् व्यधुर्धैर्यप्रवाहपटहस्वनान् ॥ १७४९ ॥

प्रत्यूहैरेव सविधां विद्यासिद्धिं विचिन्तयन् ।
सहकारपरीपाकमिव धर्मविजृम्भितैः ॥ १७५० ॥

षण्मासान्तर्गुहागेहगर्भतो निरगां न हि ।
यथा तथा मम मनः स्वान्तः[7]स्थध्ये[8]यमध्यतः ॥ १७५१ ॥

मन्त्रध्यानविधौ पूर्णेऽस्यन्ती स्वप्रभया तमः ।
दीपिकेवाविरभवद् एका सुरवधूः पुरः ॥ १७५२ ॥

साऽब्रूत भूतलाभूत[9]पूर्वसत्त्व[10]वशीकृताः ।
विद्यादेव्यः प्रियं तेऽष्टौ रोहिण्याद्याः सृजन्तु किम् ॥ १७५३ ॥

अवदं सुहृदा विप्रयुक्तस्य प्रियया तया ।
त्यक्तस्य वा निमित्तं मे प्रियमेव समस्ति न ॥ १७५४ ॥

---

1. NPBK °ष्ठिता°. 2. NPBK सत्व°. 3. B drops °तया. 4. B किंचि. 5. B चक्रे. 6. B °लग्नवान्. 7. NPK °वांतस्थ°. 8. B °यध्ये°. 9. B °तभूतभू°. 10. NPBK °सत्व°.

स्वयमेव करिष्ये तद् यच्चाभीष्टं समस्ति मे ।
परं पुंसोऽस्य कुर्वन्तु देवता देवि वाञ्छितम् ॥ १७५५ ॥

मृत्योः प्रत्यूहमादत्त कर्तुमिष्टस्य तत्क्षणम् ।
एतदर्थं मया देवि देवताः परितोषिताः ॥ १७५६ ॥

अवादीद् देवताऽन्यार्थमीदृक् कष्टं सहेत कः ।
विना भवन्तमन्यार्थकृतस्वार्थमतिर्न यः ॥ १७५७ ॥

परमाराधकं मुक्त्वा[1] न यान्ति पुरुषान्तरम् ।
देव्यः श्रिय इव कृतैरपरोधशतैरपि ॥ १७५८ ॥

यदर्थं खेचरश्चायं विद्याः प्रासाधयत् त्वया[2] ।
तमेकाग्रमना जागद्रुपकारमते शृणु ॥ १७५९ ॥

इहास्ति वैताढ्यगिरावुत्तरश्रेणिभूषणम् ।
पुरं स्वश्रीजितस्वर्गप्रभं गगनवल्लभम् ॥ १७६० ॥

श्रीमान् विक्रमबाहुस्तदन्वशात् श्रियमात्मसात् ।
यश्चक्रेऽपेक्षितात्मीयबाहुसाहाय्यके रणे ॥ १७६१ ॥

श्रियः[3] छन्दानुवृत्त्येव यस्य पुण्यात्मनोऽन्वहम् ।
प्रावर्तन्त जीनाधीशचैत्यबिम्बार्चनादिषु ॥ १७६२ ॥

भास्वानपि प्रयात्यस्तं त्यज्यन्तेऽब्जान्यपि श्रिया ।
जगत्तमोभिर्मलिनं भवत्येव दिनात्यये ॥ १७६३ ॥

इत्याकर्ण्यान्य[4]दा बन्दिवृन्दात् खेचरचक्र्यसौ ।
भोगापभोगेषु नीरागः प्रपेदे सुगुरोर्व्रतम् ॥ १७६४ ॥

राज्ञोऽपुत्रस्य राज्येऽर्हं पुरुषं द्रष्टुमु[5]त्सुकः ।
सचिवः शाक्यबुध्याख्यः स्वबन्धुममुमब्रवीत् ॥ १७६५ ॥

त्वमनङ्गरते गच्छेरेकशृङ्गाख्यशृङ्गिणि ।
एकः कालोचितमतिप्रदिष्टोपयिकप्रभुः ॥ १७६६ ॥

तत्रास्त्यावासितस्कन्धावारो मित्रदिदृक्षया ।
मेघवाहनभूमीन्दुनन्दनो हरिवाहनः ॥ १७६७ ॥

---

1. NPBK मुक्ता. 2. B त्वाया. 3. N drops the visarga; K श्रियच्छ°. 4. B °स्यदा.
5. NBK °मुत्सु°.

प्रार्थनां प्राग्भवाभ्यासान्नापार्थां स करिष्यति ।
कुरु केनाप्युपायेन तं विद्याराधनोद्यतम् ॥ १७६८ ॥

सिद्धविद्यं च तं मौलिमिव माणिक्यमण्डितम् ।
कुर्वे खेचरमूर्धन्यमभिषिच्य नृपासने ॥ १७६९ ॥

अस्ति निश्चितमेवैतदष्टापदनगेऽधुना ।
मुनिवृन्दमुपास्याप्ताद् वीरसेननभश्चरात् ॥ १७७० ॥

ततोऽनङ्गरतिर्गच्छ[1]न् दृष्ट्वाऽभिमुखमागतम् ।
साधयामास विद्यास्त्वां जयन्तीजल्पकल्पनात् ॥ १७७१ ॥

विहायैकोपकारित्वकार्पण्यं तन् महाशय ।
विद्यादेवीमम[2]न्देनोपकुर्या जगदप्यदः ॥ १७७२ ॥

राज्यस्वीकरणेनाशु शाक्यबुद्धेर्मनोरथान् ।
अपायं चानङ्गरतेः सतेजाः सफलीकुरु ॥ १७७३ ॥

अधिष्ठित[3]प्रतिष्ठं त्वामत्र मित्रकलत्रयोः ।
विरहोऽपि स्वयं भीत इव त्यक्ष्यति दूरतः ॥ १७७४ ॥

इत्युक्त्वा[4]ऽस्यामदृश्यायां सत्यां सूर्यद्युताविव ।
समीयुः खेचरक्ष्मापवारास्तारा[5] इवाम्बरे ॥ १७७५ ॥

सान्धकारं गुहागारं प्रविश्य प्रश्रयाश्रयाः ।
विमानं विमनस्कं मामध्यारोप्याम्बरेऽचलन् ॥ १७७६ ॥

वैताढ्यस्यैव शिखरे नीत्वा मां चण्डगह्वरे ।
उत्तरश्रेणिसाम्राज्येऽभ्यषिंचंस्ते ससम्मदा ॥ १७७७ ॥

ते मां सिंहासनासीनं सच्छ[6]त्रचमरध्वजम् ।
उच्चरन्तो ज्यध्वानमानमन्नमितौजसम् ॥ १७७८ ॥

मन्त्रिणं लग्नमाख्यान्तं प्रवेष्टुं निकटं पुरे ।
अपृच्छं[7] चक्रसेनस्य सङ्कथा काऽपि बुध्यते ॥ १७७९ ॥

वेत्र्याख्यद् दक्षिणश्रेणेर्दारकोऽस्त्यधुनाऽऽगतः ।
द्वारि दौवारिकै रुद्धः स विज्ञास्यति तत्कथाम् ॥ १७८० ॥

---

1. NP °च्छिन्. 2. NPBK °मन्वेनो°. 3. B °ष्ठिति°. 4. NPBK °क्त्का. 5. B. °स्तोरा.
6. NP सछत्र°. 7. NP °पृछं.

हस्तसंस्पृष्टतत्पृष्ठः[1] प्ररुदन्तं निरुध्य तम् ।
आसने विनिवेश्याहमपृच्छं[2] सङ्कथामिति ॥ १७८१ ॥

दर्शनेन त्वदीयेनाविदं तिलकमञ्जरी ।
जीवत्येव परं किं किं तदाद्यासीदिदं वद ॥ १७८२ ॥

ऊचे गन्धर्वको देव त्वदादेशात् तदा गतः ।
द्वयोर्भर्तृदारिकयोरर्पयं भूषणद्वयम् ॥ १७८३ ॥

क्षिप्त्वा कराङ्गुलावङ्गुलीयं मलयसुन्दरी ।
प्रकामं विमनस्काऽऽसीत् स्मृ[3]तविन्ध्येव सिन्धुरी ॥ १७८४ ॥

असन्तृप्तदृशाऽऽलोक्य हारं तिलकमञ्जरी ।
स्वकण्ठकन्दलेऽपत्यमिव प्री[4]त्या न्यलीलगत् ॥ १७८५ ॥

चन्द्रातपेन तेनाशु स्पृष्टा कमलिनीव सा ।
प्रम्लानीमास्यकमले कलयामास कामपि ॥ १७८६ ॥

अयं हारः कुमारस्य कुत्रासीत् करगोचरः ।
इति पृष्टः सन् देव्याऽहं साहङ्कारमभाणिषम् ॥ १७८७ ॥

शक्रावतारचैत्यान्तर्मेघवाहनभूभुजे ।
हारं दत्ते स्म सौधर्मनिलयो ज्वलनप्रभः ॥ १७८८ ॥

तदाकर्ण्य क्षणं मूर्च्छां साऽ[5]नुभूयात्तचेतना ।
पृष्टा किमिदमित्याप्तैर्न्यश्व[6]सीदेव केवलम् ॥ १७८९ ॥

द्वितीयेऽहनि निर्बन्धाद् रु[7]ध्यमानाऽपि बन्धुभिः ।
सा [8]तीर्थसार्थमुद्दीश्य निर्जगाम स्वधामतः ॥ १७९० ॥

नाभेयोऽस्यान्तिके स्थाष्णुर्भर्ताऽभूत् केवलश्रियः ।
इतीव निवृतिर्यत्र वव्रे तं सुचिरादपि ॥ १७९१ ॥

यत्रानेकप्रदेशानां रम्यताक्षिप्तमानसम् ।
विमोहं वञ्चयित्वेव मुनयो निर्वृतिं ययुः ॥ १७९२ ॥

यत्र रत्न[9]मयं चैत्यं चक्रे भरत[10]चक्रभृत् ।
समेति शमिनीं यत्र चकिता स्पृहणीयताम् ॥ १७९३ ॥

---

1. NPBK °स्पृष्टः. 2. NP °पृछं. 3. B स्मृति°. 4. B प्रात्या. 5. B सीद्र°. 6. NPBK °न्यीस्वसी°. 7. B °धारुध्य°. 8. B सात्ती°. 9. P रत्र°. 10. B repeats °चक्रेभरत°.

यथास्ववर्णमानाढ्या तस्मिन्नष्टापदेऽर्हतः ।
ऋषभाद् वर्धमानान्तान् देवान् देवी ननाम सा ॥ १७९४ ॥

रूपेणाप्रतिरूपेणार्चानां[1] भक्तिभरेण च ।
पुरोऽनिमेषनयना देवी देवीव तस्थुषी ॥ १७९५ ॥

चैत्यमण्डपमासीनमुपासीननभश्वरान् ।
प्रीणन्तं[2] धर्मवचनैः कृतसंसारवञ्चनैः ॥ १७९६ ॥

असमीपापरद्वीपादागतं तीर्थयात्रया ।
ववन्दे साऽवधिज्ञानमेदुरं खेचरं मुनिम् ॥ १७९७ ॥

तस्यामन्तर्विषण्णायां निषण्णायां पुरो मुनिम् ।
पप्रच्छानच्छ[3]वात्सल्यं वीरसेन[4]नभश्वरः ॥ १७९८ ॥

किमेषा पुरुषद्वेषं धत्ते तिलकमञ्जरी ।
सुप्रौढिमधिरूढाऽपि राज[5]नीतिरिवानये ॥ १७९९ ॥

त्यक्तान्यभूषणाद्यैषा द्यौरिवापास्ततारका ।
बभार हारमेवैकं कथं भानुमिव प्रगे ॥ १८०० ॥

इत्यादि वीरसेनेन पृष्टः पीयूषपारणाम् ।
सुहृदां विदधानः स्ववाचं वाचंयमो जगौ ॥ १८०१ ॥

नीचो[6]च्चादिगतौ जन्तुर्यात्यमुक्तो यथा मणिः ।
अप्राप्तदेवतामूर्तिः पादहस्ताद्यलङ्कृतौ ॥ १८०२ ॥

ततः सौधर्मेन्द्रचमूनेता जेता सुरद्रुहाम् ।
लीलावतंसविमानवासी वासवसन्निभः ॥ १८०३ ॥

चमरादिरणोपात्तपरमः परमार्हतः ।
अभूत् तेजःपराभूतद्युप्रभ्रुर्ज्वलनप्रभः ॥ १८०४ ॥

स्वर्वधूविभ्रमाम्भोजभृङ्गः सोऽर्णवसंमितम् ।
नाबुधज्जातमप्यायुर्यातं नौस्थ इवार्णवे ॥ १८०५ ॥

प्रतापमन्दतामुच्चैश्चिह्नैश्च्यवनमात्मनः ।
अन्यदाऽबुधदासन्नं सायाह्ने द्युमणेरिव ॥ १८०६ ॥

---

1. NP °णाचा°; K °णार्ची°. 2. NPBK प्रीणंत. 3. NP °नछ्वा°. 4. NPK वारसेन°; B चारसेन. 5. B राजी. 6. B °चोचा°.

न भावी सुलभोऽमुत्र बोधिर्भोगरसस्य मे ।
इति ध्यात्वा हृदारूढविवेकद्रुफलोपमम् ॥ १८०७ ॥

दुःखहेतुमनाख्याय कस्यचिच्च्य[1]वनं निजम् ।
उत्पत्यालक्षितः क्वापि स रसेन्द्र[2] इवाव्रजत् ॥ १८०८ ॥

प्रियङ्गुसुन्दरी तस्य प्रिया प्रष्ठा[3] तदादिना ।
अत्यार्ताऽभूद् वियोगेन बन्धनेनेव हस्तिनी ॥ १८०९ ॥

भर्तुर्मित्रस्य यातस्य दीपमन्यं सुमालिनः ।
देव्या प्रियंवदया साऽन्विता हृदयभूतया ॥ १८१० ॥

प्रियं पश्यन्त्यपि जम्बूद्वीपं मेरोस्तु पूर्वतः ।
विजये पुष्करावत्यां जयन्तं जिनमानमत् ॥ १८११ ॥

भर्त्रा योगः क्व मेऽस्याश्च सख्या भावी भवान्तरे ।
धर्मेण च कथमिति तया पृष्टो जगौ जिनः ॥ १८१२ ॥

जम्बूद्वीपभरतस्य कर्णोत्तंसाविव श्रियः ।
एकशृङ्गरत्नकूटौ तिष्ठतः पर्वतोत्तमौ ॥ १८१३ ॥

क्रमात्तत्रेष्टयोगो वां[4] भावी धर्मस्य सङ्क्रमः ।
दिव्याभरणवीक्षा[5]भिर्जातिस्मृत्या भविष्यति ॥ १८१४ ॥

इदं विदित्वा सद्योऽपि ज्वलनप्रभवल्लभा ।
वैताढ्यं दक्षिणेनागादेकशृङ्गं गिरीश्वरम् ॥ १८१५ ॥

मनोरमाख्यकल्पोर्वीरुहखण्डेन मण्डितम् ।
नाभेयायतनं तत्र दिव्यशक्त्या चकार सा ॥ १८१६ ॥

पूजयन्त्या जिनं दुःखं न कदापि भवेदि[6]ति ।
सत्यीकर्तुमिवैषाऽस्थात् तदा दुःखपराङ्मु[7]खी ॥ १८१७ ॥

प्रियंवदा त्वगाधाब्धौ रत्नकूटमहीभृतः ।
पारिजातवृते शृङ्गे कण्टच्छिन्ने महीयसि ॥ १८१८ ॥

विधाय श्रीमहावीरचैत्यं रत्नशिलामयम् ।
काङ्क्षन्ती दर्शनं भर्तुस्तस्थौ तत्रातिदुःस्थिता ॥ १८१९ युग्मम् ॥

---

1. B °च्छ्पव°. 2. = Quicksilver, mercury. 3. NPBK प्रष्टा. 4. NPBK वा. 5. NPBK वीक्ष्या. 6. B भावेदेति. 7. NP पराङ्मुखी.

कृतस्यादृष्टपारस्य सरसोऽनुदवृष्टिभिः ।
पूर्यमाणस्य तीरस्था ज्वलनप्रभवल्लभा ॥ १८२० ॥

लक्ष्मीं कदाचिदायान्तीं विमानमधि तस्थुषीम् ।
दृष्वाऽवोचद् उपालम्भप[1]रिरम्भपरं वचः ॥ १८२१ ॥

पद्मे किं मां विपद्मग्नां मन्यमानाऽवमन्यसे ।
सायाह्न इव पद्मालिं न पश्यसि दृशाऽपि यत् ॥ १८२२ ॥

अलपत् कमला माऽऽलि कालिमानं निधा हृदि ।
त्वत्सख्या वाचिकं वक्तुं तवैवान्तिकमापतम् ॥ १८२३ ॥

मां नन्दीश्वरयात्रायां व्यावृत्तां लवणोदधौ ।
रत्नकूटेऽवदत् खिन्ना परिवारा प्रियंवदा ॥ १८२४ ॥

स्वसुः प्रियङ्गुसुन्दर्याः सख्या मे वचनं वदेः[2] ।
अप्रमाणं ममाभाग्याद् अर्हतोऽप्यभवद् वचः ॥ १८२५ ॥

चिरेणापि भवद्भर्तुर्भ्राता तावत् स नागतः ।
गतप्रायं च मेऽस्त्यायुर्दीपेऽस्नेहे यथा महः ॥ १८२६ ॥

जाता स्मर्तव्यशेषाऽहमार्हते मत्कृते गृहे ।
पुण्यपुञ्ज इवैतस्मिन् कुर्याः सस्वामितामिति ॥ १८२७ ॥

प्रियङ्गुसुन्दरी सख्याः श्रुत्वा सन्देशमन्ति[3]मम् ।
उदश्रुरगदत् पद्मे दृष्टाऽऽलेः[4] स्वैरवादिता ॥ १८२८ ॥

सा देवायतने स्वस्य सस्वामित्वं मयेच्छ[5]ति ।
न जानात्येतदीयेऽपि क इदानीं[6] करिष्यति ॥ १८२९ ॥

रक्षार्थमर्थयेऽन्यं कं गतः कालः[7] स मे सुराः ।
प्रत्यैषु[8]र्यत्रापतितामाज्ञां शेषामिवाशु मे ॥ १८३० ॥

इत्युदित्वाऽऽत्तमौ[9]नायां तस्याः श्रीः सौहृदेरिता ।
आदिदेशायतनयो रक्षणाय महोदरम् ॥ १८३१ ॥

तामापृच्छ्यासमाद श्रीः स्वप्रसादमसौ तदा ।
भर्तर्यसङ्गतेऽप्यर्हद्गिरा रागं मुमोच न ॥ १८३२ ॥

---

1. B drops °प°. 2. B वदे. 3. B °मैतितं. 4. B °ले. 5. NP °येछति. 6. NPBK °नी. 7. B कालाः. 8. B प्रास्ये°. 9. B °मोना°.

अहद्वचसि वैरस्यात् किञ्चिदेषा भवान्तरे ।
दुःखिनी भाविनीत्युच्चैः सा शुशोच प्रियंवदाम् ॥ १८३३ ॥

सैकाग्रमनसाऽन्येद्युराराध्यन्त्यादिमं जिनम् ।
च्युत्वाऽभूत् खेचरेन्द्रस्य सुता तिलकमञ्जरी ॥ १८३४ ॥

असौ पूर्वभवाभ्यासादासादितकलागुणा ।
प्राप्तपावित्र्यनैर्मल्यगङ्गेव[1] स्वर्गवासतः ॥ १८३५ ॥

प्राक्प्रेम्णा कृतसंख्या या एत्यपद्महृदा श्रिया ।
अस्याः कन्यास्वसम्भाव्यमभूत् प्राभवमीदृशः ॥ १८३६ ॥

अयान्त्यन्यनरे प्रीतिं दृढप्रेमा स्वभर्तरि ।
इयं निराकुला कालमेतावन्तमवस्थिता ॥ १८३७ ॥

अतीतेऽह्नि स्वहारेक्षाजातजातिस्मृतिस्त्वसौ ।
भर्त्रा सहानुभूतं स्वसुखं स्मृत्वाऽऽकुलाऽभवत् ॥ १८३८ ॥

जातारतिर्गृहे स्थातुमक्षमा क्षणमप्यसौ ।
तीर्थयात्रापदेशेन स्वं विनोदयितुं ययौ ॥ १८३९ ॥

स्वकण्ठे न्यासि मत्कण्ठात् प्रियेणायं स्वपाणिना ।
इति हारं तमेवासौ मन्यमाना सहानयत् ॥ १८४० ॥

वृत्तान्तः कस्तदाद्यासीज्ज्वलनप्रभनाकिनः ।
इत्यसौ वीरसेनेनाचष्टे पृष्टः[2] पुनर्मुनिः ॥ १८४१ ॥

अयोध्यामण्डने शक्रावतारे जातसङ्गते ।
मेघवाहनभूभर्तुरमुं हारं समर्प्य सः ॥ १८४२ ॥

नन्दीश्वरवरोदन्वद्वेलाशैलपुरःस्थितम् ।
आसन्नन्तं सुरस्त्रीषु मित्रमूचे सुमालिनम् ॥ १८४३ ॥ युग्मम् ॥

नीराग[3]ता महत्त्वा[4]य जन्मिनां न सरागता ।
रविरुच्चैस्त्यजन् रागं याति नीचैर्भजन् पुनः ॥ १८४४ ॥

सम्यग्दर्शनशून्यस्य स[5]हृदोऽपि शरीरिणः ।
चेष्टमानस्य पतनं दुर्लभस्य भवावटे ॥ १८४५ ॥

1. B गंगेव. 2. B °ष्टः पृष्टः. 3. B त्वरागं. 4. NPBK °त्वाय. 5. B drops स°.

सम्यक्त्वे मुक्तिसाम्राज्यहेतावव्यभिचारिणि ।
मित्रमेवमनिष्क[1]म्पमकरोज्ज्वलनप्रभः ॥ १८४६ ॥
सोऽर्चन्नन्दीश्वरद्वीपे प्रतिमाः शाश्वतार्हताम् ।
अर्हतां सप्ततिशतं ववन्दे भरतादिषु ॥ १८४७ ॥
सिद्धायतनबिम्बानि शाश्वताशाश्वतानि सः ।
पूजयन्नर्जयामासात्मनश्चरमदेहताम् ॥ १८४८ ॥
ग्रुतश्च्युतः सुतः सोऽभून्मेघवाहनभूभुजः ।
मत्प्रोक्तजप्तमन्त्रस्य कुमारो हरिवाहनः ॥ १८४९ ॥
मनो मलयसुन्दर्या मुनिः प्रीणयितुं जगौ ।
नापेक्षन्तेऽर्थनामब्दा इव विश्वोपकारिणः ॥ १८५० ॥
मित्रस्य वचसा त्रस्यदन्तःकरणचापलः ।
सुमाली धर्ममेवैकमारराध विगाधधीः ॥ १८५१ ॥
अहेतुत्वेन विरतेर्देवत्वायापि सोऽकुपत् ।
निवृतेरनिमित्तत्वादिव चक्रः शशि[2]विषे ॥ १८५२ ॥
स्वस्य त्यागिषु सश्रद्धान् सेवकेषु च निःस्पृहान् ।
विपरीतान् स विषयानविनीतानिवामुचत् ॥ १८५३ ॥
स धर्मध्यानधीश्च्युत्वा चन्द्रकेतुनृपात्मजः ।
बभूव समरकेतुनामा कामाधिकद्युतिः ॥ १८५४ ॥
इत्याकर्ण्य निरुद्वेगसंवेगरससागराः ।
मुनिं विनम्य पार्षद्या ययुः सुरनभश्चराः ॥ १८५५ ॥
अमन्दनिचितानन्दधारिके भर्तृदारिके ।
अभातामपवरिके इव दीपप्रभाभृते ॥ १८५६ ॥
परिच्छद[3]कृतावासान् गत्वा तिलकमञ्जरी ।
आत्मार्थकल्पितान्नाद्यैर्मुनीन्दुं प्रत्यलम्भयत् ॥ १८५७ ॥
रचिताहृतिमन्नाद्यैर्देवीं तिलकमञ्जरीम् ।
समुपात्तफलाहारा प्राचे मलयसुन्दरी ॥ १८५८ ॥
नमन्ती जिनबिम्बानि कृतान्यात्मीयपूर्वजैः ।
तिष्ठासुः किं गृहेऽन्यान्यस्थानस्थान्यथ यास्यसि ॥ १८५९ ॥ युग्मम् ॥

---

1. NPBK निःकम्प. 2. NPBK शिशि°. 3. NP °रिछद° ; B drops °द°.

एवमुक्त्वा तया यावद् ब्रूते किमपि सोत्तरम् ।
समेत्य[1] वेत्रिणी तावद् दावतीत्रं व्यजिज्ञपत् ॥ १८६० ॥
यः प्रस्थानक्षणे मोक्तुं कुमारं शिबिरे त्वया ।
प्रेषितः सोऽस्ति विच्छायश्चित्रमायः समागतः ॥ १८६१ ॥
स तयाऽऽकारितोऽवादीद् एकशृङ्गगिरावगाम् ।
भवे[2] पित्सुरिवार्हन्तं न कुमारं व्यलोकयम् ॥ १८६२ ॥
तं द्रष्टुं खेचरान् प्र[3]ष्टुं जातकं गणकानि च ।
व्यापार्य विज्ञपयितुं देवीमहमिहागमम् ॥ १८६३ ॥
इति श्रुत्वा क्षिपन्तीं तां विलक्षं चक्षुराननं ।
समुद्भूतप्रभूतार्तिरूचे मलयसुन्दरी ॥ १८६४ ॥
आत्मवैरिणि चक्रे किमविचारितकारिणि ।
सन्दिशत्या महात्माऽयमनर्थे पातितस्त्वया ॥ १८६५ ॥
व्यावृत्तस्व निवृत्ता ते तीर्थयात्रा सुदुर्लभम् ।
तम[4]न्वेषय गत्वाऽऽशु कराद् रत्नमिव च्युतम् ॥ १८६६ ॥
ततो देव्यत्यनिष्ठा[5]नां निः[6]श्वासानां विजृम्भणैः ।
अभ्यस्यन्तीव स्वप्राणप्रयाणकपरिश्रमम् ॥ १८६७ ॥
पर्याकुलं पताकाभिश्चिन्तामिरिव मानसम् ।
मणिमयं समारुह्य विमानमचलद् द्रुतम् ॥ १८६८ ॥
प्रदेशानेकशृङ्गस्य सा क्रमेणाक्रमेण च ।
पस्पर्श पुद्गलप[7]रावर्तं कर्तुमना[8] इव ॥ १८६९ ॥
न निर्वृतिकरीमाप कुमारस्याभिधामपि ।
जीव[9]श्रेणिरिवाभव्या भगवद्धर्मकर्मणः ॥ १८७० ॥ युग्मम् ॥
मठे मलयसुन्दर्या तामततीत्यतमा प्रगे ।
कुमारं द्रष्टुमादिष्टपूर्वः सन्दीपकोऽवदत् ॥ १८७१ ॥
पृष्टोऽब्रूत निषादो मां विजयार्धगिरेर्भृगौ ।
सर्वकामिक एकाकी कुमारो गतवानिति ॥ १८७२ ॥
वार्तया विषमय्येव तयाऽऽकर्णितमात्रया ।
मूर्च्छन्मूर्च्छा कुमारीयं निपपात रसातले ॥ १८७३ ॥

---

1. B °त्ये. 2. B भावपि°. 3. NPBK °राम्रष्टुं. 4. B तिम°. 5. NPBK °निश्वानां.
6. NPBK निस्वासा°. 7. B पुद्गल एव. 8. B °माना. 9. NPBK जाव°.

स[1]खीशोकतरुर्मूलैरश्रुभिर्व्याप भूतलम् ।
तदाऽम[2]न्दतमाक्रन्दशाखाभिः पुनरम्बरम् ॥ १८७४ ॥

स्फुरद्दिव्यदिवाब्दाली लब्धसंज्ञा क्षणेन सा ।
आली[3]राश्वासयामास स[4]न्तापश्लथिताशया ॥ १८७५ ॥

सखीस्वास्थाय सा स्वास्थ्यं बभारात्मनि कृत्रिमम् ।
गर्भागारे प्रकाशाय प्रकाशमिव दर्पणः ॥ १८७६ ॥

स्नात्वा सुदर्शनं गत्वा नत्वा भक्त्याऽऽदिमं जिनम् ।
आनर्च भ्रमरहितैः पुष्पैः श्लोकैर्नुनाव[5] च ॥ १८७७ ॥

त्वया सुस्वामिना त्यक्त इत्यस्मादपि कः परः ।
रागस्यास्य[6] परित्यागहेतुरस्तु सचेतसाम् ॥ १८७८ ॥

त्वमेव देव दुःखानां रक्षणस्य च वेदिता ।
विज्ञानवान् भिषगिव व्याधीनामौषधस्य च ॥ १८७९ ॥

क्षेत्रज्ञ इव संज्ञायाः कृतपुण्य इव श्रियः ।
त्वमेव शरणं भूया नाभेयान्यभवेऽपि मे ॥ १८८० ॥

इति स्तुत्वा जिनं बन्धु[7]निर्बन्धमवमत्य च ।
युक्ता मलयसुन्दर्या दर्या दुःखतमस्ततेः ॥ १८८१ ॥

अनुयाता वयस्याभिः साक्रन्दाभिर्मुमूर्षुभिः ।
वर्त्मनाऽदृष्टपारस्य मर्तुकामा चचाल सा ॥ १८८२ ॥ युग्मम् ॥

अथानुगमुखज्ञातसुतामृत्युप्रवृत्तिना ।
प्रेषितः खेचरेन्द्रेण सुमुखः प्राप चित्रराट् ॥ १८८३ ॥

स पृष्ठस्थापितानेकवेत्री[8] प्राह कृताञ्जलिः ।
देवी त्वां मन्मुखेनेदं याचते जनकस्तव ॥ १८८४ ॥

त्वां पूर्वभवभर्तारं कुमारमनुगामिनीम् ।
वत्सां नैव निषेधामि पयोदमिव विद्युतम् ॥ १८८५ ॥

परं शुभनिमित्तेन तं जीवन्तमवैम्यहम् ।
अदृश्यमपि कन्दर्पं चेष्टितेनाङ्गिनां हृदि ॥ १८८६ ॥

---

1. K शखी°. 2. NPBK °संद°. 3. NPBK आलाराश्वा°. 4. B संसंताप°. 5. B °नाषव. 6. B drops °स्य. 7. B drops °बन्धुनि°. 8. NK °वेत्रा.

षण्मासावधिमाधायान्वेष्टुं[1] तं खेचराश्वराः ।
मनोरथा इवाशासु सर्वासु प्रहिता मया ॥ १८८७ ॥

आमानुषोत्तरगिरिं यावद् गत्वाऽऽपतन्ति ते[2] ।
वत्सोत्सुकाऽपि[3] तावन्तं कालमत्र विलम्बताम् ॥ १८८८ ॥

ताताज्ञा मेऽर्गलेवाभूद् इतः सुदुरतिक्रमा ।
मनो दुनोति सन्तापश्चेतःशिखिशिखासखः ॥ १८८९ ॥

इति सांशुकसञ्छन्नवदना कृतरोदना ।
मठे मलयसुन्दर्या ताताज्ञातत्परा स्थिता ॥ १८९० ॥

असौ शोकभरोत्सेकपरा जातज्वराऽऽतु[4]रा ।
तस्मिन्नहनि जग्राहाहारमुक्ताऽपि नालिभिः ॥ १८९१ ॥

द्वितीयेऽह्न्याह भुञ्जाना सा हास्याद् द्रविडेन्द्रजाम् ।
सङ्ख्यं वा नेयवृत्त्या[5] वामबैवाव्यभिचार्यभूत् ॥ १८९२ ॥

असावम्बुजिनीमह्नि निशायां तु कुमुद्वतीम् ।
निर्निद्रनेत्रयुगलाऽनुचकार महाशया ॥ १८९३ ॥

तत्तनौ प्रतिरोधाय क्रियमाणं सखीजनैः ।
तापस्याप तदा हारे जलार्द्रा चन्दनादिकम् ॥ १८९४ ॥

पल्योपमेन सैकैकदिवसेनात्यवाहयत् ।
षण्मासानेकदिवसेनोन्नानन्यूनसाहसा ॥ १८९५ ॥

तदद्य दुःश्रवा यावद् देवीवार्तां शृणोमि न ।
हन्तुं स्वं तावदगमं शिखरं सार्वकामिकम् ॥ १८९६ ॥

त्वत्खेचरैस्ततः पितुर्जीवरक्षानियोगिभिः ।
नियन्त्र्यात्र समानीय देवस्यास्मि प्रदर्शितः ॥ १८९७ ॥

स्वदर्शनैस्ततो देवीं देव सञ्जीवय द्रुतम् ।
परिक्लान्तां जलधरः शफरीमिव वर्षणैः ॥ १८९८ ॥

एतदाकर्ण्य सञ्जातजातिस्मृतिरहं रयात् ।
प्रियङ्गुसुन्दरीप्रेम्णा प्रकामं तरलोऽभवम् ॥ १८९९ ॥

---

1. B °त्वेष्टुतां. 2. B त. 3. B °काऽप. 4. B °नुरा. 5. NPBK °इत्या.

गन्धर्वकाय नेपथ्यमङ्गल्यं ददद् द्व[1]यम् ।
आरुह्य खेचरैः सार्धमेकशृङ्गगिरावगाम् ॥ १९०० ॥

नत्वा नाभेयमाभाष्य मठे मलयसुन्दरीम् ।
पार्श्वे गन्धर्वकं तस्य निदधे परिचारकम् ॥ १९०१ ॥

गत्वा वनान्तरे[2]ऽद्राक्षं देवीं क्षामवपुर्लताम् ।
कदलीदलशय्यायामिन्दुलेखा[3]मिवाम्बरे ॥ १९०२ ॥

अभ्युत्थातुं निःसहाङ्गीं चेष्टमानामभाषिषि[4] ।
दशयाऽपि त्वयाऽदर्शि प्रसादोऽमुं च संभ्रमम् ॥ १९०३ ॥

ससंभ्रमभ्र[5]मद्विद्याधरीलोकविलोकितः ।
देवीदापितस्फटिकसिंहासनमुपाविशम् ॥ १९०४ ॥

देवि सर्वोत्तरश्रेणिस्वाम्य[6]लाभेन वर्धसे ।
कुमारस्येति कोऽप्याह कुमारीं खेचरेश्वरः ॥ १९०५ ॥

अत्रान्तरे त्वमायासि[7] गन्धर्वकसखः सुखम् ।
प्रौढीकुर्वन् वृषारूढः शशी चैकादशं गृहम् ॥ १९०६ ॥

एवं हस्त्य[8]पहारादेराख्याति हरिवाहने ।
स्वोदन्तमन्वमोदन्त खचरा युवराट् न तु ॥ १९०७ ॥

तमसंज्ञमिव स्थास्नु[9]मतिम्लास्नु[10]मुखत्विषम् ।
प्रेक्ष्य प्रेक्षात्रतां मुख्यो नाक्षुभ्यत् हरिवाहनः ॥ १९०८ ॥

प्राग्जातिस्मृतिरस्यासीदित्यवेत्यावदत् स तम्[11] ।
मित्राधुना सुरभवं किं समुह्य विमुह्यसि ॥ १९०९ ॥

सुखसम्पन्निधानेषु विमानेषु दिवौकसाम् ।
स्वयंप्रभादिबा[12]लासु शालासु ललितश्रियाम् ॥ १९१० ॥

दीपेषु सुरदीप्रेषु शैलेषु मणिशालिषु ।
आरामेष्वभिरामेषु सुस्वादुषु[13] सुरद्रुषु ॥ १९११ ॥

अलङ्कारेषु सारेषु सुधापीतिषु गीतिषु ।
नैषोऽनुभूयमानेषु साक्षादेषु मुमोहयः ॥ १९१२ ॥ विशेषकम् ॥

---

1. NPBK ददद्वयं 2. PB °नांतर°. 3. PB °लेषा°. 4. B omits the final °षि.
5. P °मङ्क्रम°. 6. B °स्वास्वा°. 7. NPK °यासी. 8. P °स्त्या°. 9. NPBK °स्थाष्णु°.
10. NPBK °म्लाष्णु. 11. NPBK तः. 12. NPBK °वाला°. 13. B °षुःसुषु.

प्रियंवदा प्रियेदानीं जाता मलयसुन्दरी ।
दीव्याभरणवीक्षा[1]भिः सा जाता प्राग्भवस्मृतिः ॥ १९१३ ॥

गत्वा सत्वरमात्मीयदर्शनेन सुखीकुरु ।
अनन्यशरणा[2]मेनां रविरम्भोजिनीमिव ॥ १९१४ ॥

जगादाङ्गपतिः प्राच्यचलप्रेमविसंस्थु[3]लः ।
स्वास्थ्यं दर्शयितुं तस्या नाधुना प्रभवाम्यहम् ॥ १९१५ ॥

परं विद्याधरं कञ्चित् परिप्रेष्य मदागमम् ।
कथयंस्तां भवानेव परिप्रीणातु सत्वरम् ॥ १९१६ ॥

एत्य वेत्रिण्यथाजल्पत् पुमान् कल्याणकाभिधः ।
विचित्रवीर्यदेवस्य विज्ञीप्सु[4]स्त्वामिहागमत् ॥ १९१७ ॥

प्रसीदास्य तदेकान्तप्रदानेन न[5]योदधे ।
इत्युक्ते युवराजादिजनो दूरेऽभवत् स्वयम् ॥ १९१८ ॥

अपातयत् प्रणम्यायं पुरो लेखं क्षितिक्षितः ।
दुर्मन्त्रिणमिवापेतमुद्रं स तमवाचयत् ॥ १९१९ ॥

स्वस्ति त्रिकूटाद् विचित्रवीर्यदेवः ससंभ्रमम् ।
वैताढ्याद्रौ कुशलिनं[6] ब्रूते श्रीहरिवाहनम् ॥ १९२० ॥

ह्यस्तनेऽह्नि मयाऽनायि वत्सा मलयसुन्दरी ।
स्वसद्मनि विवाहाय सकलः स्वजनोऽपि च ॥ १९२१ ॥

वरत्वेन व्यवस्था[7]प्य चन्द्रकेतुसुतस्ततः ।
प्रेषणीयो यथाऽस्माकं परा प्रीतिर्भवेदिति ॥ १९२२ ॥

युवराजमिहायातमात्रं देवोऽबुधत् कथम् ।
समारभत चोद्वाहमत्युत्सुकतया कथम् ॥ १९२३ ॥

इत्यादि विस्मयवता हरिवाहनभूभुजा ।
पृष्टः समस्तवृत्तान्तकल्यः[8] कल्याणकोऽकथत् ॥ १९२४ ॥

प्रवेष्टुं पुरि[9] पूर्वेद्युर्देवे चैत्यवनाद् गते[10] ।
जगाम धामनि निजे देवी तिलकमञ्जरी ॥ १९२५ ॥

---

1. NPBK °वीक्ष्याभिः. 2. B °शरणी°. 3. NPBK °स्थुलः. 4. NPK विज्ञीषु°; B विज्ञीषुस्त्वा°. 5. B drops न°. 6. NK °लितं°. 7. NPK °स्थाप्य. 8. NPBK °कल्पः. 9. NP °व्युरि. 10. NK drop गते.

प्रस्तुते खचरेन्द्रेण विवाहमयमङ्गले ।
मृगाङ्कलेखा न्यगदत् पत्रलेखां नृपप्रियाम् ॥ १९२६ ॥

कुमारो न्यगदद् भर्तृदारिकायाः पुरो वरम् ।
प्राप्तं मलयसुन्दर्याः कुमारं चन्द्रकेतुजम् ॥ १९२७ ॥

स्पर्धयेव द्वितीयेन समकालं समीयुषा ।
महोत्सवेन तद् देवीभागिनेयाः प्रवर्धसे ॥ १९२८ ॥

पत्रलेखा महादेवी चित्रलेखामभाषत ।
सखि कल्याणलाभोऽभूत् कल्याणान्तरलाभदः ॥ १९२९ ॥

मुक्तवल्कामलङ्कारवतीं मलयसुन्दरीम् ।
इहानय यथोद्वाहद्वयं कुर्वीमहि स्वयम् ॥ १९३० ॥

चित्रलेखाऽभ्यधाद् देवस्त्रिकूटेशो विवाहनम् ।
स्वयं कारयि[1]ताऽमुष्या इति ज्ञानी मुनिर्जगौ ॥ १९३१ ॥

ततस्तूर्णमितो गत्वा सुवेलाचलपत्तनम् ।
विद्याधरपतेरेव[2] कारयेः स्मारयन्त्यदः ॥ १९३२ ॥

पत्रलेखाभ्यनुज्ञाता चित्रलेखा तथाऽकरोत् ।
विवाह्यमस्ति वाऽऽसन्नं लग्नं लाग्निकजल्पितम् ॥ १९३३ ॥

निन्ये[3] काञ्च्या विवाहाय देवेन स्वपुरे जनः ।
तरङ्गलेखा चानीता प्रशान्ताश्रमतः कृशा ॥ १९३४ ॥

मार्गं जामातुरायातः पश्यन्त्यनिमिषेक्षणा ।
देवी गन्धर्वदत्ताऽस्ति मार्गमत्तावलम्बना ॥ १९३५ ॥

कुमारीसुखदुःखानामभिज्ञा बन्धुसुन्दरी ।
भवत्यास्पदं सुचिरप्रोषितानन्दसम्पदः ॥ १९३६ ॥

तावल्लोकमनःशल्य[4]विशल्याऽतुलदर्शनम् ।
ततः श्रीसमरकेतुं प्रसद्य प्रेषय प्रभो ॥ १९३७ ॥

आहूय सिंहलेन्द्रस्य सुतं कोशलभूपभूः ।
परिज्ञापितलेखार्थमादरादब्रवीदिदम् ॥ १९३८ ॥

---

1. B कारयता°. 2. B °तेव by dropping °रे°. 3. NK निन्ये 4. NPK शल्य°; B drops °स्य°.

विचित्रवीर्यदेवस्यादेशमङ्गेश सत्वरम् ।
अङ्गीकुरु गुरोः प्रोक्तं विधेयमविलम्बितः ॥ १९३९ ॥
मोक्तुं[1] मुक्ताऽपि निर्बन्धाद् बन्धुभिः स्नेहसिन्धुभिः ।
न मोक्ष्यत्यसमीक्ष्य त्वां वल्कं मलयसुन्दरी ॥ १९४० ॥
गुरुणा त्वद्वियोगेन सा प्रसादीकृतं तनौ ।
वन्यवेशं च कार्श्यं च त्वत्समक्षं विमोक्ष्यति ॥ १९४१ ॥[2]
तदेति तेनानुमतः प्रतस्थे चन्द्रकेतुजः ।
शतचन्द्रं नभः कुर्वन् विमानैर्व्योमगामिनाम् ॥ १९४२ ॥
हरिवाहनभूशक्रश्चक्रसेननिमन्त्रितः ।
उत्तरश्रेणिवेणीयमानैर्युक्तोऽगमन्नृपैः ॥ १९४३ ॥
स तस्थौ[3] सपरीवारः पुरं गगनवल्लभम् ।
विधायान्यमित्रावासैः स्वर्णकुम्भालिशालिभिः ॥ १९४४ ॥
धवलध्वनिवाचालमिलापालशिरोमणिः ।
वराय प्रेषयामास भुजिष्याभिः[4] स भोजनम् ॥ १९४५ ॥
अविभाव्यविशेषेषु भूषणाच्छा[5]दनादिना ।
न जनेष्वहमिन्द्रत्वघटना दुर्घटाऽभवत् ॥ १९४६ ॥
तत्र चन्दनमालाभिर्धवलैर्मङ्गलैरपि ।
भात्सु गेहेषु वैवाह्यं[6] दुर्विभाव्यमभूद् गृहम् ॥ १९४७ ॥
उचिताचारचतुरैः कारिताशेषकृत्ययोः ।
पाणिपीडनमनयोरभूत् प्रेमैकचित्तयोः ॥ १९४८ ॥
पीडनेन तयोः पाणेर्मनःपीडा न्यवर्तत ।
बन्धनेनांशुकग्रन्थेर्वियोगग्रन्थिरच्छुरत् ॥ १९४९ ॥
घटनेनाघटार्थानां प्रौढिः प्रादुर्भवेत् कवेः ।
इतीव स त[7]योरेवं संयोजनमजीजनत्[8] ॥ १९५० ॥
अन्योन्यमनयोर्धाता विधातुं गाढमादरम् ।
अन्तर्दर्शित[9]विरहं विवाहं कृतवांश्चिरात् ॥ १९५१ ॥ .

---

1. NPK मोक्तु 2. NP mention the vs. no. as १४० instead of the running, though incorrect १९४०. 3. NP °स्ठौ. 4. K °ष्यामि: 5. NP °णाछाद°. 6. B drops वैवाह्यं etc., and instead repeats भूषणाच्छादनादिना of the last vs , and then corrects the mistake by continuing वैवाह्यं etc. 7. B सताया°. 8. B °जीजत by dropping °न°. 9. B drops °र्दर्शित°.

वियोगवह्निना जातक्वाथं प्रेमपयस्तयोः ।
तदा संदर्शयामास स्वादुतामतिशायिनीम् ॥ १९५२ ॥

चक्रसेननरेशेन पूजितः सपरिच्छदः ।
जगाम धामनि निजे मनुजेश्वरनन्दनः ॥ १९५३ ॥

चन्द्रकेतु[1]जमानेतुं प्रधानखचरान्नृपः ।
प्रायुङ्क्ताप्तविनिर्दिष्टान् वर्णानाकृष्टिकृद् यथा ॥ १९५४ ॥

तत्रालोकितमात्रेऽपि खचरेन्द्रादयोऽविदन्[2] ।
वत्सामनच्छ[3]भाग्यानामाद्यां मलयसुन्दरीम् ॥ १९५५ ॥

प्रादुर्भवत्पूर्वभवस्नेहसागरनक्रयोः ।
तयोः पाणिग्रहविधिरभूदद्भुतरूपयोः ॥ १९५६ ॥

अङ्ग[4]नामङ्गनाथस्तामुत्फुल्लाम्बुजलोचनाम् ।
प्राप्य गङ्गामिवागाधसत्त्वः[5] सिन्धुरिवाबभौ ॥ १९५७ ॥

जामातुस्तस्य गन्धर्वदत्ता दत्वाऽद्भुतां सुताम् ।
अविश्रान्तप्रमोदोर्मिस्तदा सिन्धुरिवाभवत् ॥ १९५८ ॥

गुणास्तस्य भुजादण्डचण्डिमानमिता इव ।
सहृदां[6] हृदयभुवं विक्रान्तां तत्र नात्यजन् ॥ १९५९ ॥

हरिवाहनराजेन्दुमुपतस्थे[7] क्षणेन सः ।
भाग्यवन्तमिवानन्तवैभवप्राभवोदयः ॥ १९६० ॥

उत्तरश्रेणिसाम्राज्यं सर्वव्यापारसङ्गतम् ।
कोशलेन्द्रसुतस्तस्यायातमात्रस्य दत्तवान् ॥ १९६१ ॥

राज्ञस्तस्य परिस्पृष्टाः सुकुमारतरैः करैः ।
नितमामुच्छ्[8]वसन्ति स्म कुमुद्वत्य इव प्रजाः ॥ १९६२ ॥

तमाहूयान्यदा भूमिमघवा मेघवाहनः ।
अभ्यषिञ्चन्निजपदे सम्पदैकनिकेतने ॥ १९६३ ॥

स्वयं तु सुव्रताख्या[9]र्यपदान्ते प्रत्यपद्यत ।
व्रतं निःश्रेयसश्रीणां स्वयंवरणमण्डपम् ॥ १९६४ ॥

---

1. P drops °तु°. 2. B °विदशन्. 3. NP °नछ°. 4. NPBK अंगाना°. 5. NPBK °सत्वः. 6. B सहृदां. 7. NP °स्ठे. 8. NPBK °मुत्स्व°. 9. chalk; NK °तार्य by dropping °ख्या°; B drops सु°.

अङ्गेन्द्रकमलगुप्तौ न्यायधर्माविवात्मनः ।
हरिवाहनभूमीन्दुः कदाचिन्न व्ययोजयत् ॥ १९६५ ॥

स भूपालान् व्यधाद् बालसेवकान् धर्मसुप्रभू ।
एकाग्रमनसाराद्धौ सद्य एव फलप्रदौ ॥ १९६६ ॥

नन्दन्तु प्राणिनः प्राणैर्वधकावधरोधजैः ।
सुकृतैरुभयहितामभमारिं सोऽकरोत् क्षितौ ॥ १९६७ ॥

तद्राज्ये न्यायधर्मानुमोदेन कृष्ट[1]पातकाः ।
श्रियं श्रयन्त्ययत्नेन निश्वा( ? )विश्वातिशायिनीम् ॥ १९६८ ॥

सत्रे[2] मे जनमायान्तं समाह्वयदसाविति ।
बाहुल्याद् यत्र दातॄणामन्वहं कलहोऽभवत् ॥ १९६९ ॥

इयन्मात्रं मया दत्तमिति गर्वोऽस्य नाभवत् ।
लब्धं त्वित्यर्थिनामासीद् अहो भिन्ना मनःस्थितिः[3] ॥ १९७० ॥

शालीनामिव भूपानामुत्खातप्रतिरोपणैः ।
स जग्राह फलस्फातिमतिख्यातिमुपेयुषीम्[4] ॥ १९७१ ॥

भोगत्यागातिरिक्तैः स्वैर्भाण्डागारमपूरि सः ।
शेषैर्देशोपयोगिभ्यः पयोभिः सिन्धुवद् धुनी[5] ॥ १९७२ ॥

विक्रमाम्बुनिधेस्तस्य परिप्लावनभीरवः ।
दत्वा कन्यां नृपा निन्युर्मर्यादामयवल्लिताम् ॥ १९७३ ॥

सत्स्वप्य[6]न्येष्वसङ्ख्येषु नृपः समरकेतुना ।
स[7]सहायं स्वमज्ञासीद् वज्रेणेन्द्रमिवास्त्रिणम् ॥ १९७४ ॥

कलत्राण्यपराण्यस्याभूवन् स्वं तु कलत्रिण[8]म् ।
मेने तिलकमञ्जर्या स रोहिण्येव चन्द्रमाः ॥ १९७५ ॥

स्वपुत्रसम्पदोत्फुल्लमुदा सिंहलभूभुजा ।
दत्तमादत्तमुक्तौवं कदाचिच्चिरसञ्चितम् ॥ १९७६ ॥

श्व[9]श्रूश्वसुरकाहूतसिंहलेन्द्रजसंयुतः ।
काञ्चीक्रीडावनक्रोडे स चि[10]क्रीड कदाचन ॥ १९७७ ॥

---

1. NPB कष्व°. 2. B सेमे by dropping °त्रे°. 3. °स्थितः. 4. NPBK °युषी.
5. NK °वद्धुना. 6. P °स्वप्य°. 7. B सहायं by dropping initial स°. 8. B कलत्रिणि.
9. NPK श्वश्रूस. 10. NP विक्रीड.

समं मलयसुन्दर्या प्रशान्तायतनेऽङ्गपम् ।
कन्या दृष्टवतीः सोऽप्याग्रहाज्जातु व्यवाहयत् ॥ १९७८ ॥

इयत्काकमनेनाहं धृतः संसारवा[1]रके ।
इति द्वेषादिवात्यर्थं स मिथ्यात्वं व्यमूलयत् ॥ १९७९ ॥

समिथ्यात्वं तमो हन्तुं ग्रामे ग्रामे पुरे पुरे ।
चक्रे चैत्यानि चक्रीव मण्डलानि गृहान्तरे ॥ १९८० ॥

कदाचिन्नाकिनामर्हज्जन्मस्नात्रं प्रकुर्वताम् ।
सुरशैले स सर्वेषां सुकृतांशहरोऽभवत् ॥ १९८१ ॥

व्यतिक्रामन् भवारण्यम[2]न्तस्तृष्णो निवृत्तये ।
कदाप्युपदेशसुधां सोपाद् विहरदर्हताम् ॥ १९८२ ॥

यः प्रभावनया नृणां हृदि मिथ्यादृशामपि ।
सम्यक्त्वं निजधर्मस्य प्रस्थानकमिव व्यधात् ॥ १९८३ ॥

नृ[3]णां सन्दिग्धधर्माणां धर्मे शाश्वतनिश्चयम् ।
नित्यचैत्येषु नीतानां चक्रे यः परमार्हतः ॥ १९८४ ॥

निशान्तनिर्मलस्वान्तदर्पणप्रतिबिम्बितम् ।
विश्वं विश्वं कदाप्येष ददर्श विममर्श च ॥ १९८५ ॥

संसारस्यास्य विश्वासः क्रूरभर्तुरिवास्ति न ।
पातयत्यङ्गिनः काष्ठां योऽप्यारूढान् परामपि ॥ १९८६ ॥

समायाता वयं तीरमित्याश्वा[4]स्यापि जन्मिनः ।
व्यावर्त्य पातयत्याशु दुःखावर्ते भवोदधिः ॥ १९८७ ॥

नैव व्यावर्तते यावत् सामग्री खलचित्रवत् ।
द्रुतं करोमि कार्याणि तावदात्महितान्यहम् ॥ १९८८ ॥

एवं विमृश्य तनये सुनये धर्मबीजवत् ।
असौ सङ्क्रमयामास विश्वं विश्वम्भ[5]राभरम् ॥ १९८९ ॥

देव्या तिलकमञ्जर्या तथा समरकेतुना ।
समं मलयसुन्दर्या चाददे स व्रतं गुरोः ॥ १९९० ॥

1. P °चारके. 2. NP °संत°. 3. NPK नृणां. 4. °स्वास्या°. 5. NP, K °तराभरं.

विजह्नुस्ते पदन्यासैः प्रकुर्वाणा वसुन्धराम् ।
कमलाया विलासाय स्थलपद्मवतीमिव ॥ १९९१ ॥

यत्पादावङ्गिनां नन्तुं दुर्लभावैहिकार्थदौ ।
अतात् तौ सुलभावास्तामामुत्रिकफलावपि ॥ १९९२ ॥

दुष्क[1]रेणार्जयामासुः सुकृतं चरणेन ते ।
भव्याः शरीरभाजस्तच्चरणस्मरणेन तु ॥ १९९३ ॥

हित्वा खेचरचक्रिवैभवममर्त्ये[2]न्द्रैकमुद्रारुहं
मामेते दधुरित्युदारगरिमोत्फुल्लप्रसादं किल ।
चारित्रं त्वरयैव[3] निर्वृतिपुरीसाम्राज्यसर्वेश्वरीं
वश्या[4]मेषु चकार केवलविदं हर्षप्रकर्षास्पदम् ॥ १९९४ ॥[5]

मिथ्यादर्शनमूलदुर्गतिचतुःशाखासुखालीफल-
दुष्क[6]र्मद्रुमखण्डखण्डनकलादुर्मत्तदन्ताव[7]लाः ।
भव्यप्राणिशिवप्रयाणपटहध्वानैर्वचोभिर्जगत्
प्रीणित्वा हरिवाहनप्रभृतयः स्वश्रेयसं शिश्रियुः ॥ १९९५ ॥

[ ॥ इतिश्रीतिलकमञ्जरीकथोद्धारः सम्पूर्णः ॥ ][8]

---

1. NPBK दुःकरे°. 2. B °र्त्यै. 3. B त्वरायै°. 4. NPBK वश्या°. 5. NPBK give this verse the number १९९३ 6. NPBK दुःकर्म°. 7. B °दंबला, dropping °ता°. 8. N After the verse number mentioned as १९९७ and इतिश्रीतिलकमञ्जरीप्रबंधः ठ, the following matter has been added, most probably later on, in different ink and handwriting on folio 59( b ):

साहश्रिसहस्रकिरणसुतश्रीसागरगच्छ उद्योतकारकअजितनाथप्रसादकरावितश्रीराजनगरमध्य । श्रीशेत्रुजयो जयंताचलादितिर्थ संघपती श्रीशेत्रुजय प्रसाद अजीतनाथकरावित ॥ सेठश्रीलखावितसेठवखतचंद । खुशालचंदभार्याजडाववाइ । तत्पुत्रसेठ इच्छाभाइ । सा. पांनाभाइ । सा. मोतिभाइ । सा. अनोपभाइ । सा हेमभाइ । सा. सूर्यमलभाइ । सा. । मनसु डा १४१५ कभाइ । बेन वीजलीबाइ । बेन उजमबाइ सडात्मार्थे पुस्तकभंडारपरिपाल्नायः ।

Then, below this last line something like this, but not quite indecipherable, has been written on the right side : तलकमंजरी गरंपू

पां | ५९
डा | ६ प्र | ५

Obviously, it records the total number of folios, the book number and perhaps the serial number of the manuscript in the box.

P The last five syllables beginning with त्तदन्ता....etc., after °दुर्म° in the second quarter of vs. 1995, the whole of the third and the fourth quarter, and the colophone etc., are lost with the loss of the last folio no. 56.

B After the verse no. 1995, mentioned as 1997, the following is written:

इति श्रीतिलकमंजरीप्रबंधः संपूर्ण्णं समाप्तानिः ॥ छ ॥ यदिक्षरपदभ्रष्टं स्वरव्यंजनवर्जितं । तत्सर्वं क्षिमत्वं देवि । प्रसीद्ध परमेश्वरी ॥ १ ॥ यादृश्यं पुस्तकं दृष्ट्वा । तादृस्वं लिखितं मया । यदि शुद्धं मम शुद्धं वा । मम दोषो न दीयने ॥ २ ॥

संवत १६४५ वृषे शाके १५०११ प्रवृत्तमाने फाल्गुनमासे शुक्लपक्षे १३ तिथौ भौमवासरे । मुनि गोव्यंदलषितां । ग्रंथाग्रसंख्या । २२०० ॥ छ ॥ श्रीवीतरागाय नमः ॥ श्रीगुणेशाय नमः ॥ ठ ॥ श्री ॥ श्री ॥ ढ ॥ ढ ॥ ढ ॥ श्रीरस्तु कल्याणमस्तुः ॥ ढ ॥ श्री ॥ ७४ ॥ : Below this line in written द । पुनिसागरराछे १ ) नीमीलावलरोल्नेदीवीराजषुस्तीस्तु, while in the margin at the top the following verse is written thus :× वाचकाग्रे सरश्रीम । दूर्म्मसागरशिष्पकैः । निर्मितोऽयं कथाग्रंथः पंडितैः पद्मसागरैः ॥ ९८ ॥

K After the incorrect vs. no. १९९४ of the last verse, the following is written : इति श्रीतिलकमंजरीप्रबंधः संपूर्णमगमत् ॥ सँवत् १९६५ रा असाड शुक्ल ८ अष्टम्यां भोमवासरे ॥ शुभं भवतुः ॥ श्रीरस्तुः ॥ लिखितं श्रीबडोदानगरमध्ये । भद्रं भूयात् ॥ ढ ॥ ५ ॥ ढ ॥ ग्रं॰ २०५० श्लोक छैः ॥

IGNCA RAR
R-136
ACC. No.

Indira Gandhi National
Centre for the Arts